53. *a* Cp. 31 अधिगौरवाः. *b* So Bh., I-8 with commentators; others—मत्य. *c* I-5 विग्रहात्.

54. *b* F. पुरारि—. *c* Cp. IV, 21 क्षिता. *d* F. विनष्टमूर्ते—.

55. *a* P-5, I-3, I-5, I-6 ततः प्रभृत्यु—; I-8 corrects ततः into तदा.

56. *a* I-5 उपात्तवर्णैश्चरितैः; I-8 उदात्तवर्णैश्चरितैः (according to Bṛhaspati, Bharata and Gopāla) recording उपात्तवर्णे चरिते as a variant. *d* Vā-1, F., Bh., G.—ररोदयत्; cp. 14 व्यवर्धयत्.

57. *a* P-5—सु निमीलिता क्षणं.

यदा बुधैः सर्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम् ।
इति स्वहस्तालिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ।। ५८ ।।
यदा च तस्याधिगमे जगत्पतेर्
अपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरोर्
इयं प्रपन्ना तपसे तपोवनम् ।। ५९ ।।
द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न तु प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः ।। ६० ।।
न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्राकुलमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम् ।। ६१ ।।

58. *a* So F., G., I-5, I-6, I-8, G., S., T.; P-2 corrects सदा into यतो; F. यदा बुधैः स्वप्नगतस्त्वमुच्यसे. *c* So Vā-1, P-5; I-8, P-2 स्वहस्तालिलिखि—; P-2 corrects स्वहस्तोल्लिखि—into—स्तालि—; I-1, I-3, G., S., T., Bh. स्वहस्तोल्लिखि— (cp. Rv. VI, 32 यत्नोल्लि.); B-2 स्वहस्तोल्लिपितः (with comment लिखितः) perhaps original reading replaced by its meaning उल्लिखितः. But cp. *A. Śākuntala* VI, 6 संस्कारोल्लिखित etc.,—Rv. III, 15 बभूवुरालेख्यसमर्पिता इव showing Kālidāsa's preference for आ + √लिख् 'paint'.

59. *a* F. यदापि. *b* P-5 निचिन्वती.

60. *a* So F.; others न च.

61. *b* So Vā-1, P-2, P-3, P-4, P-5, I-1, I-3; I-5 अश्रान्तरवीक्षिता—; I-6—अश्रान्तनिरीक्षिता—; H-1—रश्रोत्तरमीक्षिता—; Vā-3—रस्रान्तनिरी—but in comment अस्रोत्तरमश्रुप्रधानं यथा तथा; I-8—रस्रोत्तरवीक्षिता—; G. रस्रोत्तरमीक्षिता—. So S., T., Bh.

अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमाम्
अपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥
अथाग्रहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथंचिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ॥ ६३ ॥
यथाश्रुतं वेदविदां वर त्वया
जनोऽयमुच्चैःपदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ६४ ॥
अथाह वर्णी विदितो महेश्वरस्
तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतं विचिन्त्य तं
तवानुवृत्तिं न च कर्तुमुत्सहे ॥ ६५ ॥
अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।

62. *b* निवेदिते Bharata and Gopāla in I-8. *c* P-5 अपीदमेवं; I-8—हासमित्यु—justified by Bṛ. and Bhar.

63. F. अथार्द्रहस्ते. *b* Vā-3, I-2 समर्थयन्ती.

65. *a* F. तथाह. *c* So P-5, I-1, I-2, I-3, Vā-1; F., I-8 अमङ्गलाभ्यासरतिं with Mallinātha (अमङ्गलाभ्यासेऽमङ्गलाचारे रतिर्यस्य), Bṛhaspati (अमङ्गलेषु अस्थिधारणश्मशानवासादिषु अभ्यासेन रतिर्यस्य), Bharata (अमङ्गलस्यास्थिभस्मश्मशानवासादिरूपस्य कर्मणोऽभ्यासे परिशीलने रतिर्यस्य) and Gopāla (अमङ्गलं श्मशानं तस्याभ्याशः समीपं तत्र रतिर्यस्य) cp. note on 13. *d* I-5—नुवृत्तं; P-5 न हि.

करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६ ॥
त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७ ॥
चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमंस्यते ।
अलक्तकाङ्कानि पदानि पादयोर्
विकीर्णकेशास्थिपरेतभूमिषु ॥ ६८ ॥
अयुक्तरूपं किमतः परं वद
त्रिनेत्रवक्षःसुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ॥ ६९ ॥
इयं च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥ ७० ॥

66. *b* P-5—विवाहकङ्कणः; others—कौतुकः (=मङ्गलसूत्रम्). *c* Vā-1, H-1 भुजेन.

67. *c* So F., Bh.; others—दुकूलं च सहंस—with च redundant.

68. *b* F., Bh.—नुमन्यते. *c* and *d*: पादयोः प्रकीर्ण—I-5. *d* So I-6; others—केशासु परेतभूमिषु; a typical illustration of how a manuscript, though alone in a particular reading, helps to establish the original text. No commentator has —केशास्थिपरे—.

69. *a* So P-5, F., Vā-3, G.; others भवेत्. *c* P-5 कुचद्वये—; Vā-3, P-3, P-5, I-1, I-2, I-3—चन्दनाङ्किते perhaps under influence of हरिचन्दनाङ्किते, Rv. III, 59.

द्वयं गतं संप्रति शोचनीयतां
समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्
त्वमस्य लोकस्य च नेत्रकौमुदी ।। ७१ ।।
वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ।। ७२ ।।
निवर्तयास्मादसदीप्सितान्मनः
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया ।। ७३ ।।
इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते ।। ७४ ।।
उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।

71. *a* B-1 omits this śloka. *b* So I-8, F.; others कपालिनः.

72. *a* Vā-3 अलक्ष्यरूपता (perhaps for alliteration), 73. *d* So F., Bh., Vā-1; P-5 reads उपेक्षते साधुजनो न वैदिकीं but in comment: अपेक्षते अर्थयते। अत्र परार्धे त्रिचतुराणि पाठान्तराणि प्रचरन्ति। I-8: उपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया (but the four commentators अपेक्ष्यते); I-1: अपेक्षते साधुजनेन वैदिकी...on which H-1 is an improvement: अपेक्षते साधुजनो न वैदिकीं श्म...यूपसत्क्रियाम्.

74. *c* Vā-1—भ्रुलतया—; I-8—लतया कृते तया—(noted by Bṛhaspati, Bharata and Gopāla).

अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनः ।। ७५ ।।
विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहृतात्मवृत्तिभिः ।। ७६ ।।
अकिंचनः सन् प्रभवः स संपदां
स लोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ।। ७७ ।।
विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्तेरवधार्यते वपुः ।। ७८ ।।
तदङ्गसंस्पर्शमवाप्य कल्पते
ध्रुवं चिताभस्मरजो विशुद्धये ।

75. *d* So Vā-1, P-1; F. with majority—त्मनाम्, read by I-8 according to Mallinātha, Bharata and Gopāla. Bṛhaspati, however, reads पिनाकिनः which supports our 'singular' reading; for a similar confusion cp. 83 महतां—महतः.

76. *d* F. किमेभिराशोपहृतात्म—; I-8 reads किमाभिः recording किमेभिः; cp. Bṛhaspati (आभिः आशोपहतात्मवृत्तिभिः विषयस्पृहोपप्लुताभिरात्मवृत्तिभिर्बुद्धिप्रवृत्तिभिः किम्), Bharata (आभिः वैषयिकीभिः आशया तृष्णया उपहत आत्मा येषां ते तादृशानां जनानां वृत्तिभिः क्रियाभिः मङ्गलचेष्टाभिः किम्) and Gopāla who leaves the word unexplained. एभिः मङ्गलैः Mallinātha.

77. *a* P-4 अकिंचनः संप्रभवः स. *b* G., Bh. त्रिलोकनाथः. *d* Vā-1, I-2, H-1 याथात्म्यविदः. I-2 reads 81 (असंपदस्तस्य . . .) after 77.

78. *a* F. विभीषणोद्भासि. *c* Vā-1, P-2, I-6—दथ चन्द्र—through अथ चेन्दुशेखरं read by Vā-3.

तथा हि नृत्याभिनयक्रियाच्युतं
विलुप्यते मौलिभिरम्बरौकसाम् ।। ७९ ।।
असंपदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोऽरुणाङ्गुली ।। ८० ।।
विवृण्वता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ।। ८१ ।।
अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ।। ८२ ।।
निवार्यतामालि किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ।। ८३ ।।

79. *a* G., Bh. तदङ्गसंसर्ग—; cp. III, 36 अङ्गेण संस्पर्श—. *c* I-8 तथाभिनृत्याभिनय—; P-5 तथा हि नृत्ताभि—. *d* So Vā-1, P-3, P-5, I-1, I-2, I-3, I-6, H-1 (with विलुप्यते ध्रियते); I-8 with Bhar., Gop. विलुप्यते गृह्यते but विलिप्यते in F., Bh. (comment विलिप्यते ध्रियते), Vā-3, P-2, G., S., T.

80. *d* F.—रुणाङ्गुलौ.

81. *a* Vā-1, F., G., Bh. विवक्षता, recorded by I-8 as a variant.

82. *a* I-8, Bh. यथा श्रुतं—. *d* F.—कामवृत्तिर्वशनीयमी—; P-5—वृत्तिर्वचनीयदर्शिनी.

83. *a* Bh. बटुः. *c* Vā-1, I-1, I-2 महतोऽवभा—; B-1, B-2—महतो विभाषते; H-1 महतोऽवभाषते; Bh., I-8 (with four comments

इतो गमिष्याम्यथवेति वादिनी
चचाल साग्रस्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः ॥ ८४ ॥
तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्
निक्षेप एव पदमुद्धृतमर्पयन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ८५ ॥
अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८६ ॥

॥ इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ उमातपःफलप्रदानं नाम पञ्चमः सर्गः ॥

महतोऽपभाषते) with majority महतोऽपभाषते; cp. note on 18. *d* F. श्रुणोति.

84. *b* I-8—गौरी स्तनि—; P-5—सा च स्तन—; majority—बाला-स्तन—. We follow F. which is significant; for अग्रस्तन cp. Mallinātha on अथाग्रहस्ते 63. *c* So majority; F. शुचिस्मितः.

85. *b* So Vā-1, Bṛhaspati, Bharata and Gopāla in I-8; Bh., F., Mal. निक्षेपणाय पद—; so Vā-3, G., S., T.;—मुद्धतमु—Vā-3, Bh.; so I-8 with Bṛhaspati, Bharata, Gopāla and Mallinātha; others—मुद्वहन्ती.

Colophon: Vā-3—गौरीतपःफलोदयो नाम—; P-3—गौरीतपःफलो नाम—; P-4—उमातपःफलोदयो नाम—; I-1—पार्वतीफलोदयो नाम—; I-1 omits 4th canto without even remotest mention of it; I-5—उमाफलोदयो नाम—with which agrees I-8; G.—गौरीतपःफलोदयो नाम—; S.—तपःफलोदयो नाम—with which agrees T.; F.: इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये पञ्चमः सर्गः । श्रीरामचन्द्रार्पणमस्तु । श्रीकाकुलेशाय मङ्गलम् । श्रीराम । Bh.: इति कालिदासकृतौ कुमारसंभवे महाकाव्ये फलोदयो नाम पञ्चमः सर्गः.

।। षष्ठः सर्गः ।।

अथ विश्वात्मने गौरी संदिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ।। १ ।।
तया व्याहृतसंदेशा सा बभौ निभृता प्रिये ।
चूतयष्टिरिवाभ्याशे मधौ परभृतोन्मुखी ।। २ ।।
स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् ।
ऋषीन् ज्योतिर्मयान् सप्त सस्मार स्मरशासनः ।। ३
ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः ।
सारुन्धतीकाः सपदि प्रादुरासन् पुरः प्रभोः ।। ४ ।।
आप्लुतास्तीरमन्दारकुसुमोत्करवीचिषु ।
आकाशगङ्गास्रोतःसु दिङ्नागमदगन्धिषु ।। ५ ।।
मुक्तायज्ञोपवीतानि बिभ्रतो हेमवल्कलाः ।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ।। ६ ।।
अधःप्रस्थापिताश्वेन समावर्जितकेतुना ।
सहस्ररश्मिना शश्वत् सप्रणाममुदीक्षिताः ।। ७ ।।

1. *b* I-5 सखीं पिता.

2. *b* So P-5, I-1, I-3 ; majority भ्यासे, cp. V, 65*c*.

4. *d* P-5 पुरोगताः; B-1, B-2 प्रभोः पुरः.

5. Śloka omitted by I-8. *b* F., H-1, G., Bh.—कुसुमोत्किर— (comm. उत्किरन्ति विक्षिपन्ती व्युत्किराः); H-1—त्करवाहिषु. *c* G. व्योमगङ्गाप्रवाहेषु; Vā-1, Vā-3, H-1—श्रोतःसु; Va-1 दिग्नाग—.

6. *b* B-1, I-8 बिभ्राणाः in Bṛhaspati, Bharata and Gopāla ; but बिभ्रतो according to Mallinātha. हैमबन्धनाः I-8 in Bharata but हैमवल्कलाः (Bh.) in Gopāla ; cp. हेमवेत्रः III, 41. *c* रत्नाक्षयुक्ताः noted by Bharata in I-8 as a variant.

7. *a* B-1 प्रस्वापिता—. *c* रश्मिना साक्षात् F., G., Bh. B-1 puts this śloka after 8th.

आसक्तबाहुलतया सार्धमुद्धृतया भुवा ।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि ॥ ८ ॥
सर्गशेषप्रणयनाद् विश्वयोनेरनन्तरम् ।
पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः ॥ ९ ॥
प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम् ।
तपसामुपभुञ्जानाः फलान्यपि तपस्विनः ॥ १० ॥
तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा ।
साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती ॥ ११ ॥
तामगौरवभेदेन मुनींश्चापश्यदीश्वरः ।
स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम् ॥ १२ ॥
तद्दर्शनादभूच्छंभोर्भूयान् दारार्थमादरः ।
क्रियाणां खलु धर्म्याणां दांपत्यं मूलसाधनम् ॥ १३ ॥
धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति ।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः ॥ १४ ॥
अथ ते मुनयः सर्वे पूजयित्वा जगद्गुरुम् ।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः ॥ १५ ॥

8. *b* F.—उद्भ्रुतया.
9. *d* P-5 धातार इव; so I-5, Vā-1.
10. *c* B-1 तपसां परिभु—.
12. *b* Bharata in I-8 records—चार्चयदी—as a variant. *c* I-8 —पुमानिति नास्थैषा, but even here the commentators read अनास्थैषा.
13. *b* So F., G., Bh., P-5; Vā-1, H-1 भूयो. *d* So P-4; Vā-1, I-2, P-5, I-5, B-2 सत्पत्न्यो मूलसाधनम्; Bh., B-1, F. सत्पत्न्यो मूलकारणम्; I-1, I-3, I-8 दांपत्यं मूलसाधनम् with Mallinātha : सत्पत्न्यो मूलकारणम्, Bṛhaspati दांपत्यं मूलकारणम्, Bharata and Gopāla : दांपत्यं मूलसाधनम्.
15. *a* G., Bh., B-2 मानयित्वा जग—; H-1, H-2 प्रणिपत्य ज—; B-1 मानयित्वा जगत्पतिम्. *d* P-4—कितं वचः, noted by Gop. in I-8.

यद् ब्रह्म सम्यगाम्नातं यदग्नौ विधिवद् धुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ।। १६ ।।
यदध्यक्षेण जगतां वयमारोपितास्त्वया ।
मनोरथस्याप्यपथं मनोविषयमात्मनः ।। १७ ।।
यस्य चेतसि वर्तेथाः स तावत् कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते ।। १८ ।।
सत्यमर्काच्च सोमाच्च परमध्यास्महे पदम् ।
अद्य तूच्चैस्तरं तस्मात् स्मरणानुग्रहात्तव ।। १९ ।।
त्वत्संभावितमात्मानं बहु मन्यामहे वयम् ।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ।। २० ।।
या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसंभवा ।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम् ।। २१ ।।
साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा ।
प्रसीद कथयात्मानं न धियां पथि वर्तसे ।। २२ ।।
किं येन सृजसि व्यक्तमुत येन बिभर्षि तत् ।
अथ यस्तस्य संहर्ता भागः कतम एष ते ।। २३ ।।

16. *b* So P-5 explained by Bhar. in I-8; others विधिना.

17. *c* Bh., G., F. :—स्याविषय obviously an explanation from comment.

19. *b* I-8, H-1—पदमध्यास्महे वयम्; F. नित्यमर्काच्च सोमाच्च पदमध्यास्महे वयम्. *c* Vā-1 तूच्चैस्तरा; Bh.—तरं ताभ्यां; H-1 तूच्चैस्तरामन्तस्मर—(with comment अन्तः मध्ये). I-8 तूच्चतरैस्तस्मात् but in comment Mallinātha, Bṛhaspati, Bharata and Gopāla alike follow तूच्चैस्तरम्.

21. *a* I-5, I-8—तिर्विंशालाक्ष in Bṛ., Bhar., Gop. *c* P-4, P-5, I-1, I-2, I-3, H-1 किमाख्यायते.

22. *c* H-1, H-4 दर्शयात्मानं.

23. *c* I-5, H-1, H-4, B-1, G., Bh. अथ विश्वस्य सं—; so I-8 with Bharata following योऽथ वि—संहर्ता.

अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु ।
चिन्तितोपस्थितांस्तावच्छाधि नः करवाम किम् ।। २४ ।।
अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः ।
उपचिन्वन् प्रभां तन्वीं प्रत्याह परमेश्वरः ।। २५ ।।
विदितं वो यथा स्वार्था न मे काश्चित् प्रवृत्तयः ।
ननु मूर्तिभिरष्टाभिरित्थंभूतोऽस्मि सूचितः ।। २६ ।।
सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः ।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः ।। २७ ।।
अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने ।
उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम् ।। २८ ।।
तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः ।
विक्रियायै न कल्पन्ते संबन्धाः सदनुष्ठिताः ।। २९ ।।
उन्नतेन स्थितिमता धुरमुद्वहता भुवः ।
तेन योजितसंबन्धं वित्त मामप्यवञ्चितम् ।। ३० ।।
एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते ।
भवत्प्रणीतमाचारमामनन्ति हि साधवः ।। ३१ ।।
आर्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति ।
प्रायेणैवंविधे कार्ये पुरंध्रीणां प्रगल्भता ।। ३२ ।।
तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम् ।
महाकोशीप्रपातेऽस्मिन् संगमः पुनरेव नः ।। ३३ ।।

25. *c* H-1 विस्तारयन् प्रभां.

26. *a* H-4 स्वार्थं न—. *c* P-4 न तु भू—.

28. *c* I-5, I-8 उत्पादाय but even here Mallinātha follows उत्पत्तये; F. reads with उत्पादाय हविर्भास्तुर्यज—.

29 *a* H-4—मस्मदर्थं.

31. *d* F :—मनन्तीह साधवः.

33. *c* and *d* : F. : महाकालीप्रपातेऽस्मिन् संगमः पुनरस्तु नः; Vā-3 महाकोशीप्रपातोऽस्मिन् . . . ; I-8 महाकोषीप्रपाते—with Mallinātha, Bṛhaspati and Bharata—कोषी—but Gopāla—कोशी—.

तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे ।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः ।। ३४ ।।
ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम् ।
भगवानपि संक्रान्तः प्रथमोद्दिष्टमास्पदम् ।। ३५ ।।
तेऽप्याकाशमसिश्याममुत्पत्य परमर्षयः ।
आसेदुरोषधिप्रस्थं मनसा सह मानसाः ।। ३६ ।।
अलकामतिवाह्येव वसतिं वसुसंपदाम् ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम् ।। ३७ ।।

34. *b* Vā-3, I-1—णयोत्सुके. *c* Vā-1 जह्रुः. *d* So Vā-1, G., I-5, Bh.; others तपोधनाः.

35. *a* I-1, I-3 ततः प्रयाम इत्युक्त्वा; I-5 ततः परममोमित्यु—clearly a combination of परममित्युक्त्वा and परममोमुक्त्वा the intended reading; H-1 ततः प्रमाणमित्युक्त्वा; I-8 agrees with ours; but even here Mallinātha reads: ततः प्रयाम इ—. *c* So I-8; others संप्राप्तः. *d*—ष्टमाश्रमम् Vā-1, P-3, P-4, I-1, I-2, I-3, H-1, which corrects आस्पदं into आश्रमम्; I-8 reads आस्पदम् but even here Bṛhaspati and Bharata accept आश्रमम्; P-5—ष्टमासनम्.

36. *a* So Vā-1, P-2, P-3, B-1, I-8 (where Mallinātha explains ते चाकाशं—" महर्षयश्चापि," चकारः समुच्चयार्थः); but Bharata (अपिः पूर्वापेक्षया समुच्चये) and Gopāla (तेऽपि परमर्षादयोऽपि) read तेऽपि; F., G., Bh. ते चाकाश—; Vā-3, P-5 ते आकाश—. *b* I-8 उपेत्य परमर्षयः but strangely Mallinātha, Bṛhaspati, Bharata and Gopāla follow उत्पत्य; I-1, I-3 उद्ययुः प—. *c* F. आजग्मुरो—. *d* So P-5 alone with comment मनसा निर्मिता मानसाः सप्तर्षयः मनसा सह मन इवातिचातुर्योक्तिः यदैव गमनाय मनः कृतं तदैव प्रापुः; I-1, I-3, I-8 मनसा तुल्यरंहसः in Bṛhaspati, Bharata and Gopāla; even here Mallinātha समरंहसः; Vā-3 मनसा सहरंहसः but comments: मनसा समरंहसः.

37. *a* So Vā-1, F., P-4, P-2, P-3, I-1, B-1;—मतिवाह्यैव Bh., P-5 (but comment—ह्येव), I-1, I-8 (where Mallinātha explains

गङ्गास्रोतःपरिक्षिप्तं वप्रान्तर्ज्वलितौषधि ।
बृहन्मणिशिलासालं गुप्तावपि मनोहरम् ।। ३८ ।।
जितसिंहभया नागा यत्राश्वा बिलयोनयः ।
यक्षाः किंपुरुषाः पौराः योषितो वनदेवताः ।। ३९ ।।
शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः ।। ४० ।।

अतिवाह्येव); but Bharata and Gopāla अतिवाह्यैव अतिक्रम्यैव; Vā-3—ह्यैवं. *c* So Vā-1, P-5 (comment: साराश्रयं विधायैव रचितम्), P-2, F., Mallinātha in I-8 (=अभिष्यन्दोऽतिरेकः अतिरिक्तजन इति यावत्) but Bṛhaspati, Bharata and Gopāla explain अभिष्यन्दि (वमनं न्यक्कारं वा कृत्वा, स्वर्गस्य अभिष्यन्दि-वमनं शाखानगरमिव कृत्वा; स्वर्गसुखं स्यन्दितुं शीलं यस्य स तथा अथवा स्थानात् स्थानान्तराकर्षणमभिष्यन्दिवमनशब्देनोच्यते); cp. also comment on 47. *d* So Bh., F., P-5 supported by Rv. XV, 29*d*. H-1 कृत्वा इव निवे—; others—व विनि—.

38. *a* and *b*: F.—परिक्षिप्तवप्रान्त—; Vā-1, P-2, P-3, I-5, I-8 गङ्गाश्रोतः—. *c* So P-5, G., Bh.; others शिलाशालं. *d* So F., P-5, G., S., T. and I-8 (Mallinātha गुप्तावपि संवरणेऽपि; Bharata परचक्ररोधाय दुर्गरचना गुप्तिः तस्यां recording स्वर्गादपि as a variant); Vā-1, I-1, I-3, I-8 स्वर्गादपि मनोहरम्; P-3 स्वर्गादपि मनोरमम्.

39. *a* I-8 वीतसिंहभया—; but the four commentators explain जितसिंह—, Mallinātha recording वीतवीतभया नागा (वीतं वीतात् पादाङ्कुशकर्मभ्या भयं येषां ते) as a variant. *b* Mark Mallinātha on बिल citing a quotation where बिल does not occur; *bila*=*Uccaiḥśravas*? Cp. however:

वामकर्णस्य विवरात् कृष्णस्य परमात्मनः ।
गणः श्वेततुरंगाणामाविर्भूतो मनोहरः ।।

Brahmavaivarta I, 5, 49.

40. *b* वीज्यन्ते I-2; वेश्मसु P-2. *c* Vā-1, P-3, I-1, I-2 मन्द्रगर्जित—; Bh., F., P-2, P-4, P-5, I-8 अनुगर्जित according to Mallinātha but अन्तर्गर्जित according to Bṛhaspati, Bharata and

यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।
गृहयन्त्रपताकाश्रीरपौरादरनिर्मिता ॥ ४१ ॥
यत्र स्फटिकहर्म्येषु नक्तं सोपानपङ्क्तिषु ।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम् ॥ ४२ ॥
यत्रौषधिप्रकाशेन नक्तं दर्शितसंचराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ॥ ४३ ॥
यौवनान्तं वयो यस्मिन्नातङ्कः कुसुमायुधः ।
रतिः स्वेदसमुत्थानं निद्रा संज्ञाविपर्ययः ॥ ४४ ॥

Gopāla. *d*—मुरज—F., I-8, Vā-3, P-2, I-1, I-3, I-5; —मरुज—Vā-1, I-2;—मुरुज—P-3, P-5.

41. *c*—पताकश्री—F.; गृहच्छत्रपताकाश्री—I-8 followed by Bṛhaspati, Bharata and Gopāla.

42. *a* I-8—हर्म्याणां but all the commentators explain—हर्म्येषु; but Bharata records it. *b* So Vā-1, P-3, P-4, I-2, I-5, I-8 with Mallinātha, Bṛhaspati, Bharata and Gopāla none recording any variant; I-1, I-3, Vā-3 सोपानभूमिषु (but comment—आपानभूमिषु); Vā-1 records, on margin नक्तमापानभूमिषु as a variant, which is followed by P-5, F., Bh., P-2, S., T., G., B-2 (curiously Mallinātha in them explains आपानभूमिषु आपानपङ्क्तिषु?). *d* I-1, I-3—उपकारताम्.

44. *b* F., Bh. नान्तकः कुसुमायुधात् followed by G., S., T.; P-5 आतङ्कः कुसुमायुधः (comment: यत्र सायकक्षेपान्मदन एवातङ्कः न तु व्याध्यादि—; may be: न+आतङ्कः no fear of death from over-indulgence); cp. नैषां शिश्नं प्र दहति जातवेदाः AV. IV, 34.2; Vā-1, H-4 अन्तकः कुसुमायुधः (*see* Mallinātha); I-8 नानङ्गः कुसुमायुधः followed by Bṛhaspati, Bharata and Gopāla. Cp. Md. II, 4*b*.

c and *d*: cp. Rv. VIII, 51; I-1, Vā-1, H-4, B-1, B-2 रतिखेदसमुत्थाना; F., Bh. रतिखेदसमुत्पन्ना recording रतिभेदसमु— as a variant meaning 'sleep caused by a variety of (sexual) enjoyment'; I-5 रतिः खेदसमुत्थानं accepted by I-8

भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्जनैः ।
यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः प्रियाः ॥ ४५ ॥
संतानकतरुच्छायासुप्तविद्याधराध्वगम् ।
यस्य चोपवनं बाह्यं सुगन्धिर्गन्धमादनः ॥ ४६ ॥
तत् कान्तमृषयो दिव्याः प्रेक्ष्य हैमवतं पुरम् ।
स्वर्गाभिसंधिसुकृतं वञ्चनामिव मेनिरे ॥ ४७ ॥
ते सद्मनि गिरेर्वेगादुन्मुखद्वास्थवीक्षिताः ।
अवतेरुर्जटाभारैर्लिखितानलनिश्चलैः ॥ ४८ ॥

and followed by Bṛhaspati, Bharata and Gopāla explaining: आयासकारणं रतिरेव नान्यत् किमपि. The sense is: the gods get perspiration only in *rati*; otherwise they never have it. *d* F. records सुप्तिः संज्ञा—in footnotes.

45. *a* Vā-1 भ्रूभङ्गिभिः (perhaps from comment: भ्रूभेदिभिः भ्रूभङ्गवद्भिः). *d* Vā-3 प्रसादप्रार्थिनः प्रियाः; P-5 अप्रसादार्थिनः प्रियाः. Note सकम्पोष्ठैः. in all the MSS. for which cp. I, 45.

46. Śloka omitted by I-2, I-8. *d* So F., P-4, P-5, G., S., T. —मादनम्; B-1, Vā-1, P-2, P-3, I-1, I-3, I-5 सुगन्धिग—; Bh., Vā-3 गन्धवद् गन्धमादनम् with comment: गन्धवद् गन्धाढ्यं गन्धमादनं नाम गिरिर्यस्य पुरस्य बहिर्भवं बाह्यमुपवनम् । गन्धवद् गन्धमादनमित्यागन्तुकः पाठः। प्राचीनस्तु सुगन्धिर्गन्धमादन इति पुंल्लिङ्गान्तः.

47. *a* So Vā-1, B-1, H-4, I-5; अथ ते मुनयो दिव्याः Bh., F., G., S., T., Vā-3, I-2, I-3, I-8; rest as ours; P-5 अथ ते मुनयः सर्वे; P-4 ततस्ते मुनयः सर्वे; Vā-3 ततस्ते मुनयो दिव्याः (but in comment अथ दिविभवा दिव्या मुनयः). *c* So Vā-1, F., Bh., G., S., T., Vā-3, I-2, I-3, I-8, I-1, I-3; P-5, H-4 स्वर्गाभिष्यन्दसुकृतं but in comment स्वर्गमभिसंधायोद्दिश्य सुकृतम् उपवञ्चनामिव मेनिरे which implies स्वर्गाभिसंधिसुकृतं; P-4, I-5 स्वर्गाभिस्यन्दि सुकृतं, noted by I-8 and followed by Bṛ., Bhar.—ष्यन्दि = स्वर्गप्रसवि.

48. *b* F.—मुखद्वार्स्थवी—noting—मुखद्वारस्थवीक्षिताः. *d* H-4—नलसंनिभैः.

गगनादवतीर्णा सा यथावृद्धपुरःसरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरंपरा ।। ४९ ।।
तानर्घ्यानर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः ।
नमयन् सारगुरुभिः पादन्यासैर्वसुंधराम् ।। ५० ।।
धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः ।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ।। ५१ ।।
विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य देशकः ।
स तैराक्रमयामास शुद्धान्तं शुद्धवर्त्मभिः ।। ५२ ।।
तत्र वेत्रासनासीनान् नीचासनपरिग्रहः ।
इत्युवाचेश्वरान् वाचं प्राञ्जलिः पृथिवीधरः ।। ५३ ।।
अपमेघोदयं वर्षमदृष्टकुसुमं फलम् ।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे ।। ५४ ।।
मूढं बुधमिवात्मानं हैमीभूतमिवायसम् ।
भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात् ।। ५५ ।।

49. Vā-1 reverses the order of 49-50; rest as ours.

50. *a* Vā-1, P-4, I-1, I-3, I-5, I-8 in Bṛhaspati अर्घमा—; F., Bh., P-5, I-2, G., S., T., I-8 in Mallinātha, Bharata and Gopāla अर्घ्य—. *b* P-4, P-5 नगः for गिरि.

51. *d* P-5 हिमवानिव; I-5, I-8 हिमवान् गिरिः.

52. *a* B-2—क्तसंस्कारैः. *b* P-5 दैशिकः (=उपदेशी); I-1, I-3, I-5, I-8, Bh. दर्शकः. *c* Vā-3 स तदाक्रमयामास (but comment: तैर्मुनिभिः); F., P-5 स तैराक्रामया—(but comment: आक्रमयामास निनाय); cp. 79. *d* So P-5; others शुद्धकर्मभिः.

53. *b* So Vā-1, P-2, P-3, P-4, I-2, B-1, B-2; कृतासनपरि—Vā-3, P-5, F., I-1, I-3, I-5, I-8, H-4, Bh., G., S., T. *c* Vā-1 प्रत्युवाचे—; H-4 प्रत्युवाच मुनीन् सर्वान्; I-1 इत्युवाच ऋषीन् सर्वान्; I-5 इत्युवाच मुनीन् सम्यक्. *d* Bh., F. भूधरेश्वरः.

55. *a* So Vā-1, I-8 (with four commentators), P-4, I-1, I-2, I-3, I-5, B-1, B-2; note Mallinātha: बुधम् in I-8; but बुद्धम्

अद्य प्रभृति भूतानामभिगम्योऽस्मि शुद्धये ।
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते ॥ ५६ ॥
अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ॥ ५७ ॥
जङ्गमं प्रैष्यभावेन स्थावरं चरणाङ्कितम् ।
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः ॥ ५८ ॥
भवत्संभावनोत्थाय परितोषाय मूर्छते ।
अभिव्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे ॥ ५९ ॥
न केवलं दरीसंस्थं भास्वतां दर्शनेन वः ।
अन्तर्गतमपास्तं मे रजसोऽपि परं तमः ॥ ६० ॥
कर्तव्यं वो न पश्यामि स्याच्चेत् किं नोपदिश्यते ।
मन्ये मत्पावनायैव प्रस्थानं भवतामिह ॥ ६१ ॥

in G., S., T., Bh. *b* P-3, I-3 हेमीभूत—and so is Gopāla in I-8. *d* P-5—भवदनुग्रहम्.

56. *b* P-2, I-5, Bh. अधि—; note अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः Rv. I, 16; —स्मि सिद्धये I-2, P-5. *d* I-5 तीर्थं प्रचक्ष्यते.

57. *c* P-5—प्रवाहेन. *d* धृतपादा—I-2.

58. *a* So F., I-8 with four commentators; Vā-1 प्रेष्यभावेन; Bh. प्रैष्यभावे वः; H-4 प्रेक्षपक्षे वः; P-5 प्रैष्यपक्षे वः. *b* I-8 notes —ङ्कितैः followed by Gop. *c* and *d*: So Vā-1, P-3, P-4, I-1, I-8 in Bṛhaspati, Bharata and Gopāla; P-5—ग्रहं तद्धि द्वैरूप्यमिति मे कृतम्. I-5 विभक्तानुग्रहं मन्ये द्वैरूप्यमपि मे कृतम्; G., S., T. विभक्तानुग्रहं मन्ये द्विरूपमपि . . ., so Mallinātha in I-8.

59. *c* So Vā-3, P-4, B-1; Vā-3 अधिव्याप्त—(but comment: अपि व्याप्त—); P-5, I-1, I-5, I-8, F., Bh., G., S., T. अपि व्याप्त—; P-2 अपि व्याप्त—with अतिव्या—on top of line. After this Vā-3 reads कर्तव्यं वो न पश्यामि . . . (61).

60. *c* Vā-3—गतमपि ध्वस्तं रज—.

61. *b* F.—किं नोपपद्यते. *c* Vā-1, B-2, H-4 शङ्के मत्पा—. *d* Vā-3 —भवतामिदम्; so P-3, P-5.

तथापि तावत् कस्मिंश्चिदाज्ञां मे दातुमर्हथ ।
विनियोगप्रसादा हि किंकराः प्रभविष्णुषु ।। ६२ ।।
एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनार्थिनो यूयमनास्था बाह्यवस्तुषु ।। ६३ ।।
इत्युक्तवांस्तमेवार्थं दरीमुखविसर्पिणा ।
द्विरिव प्रतिशब्देन व्याजहार हिमाचलः ।। ६४ ।।
अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयः प्रेरयामासुः प्रत्युवाच स भूधरम् ।। ६५ ।।
उपपन्नमिदं सर्वमतः परमपि त्वयि ।
मनसः शिखराणां च सदृशी ते समुन्नतिः ।। ६६ ।।
स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथा हि ते ।
चराचराणां भूतानां कुक्षिराधारतां गतः ।। ६७ ।।
गामधास्यत् कथं नागो मृणालमृदुभिः फणैः ।
आरसातलमूलात् त्वमवालम्बिष्यथा न चेत् ।। ६८ ।।
अच्छिन्नामलसंतानाः समुद्रोर्म्यनिवारिताः ।
पुनन्ति लोकान् पुण्यत्वात् कीर्तयः सरितश्च ते ।। ६९ ।।

63. *b* I-5, I-8 कुलभूषणा; followed by Bṛ., Bhar., Gop. *c* So I-8 noting केनार्थिनो यूयं; others येनात्र वः कार्य—.

64. F. with others ऊचिवान्; P-4 इत्युदीरितमेवार्थं. *b* गुहामुख— Bh., G., S., T. *c* P-5 द्विरेव. *d* Vā-3 and Bh. with others हिमालयः.

65. *c* F., Bh. ऋषयश्चोदयामासुः; mark F.'s preference for चोदयामासुः.

66. B-1 इतः परमपि—.

67. *a* I-5 स्थावराणां तु.

68. *a* F. आधास्यत्. *b* Vā-1, H-3, B-1, B-2, I-8—लसदृशैः. *c* P-2, P-3—मूलाच्च त्वमा—; I-8, Vā-3—मूलं त्वमवा—; so F.; Vā-1—लात्त्वमवालम्बि—.

69. Vā-1 reads this śloka after 71. *a* H-4 अच्छिन्नमूलसंतानाः with comment: न छिन्नः छेदं प्राप्तः मूलस्य संतानः विस्तरः यासां

यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः ।
प्रसवेन द्वितीयेन तथैवोच्छ्रिरसा त्वया ॥ ७० ॥
तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः ।
त्रिविक्रमोद्यतस्यासीत् स तु स्वाभाविकस्तव ॥ ७१ ॥
यज्ञभागभुजां मध्ये पदमाक्रम्य तस्थुषा ।
उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकृतम् ॥ ७२ ॥
काठिन्यं स्थावरे काये भवता सर्वमर्पितम् ।
इदं तु ते भक्तिनम्रमर्हदाराधनं वपुः ॥ ७३ ॥
तदागमनकार्यं नः शृणु कार्यं तवैव तत् ।
श्रेयसामुपदेशात्तु वयमप्यंशभागिनः ॥ ७४ ॥

ताः. *b* So F., Bh., Vā-3 (—र्म्यनि—: परगमनादन्तःप्रवेशाच्च), S., T., G.; but Vā-1, P-4, I-1, I-2, I-3, H-3, P-5, I-5, I-8, B-1, B-2—र्मिनिवा—; but Kālidāsa describes fame as crossing oceans in Rv. VI, 77:—आरूढमद्रीनुदधीन् वितीर्णं भुजंगमानां वसतिं प्रविष्टम् etc., and we should adopt—र्म्यनि— here accordingly; cp. XV, 8 where also Vā-2 reads—निर्विवारितक्रमं, while other MSS have—ध्यनि—. *c* Vā-1 लोकं.

70. *c* So Vā-1; H-3, B-1, H-4, P-2, P-3, P-4, P-5, I-2, I-3, I-5, I-8, Bh. प्रभवेन; G., S., T. प्रभवेण; so Bharata in I-8.

71. *d* P-3, I-1 स च स्वाभा-•-; H-3, H-4 स तु स्वाभाविको हरेः.

72. *a* So F.; others with Bh. पदमातस्थुषा त्वया. *d* Vā-3—विफलीकृतम् but in comm.—वितथी—.

73. *c* and *d*: So F.; Bh. इदं तु ते भक्तिनम्रं सतामाराधनं वपुः; Vā-1—नम्रं महदा—; P-5 इदं तु ते भक्तिनम्रमभूदाराधनं वपुः; B-1 इदं ते भक्तिनम्रस्य सतामाराधनं वपुः (=P-2 except in—माराधकं—); I-1, H-3, I-8 इदं ते भक्तिनम्रस्य महोदारतरं वपुः followed by Bṛhaspati, Bharata and Gopāla; G., S., T. इदं तु ते भक्तिनम्रं सतामाराधनं वपुः.

74. *a* So F.; Vā-1, I-8 यदाग—. *b* F. तवैव च. *c* So F.; others —शाच्च. *d* So Vā-1, P-5; F., P-2, Bh., I-5, I-8—मत्रांश—.

अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम् ।
शब्दमीश्वर इत्युच्चैः सार्धचन्द्रं बिभर्ति यः ॥ ७५ ॥
कल्पितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः ।
यस्येदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि ॥ ७६ ॥
योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनम् ।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ॥ ७७ ॥
स ते दुहितरं साक्षात् साक्षी विश्वस्य कर्मणः ।
वृणुते वरदः शंभुरस्मत्संक्रामितैः पदैः ॥ ७८ ॥
तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुः कन्या सद्भर्त्रे प्रतिपादिता ॥ ७९ ॥

75. *a*—गुणस्थान—I-5, I-8, with गुणोपेतं on margin, which is the reading followed by Mallınātha and Bharata; Bṛhaspati prefers—गुणैर्व्याप्तं—; P-4, I-2, H-4—गुणोत्थान—; I-3 अणिमादिगुणैश्वर्यमस्पष्टपुरु—. *c* So Vā-1, F.; I-5 शब्दमीश्वर-मित्यु—which is accepted by I-8 in Bharata, Bṛhaspati and Gopāla; Bharata recording अत्युच्चैः as a variant.

76. *a* G., S., T. (with कलितान्योन्य—explained by Mallinātha as: कलितं धृतिसंग्रहादिस्वस्वगुणसंपादितम् अन्योन्यसामर्थ्यं यैः). *b* I-1, I-2—रात्मनि. *c* So F., I-8, Bh., Vā-1 येनेदं; P-2, I-1, I-3 येनेदं धार्यते व्यक्तं; P-5 येनेदं तन्यते व्यक्तं; H-4 येनेदं धार्यते विश्वं; I-2 यस्येदं धार्यते विश्वं.

77. *a* Vā-1 निचि, for which cp. निचेता (=observer) ṚV. 1, 184, 2;

78. *b* F., Bh. कर्मणाम्. *d* So Vā-1, F., T., G., S., Bh., cp. 52 स तैराक्रमयामास; Vā-3 संक्रमितैः (comment: अस्मासु निवेशितैः); I-1, H-3 (comment: अस्माभिः संक्रमितानि कथितानि तैः); H-4, I-8 in Mallinātha, Bṛhaspati and Bharata (but Gopāla संक्रामितैः).

79. *d* Vā-1 सद्भर्तुः; Bh., G. सद्भर्तृ—.

यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ।। ८० ।।
प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ।। ८१ ।।
उमा वधूर्भवान् दाता याचितार इमे वयम् ।
वरः शंभुरलं ह्येष स्वकुलोद्भूतये विधिः ।। ८२ ।।
अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।
सुतासंबन्धविधिना भव विश्वगुरोर्गुरुः ।। ८३ ।।
एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ।। ८४ ।।
शैलः संपूर्णकामोऽपि मेनामुखमुदैक्षत ।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ।। ८५ ।।
मेने मेनापि तत्सर्वं पत्युः कार्यं समीप्सितम् ।
भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः ।। ८६ ।।
इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः ।
आददे वचसामन्ते मङ्गलालंकृतां सुताम् ।। ८७ ।।

80. *a* P-5 यावन्मयानि; F. records यावद्द्वयानि; यानि द्वयानि. *b* F. records चराणि स्थावराणि च. *d* P-2 corrects जगतः into जगता.

81. *c* Bh. अस्या चूडा—.

82. *d* So F.; others—एषः स्वत्कुलो—.

85. *a* I-8 शैलस्तु पूर्णकामोऽपि in Bṛhaspati, Bharata and Gopāla. *b* F., Vā-3, P-5, I-3, H-3, H-4—मुखमवैक्षत. *c* I-8 गृहिणीतन्त्राः; I-1 गृहिणीमुख्याः. *d* So F., G., S., T., Bh. with Mal. and Bṛ. in I-8; others कन्यार्थे हि—.

86. Śloka omitted by F., P-5, I-5. *a* मेनापि मेने तत्सर्वं Vā-3; B-1, B-2 मेने मेनापि तत्साधु. *b* Vā-3 कार्यं समीक्षितम्; P-3 समीहितम्. G., Bh.—र्यमभीप्सितम्. *c* So I-5; I-1, I-3 न भवन्त्यभि—. *d* B-1 भवन्त्यव्यभिचारिण्योऽभर्तृष्वेव पतिव्रताः.

87. Omitted by H-3. *a* I-1 इदमेवान्तरं न्याय्य—; B-1 इदमेवोत्तर. *b* Vā-3 विचार्य; P-4, P-5, I-1 विचिन्त्य.

एहि सर्वात्मना वत्से भिक्षा त्वं परिकल्पिता ।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ॥ ८८ ॥
एतावदुक्त्वा तनयां मुनीनाह महीधरः ।
इयं नमति वः सर्वांस्त्रिलोचनवधूरिति ॥ ८९ ॥
ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः ।
आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम् ॥ ९० ॥
तां प्रणामादरस्रस्तजाम्बूनदवतंसकाम् ।
अङ्कमारोपयामास लज्जमानामरुन्धती ॥ ९१ ॥
तन्मातरं चाश्रुमुखीं दुहितृस्नेहविक्लवाम् ।
वरस्यानन्यपूर्वस्य विशोकामकरोद् गुणैः ॥ ९२ ॥
वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना ।
ते त्र्यहादूर्ध्वमाख्याय चेरुश्चीरपरिग्रहाः ॥ ९३ ॥
ते हिमाचलमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥ ९४ ॥

88. *a* Bh., F. एहि विश्वात्मने, Vā-3 (comment); I-1, I-3 शर्वात्मने, so G.; I-2, P-2, I-5 सर्वार्पणे; H-3, H-4, B-1, B-2 सर्वात्मने; I-8 सर्वात्मना in Bṛhaspati, Bharata and Gopāla explaining सर्वेषामात्मस्वरूपेण शिवेन recording विश्वात्मने, सर्वात्मने as variants; Vā-1 शर्वार्पणे, cp. 29 and 78. *b* Bh., G. भिक्षासि.

89. *b* Bh. मृषीनाह महीधरः; स भूधरः P-5. *d* I-8—वधूरियम्.

90. *c* H-3—भिर्वर्धयामासुः.

91. *a* P-2—दरश्रस्त—. *b* P-4—तंसिकाम्; so I-8 in Mallinātha and Gopāla clear, in Bharata and Bṛhaspati doubtful; note Mallinātha वतसकाम् in G., T., S.

92. *b* Vā-1 दहितुः स्नेह—; I-5 दुहितुः स्नेहव्याकुलाम्; H-3—तृस्नेहविह्वलाम्; I-8 दुहितृस्नेहव्याकुलाम्. *c* H-4 वरस्य नान्यपूर्व—.

93. *a* Vā-1, I-3 पृष्ट्वा. *d* So I-5, I-8, H-1, G., Bh.; I-1 with others चेलुश्चीरप—.

94. *a* I-5, Vā-3, P-4, P-5, I-1, I-2, I-8, Bh. हिमालयमा—. *b* B-1 पुनर्दृष्ट्वा; Bh., G. पुनः प्राप्य. *c* F., Bh. सिद्धं तस्मै; I-8 records प्रियं चास्मै as variant.

पशुपतिरपि तान्यहानि कृच्छ्राद्
अगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्युर्
विभुमपि तं यदमी स्पृशन्ति भावाः ॥ ९५ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ गौरीयाचनं नाम षष्ठः सर्गः ॥

शुभं भवतु ॥

95. *a* P-3 कृत्स्नाद्. *b* P-4 अगणयद्; H-4—समागमेप्सुः.

Colophon varies: Vā-3: इति श्रीकुमारसंभवे काव्ये कालिदासकृतौ षष्ठः सर्गः; P-3: इति श्रीकुमारसंभवे महाकाव्ये कालिदासकृतौ उमाप्रदानो नाम षष्ठमः सर्गः, so I-2, I-3, I-5 (omitting कालिदासकृतौ); H-3: इति श्रीकुमारसभवे महाकाव्ये कालिदासकृतौ गौरीयाचनो नाम षष्ठः सर्गः, so H-4; B-1 . . . उमावरदानो नाम—; I-1—उमाप्रदानो . . . ; P-5: इति श्रीकुमारसंभवे महाकाव्ये सटीके षष्ठः सर्गः; F.: इति श्रीकालिदासस्य कृतौ कुमारसंभवे महाकाव्ये षष्ठः सर्गः; G., Bh. उमाप्रदानो . . =S.

॥ सप्तमः सर्गः ॥

अथौषधीनामधिपस्य वृद्धौ
तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान् सुताया
विवाहदीक्षाविधिमन्वतिष्ठत् ॥ १ ॥
वैवाहिकैः कौतुकसंविधानैर्
गृहे गृहे व्यग्रपुरंध्रिवर्गम् ।
आसीत्पुरं सानुमतोऽनुरागाद्
अन्तःपुरं चैककुलोपमेयम् ॥ २ ॥
संतानकाकीर्णचतुष्पथं तच्
चीनांशुकैः कल्पितकेतुमालम् ।
भासा ज्वलत्काञ्चनतोरणानां
स्थानान्तरं स्वर्ग इवावभासे ॥ ३ ॥
एकेव सत्यामपि पुत्रपङ्क्तौ
चिरस्य दृष्टेव मृतोत्थितेव ।
उपोढपाणिग्रहणेति पित्रोर्
उमा विशेषोच्छ्वसितं बभूव ॥ ४ ॥

1. *b* I-8 यामित्र—.
2. *a* I-5, I-8 कौतुकसंनिधानैः according to Bharata and Gopāla ; Mallinātha संविधाभिः (?) ; Bṛhaspati संविधानैः, cp. संनिहितेऽपि 13. *b* P-5 दिने दिने. *c* P-4 सानुमतोऽनुरोधात्.
3. *a* Bh., F., P-4, P-5, I-5, G., S., T., Vā-3—कीर्णमहापथं— ; P-3—चतुःपथं— ; I-8 text चतुष्पथं—but all the commentators महापथं. *c* So Vā-1 and I-8 with all commentators ; but G., S., T. (with Bh., F., P-5) भासोज्ज्वलत्—with Mallinātha explaining उज्ज्वलत् in these. *d* Vā-1 स्वर्गमिवा—.
4. *a* So F. alone ; others एकैव. *b* I-8, I-3, P-4 चिराय; I-1, I-2 चिरेण; Bṛhaspati, Bharata and Gopāla—दृष्टेरमृतोत्थितेव in

अङ्काद्ययावङ्कमुदीरिताशीः
सा मण्डनान्मण्डनमन्वभुङ्क्त ।
संबन्धभिन्नोऽपि गिरेः कुलस्य
स्नेहस्तदेकायतनं जगाम ॥ ५ ॥
मैत्रे मुहूर्ते शशलाञ्छनेन
योगं गतासूत्तरफल्गुनीषु ।
तस्याः शरीरे प्रतिकर्म चक्रुर्
बन्धुस्त्रियो याः पतिपुत्रवत्यः ॥ ६ ॥
सा गौरसिद्धार्थनिवेशवद्भिर्
दूर्वाप्रवालैः प्रतिभिन्नरागम् ।
निर्नाभिकौशेयमुपात्तबाणम्
अभ्यङ्गनेपथ्यमलंचकार ॥ ७ ॥
बभौ च संपर्कमुपेत्य बाला
विवाहदीक्षाविधिसायकेन ।

I-8. *c* So F., उपोढपाणिग्रहणेव in Vā-1; I-5, Vā-3, I-1, I-3 आसन्नपाणिग्रहणेव; आसन्नपाणिग्रहणेति Bh. *d* F., I-8 (text alone)—च्छ्वसिता—; P-3—षोत्स्व—.

5. *b* P-5 अन्वयुङ्क्त alone; others अन्वभुङ्क्त. *c* Bh., S.—न्धि—; cp. Rv. III, 24; H-4 गिरेष्कुलस्य. *d*—तनं बभूव Va-1.

6. *a* H-3, H-4—शशलाञ्छनोत्थे (comment:—लाञ्छनस्य चन्द्रस्योत्थ उदयो यस्मिन्). *b* So F., P-5, I-1, I-2, I-3, I-8; Vā-1, H-3, B-1—फा—.

7. *b* Bh., G. प्रतिभिन्नशोभम्. *c* So Vā-1, I-1, I-2, I-3, I-8, G., S., T., Bh.; Vā-3 उन्नाभि (comment: उत्क्रान्तनाभि), so F.; H-3 निर्धौतकौ—, so H-4; P-5 निर्भिन्नकौशेय—(comment: नाभिकौशेयं जघनाम्बरं यत्र नदादि (?) तदपास्यते घटिकानाशे); mark confusion of नाभि (in comment) and निर्भिन्न (of the text); cp. उन्नाभ in Rv. XVIII, 20; Vā-3—यमुपोढबाणम्.

करेण भानोर्बहुलावसाने
संधुक्ष्यमाणेव शशाङ्कलेखा ॥ ८ ॥
तां रोध्रकल्केन हृताङ्गतैलाम्
आश्यानकालेयकृताङ्गरागाम् ।
वासो वसानामभिषेकयोग्यम्
नार्यश्चतुष्काभिमुखीमनैषुः ॥ ९ ॥
विन्यस्तवैडूर्यशिलातलेऽस्मिन्
आविद्धमुक्ताफलभक्तिचित्रे ।
आवर्जिताष्टापदकुम्भतोयैः
सतूर्यमेनां स्नपयांबभूवुः ॥ १० ॥
सा मङ्गलस्नानविशुद्धगात्री
गृहीतपत्युद्गमनीयवस्त्रा ।
निवृत्तपर्जन्यजलाभिषेका
प्रफुल्लकाशा वसुधेव रेजे ॥ ११ ॥

8. *b* So F., H-3; Bh., Vā-1, Vā-3, P-5, I-3, I-8 नवेन दीक्षा— (I-8 शाय—), cp. *24d*. *d* Vā-3, P-5, I-3, I-5—क्षमा—; F. संधुक्षमाणेव शशांकरेखा; Bh.—धुक्ष्यमाणेव शशाङ्करेखा.

9. *a* I-5, Vā-3, Bh., I-1, I-3, I-8 लोध्र (—कल्केन कृताङ्गतैलाम्); P-4—न हृताङ्ग—. *b* P-5—कालीयरसाङ्गरागाम्; I-8—कालीयकृताङ्गरागाम्. *d* P-4—मुखीं निषेदुः; I-5, I-8, Bh.—भिमुखं व्यनैषुः; so I-3.

10. *a* I-5, I-8 विन्यस्तवैदूर्यशिले च तस्मिन्; Bh.—वैडूर्यशिलातलेऽस्मिन्. *b* P-5 (विन्यस्तवैदूर्यशिले च तस्मि-) न्नाविद्धमुक्ता...; I-1, I-3, H-4, Bh. आबद्धमुक्ता....; H-4 आविद्धमुक्ता—; I-8 आरब्धमुक्ता—not followed in comments which have आबद्ध... (Mallinātha), आयुक्त—(=बद्ध Bṛhaspati), आरब्ध—(—ग्रथितं Bharata) and आबद्ध (Gopāla). *c* तोयाः P-5.

11. *b* Vā-1, I-8 (Bṛhaspati, Bharata and Gopāla)—तम्र—; H-4, P-2 गृहीतशुद्धोद्गमनीयवस्त्रा; H-3 गृहीतशुभ्रोद्गमनीयवस्त्रा; G., Bh. गृहीतपत्युद्गमनीयवस्त्रा; गृहीतवत्युद्गमनीयवस्त्रम् I-1, I-3, F.

तस्मात् प्रदेशाच्च वितानवन्तं
युक्तं मणिस्तम्भचतुष्टयेन ।
पतिव्रताभिः परिगृह्य निन्ये
क्लृप्तासनं कौतुकवेदिमध्यम् ।। १२ ।।
तां प्राङ्मुखीं तत्र निवेश्य तन्वीं
क्षणं व्यलम्बन्त पुरो निषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः
प्रसाधने संनिहितेऽपि नार्यः ।। १३ ।।
धूपोष्मणा त्याजितमार्द्रभावं
केशान्तमन्तःकुसुमं तदीयम् ।
पर्याक्षिपत् काचिदुदारबन्धं
दूर्वावता पाण्डुमधूकदाम्ना ।। १४ ।।
प्रसक्तशुक्लागुरु चक्रुरस्या
गोरोचनापत्रविभङ्गमङ्गम् ।
सा चक्रवाकाङ्कितसैकतायास्
त्रिस्रोतसः कान्तिमतीत्य तस्थौ ।। १५ ।।

c So F., Vā-1, I-8 with four commentators, निर्वृत्त—Vā-3, I-1, I-3, G., S., T., Bh.

12. *a* ततः प्रदेशाच्च P-4, P-5. *c* So all the MSS. except Vā-1 with प्रतिगृह्य. *d* H-3, H-4 क्लिप्ता (comment: क्लिप्तः रचितः).

13. *b* Vā-1, I-5 विलम्बन्न—; H-3—षन्नाः, so H-4. *c* I-8 भूतात्मशोभाक्रियमाणनेत्राः in Bṛhaspati; भूतात्मशोभाह्रिय—in Bharata; भूतानुशोभाक्रियमाणनेत्राः in Gopāla, but भूतार्थशोभाह्रियमाणनेत्राः in Mallinātha.

14. *a* P-4, P-5 धूपेन संत्याजित—. *c* F. पर्यक्षिपत्; majority (with Bh.) पर्या—; cp. note on स्ववाहनक्षो—38.

15. *a* F. विन्यस्तकाला—, so I-1, I-3; H-3 प्रसक्तकाला...; H-4 प्रासक्तकाला—; I-8 प्रयुक्तकालागुरु चक्रुरस्या गोरोच.....in text,

लग्नद्विरेफं परिभूय पद्मं
समेघलेखं शशिनश्च बिम्बम् ।
तदाननश्रीरलकैः प्रसिद्धैश्
चिच्छेद सादृश्यकथाप्रसङ्गम् ॥ १६ ॥
कर्णार्पितो रोध्रकषायरूक्षे
गोरोचनाभेदनितान्तगौरे ।
तस्याः कपोले परभागलाभाद्
बबन्ध चक्षूंषि यवप्ररोहः ॥ १७ ॥
रेखाविभक्तः प्रविभक्तगात्र्याः
किंचिन्मधूच्छिष्टविसृष्टरागः ।
कामप्यभिख्यां स्फुरितैरपुष्यद्
आसन्नलावण्यफलोऽधरोष्ठः ॥ १८ ॥

but in Mallinātha विन्यस्तशुक्लागुरु—; Bṛhaspati प्रयुक्तशुक्ला-गुरु. . . ; Bharata प्रयुक्तशुक्लागुरु. . ; and Gopāla प्रयुक्तशुक्रा-गुरु—a typical illustration of the divergence between text and commentary; I-2 आसक्तशुक्लागुरु चक्रुरङ्गं गोरोचनापत्रविभङ्ग-मस्याः; I-1, I-3, Bh. विन्यस्तशुक्लागुरु. . . ; P-5 सरोचनापत्र—; गोरोचनापत्रविभक्तमङ्गम् I-1, I-3, I-8, B-1; G., Bh. विभङ्गमस्याः.

16. *a* So I-1, I-3, I-5, F., Bh., I-8 (with four commentators); for which cp. III, 30; others लीन—. *b* F., G.—मेघरेखं.

17. *a* I-1, I-3, I-5, I-8, G., F., Bh. लोध्र—(but mark रेखा in F.). *b* I-1, I-3, H-3 गोरोचनान्यास—; P-4, I-5 गोरोचनोद्भेदनि—; F., G., Bh. गोरोचनाक्षेप—; I-8 गोरोचनापत्र—in Mallinātha; गोरोचनाभेद in Bṛhaspati; गोरोचनाभंगनितान्तगौरे in Bharata (भंगःमण्डं, who records गोरोचनाभेद also); गोरोचनाभेद in Gopāla.

18. *a* Vā-1 लेखाविभक्तश्च विभक्त—; G., F., Bh. रेखाविभक्तः सुविभक्तगात्र्याः; I-8 लेखाविभक्तश्च विभक्तगात्र्याः (as in Vā-1) in text, but रेखाविभक्तश्च विभक्त—in Mallinātha; लेखा-विभक्तश्च पवित्रगात्र्याः in Bṛhaspati (who records लेखाविभक्तश्च

पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर्
माल्येन तां निर्वचनं जघान ।। १९ ।।
तस्याः सुजातोत्पलपत्रकान्ते
प्रसाधिकाभिर्नयने समीक्ष्य ।
न चक्षुषोः कान्तिविशेषबुद्ध्या
कालाञ्जनं मङ्गलमित्युपात्तम् ।। २० ।।
सा संभवद्भिः कुसुमैर्लतेव
ज्योतिर्भिरुद्यद्भिरिव त्रियामा ।
सरिद्विहंगैरिव लीयमानैर्
आमुच्यमानाभरणा चकाशे ।। २१ ।।
आत्मानमालोक्य च शोभमानम्
आदर्शबिम्बे स्तिमितायताक्षी ।

विभक्तगात्र्याः as a variant); लेखाविभक्तश्च विभक्त—in Bharata and Gopāla. *b* So Vā-1, I-8 in Bṛhaspati, Bharata and Gopāla; F., I-1, I-3, Bh.—विमृष्टरागः followed by Mallinātha in I-8; Vā-3 मधूत्सृष्टविसष्ट—. *d* H-3 —धरोष्टः—; I-8 फलाधरोष्ठः.

20. *b* F., P-2, I-1, I-2, I-3, Bh. निरीक्ष्य. *c* I-8 चक्षुषः कान्ति— followed by Bharata alone.

21. *c* B-1 गीयमानैः. *d* I-5, I-8—नीयमानै—रारोप्यमानाभरणा चकाशे followed by Mallinātha as नीयमानैराश्रयद्भिः; आमुच्य-मानाभरणाऽङ्गेषु प्रतिमुच्यमानाभरणा चकाशे; by Bṛhaspati: नीयमानैरासक्तैः; आरोप्यमानाभरणा; by Bharata: नीयमानैः संगच्छद्भिः आरोप्यमानाभरणा..; and by Gopāla: नीयमानैः संश्लिष्टैः आरोप्यमाणाभरणा...चकाशे; Vā-1 चकासे; H-3 —आबध्यमानाभरणैश्चकासे; H-4 आबध्यमानाभरणा चकासे.

हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेषः ।। २२ ।।
अथाङ्गुलीभ्यां हरितालमार्द्रं
मङ्गल्यमादाय मनःशिलां च ।
कर्णावसक्तामलदन्तपत्र
माता तदीयं मुखमुन्नमय्य ।। २३ ।।
उमास्तनोद्भेदमनुप्रवृद्धो
मनोरथो यः प्रथमं बभूव ।
तमेव मेना दुहितुः कथंचिद्
विवाहदीक्षातिलकं चकार ।। २४ ।।
बबन्ध चास्राकुलदृष्टिरस्याः
स्थानान्तरे कल्पितसंनिवेशम् ।
धात्र्यङ्गुलीभिः प्रतिसार्यमाणम्
ऊर्णामयं कौतुकहस्तसूत्रम् ।। २५ ।।

22. *b* I-1, I-3, I-8 आदर्शबिम्बस्तिमिता—; but commentators: आदर्शबिम्बे स्ति—. *c* P-5, I-2—पयानत्वरिता—. *d* P-4 —फलो ह वेषः.

23. *a* So Vā-1, I-8, P-3, I-2, I-3, H-3;—लिभ्यां Vā-3, F., Bh., P-2, P-4, P-5, I-1, I-5. *b* G., Bh. मांगल्य—. *d* H-3 मेना तदीयं—; I-2—मुखमुन्ममज्ज (उन्ममार्ज ?); I-8 मुखमुन्ननाम in Bṛhaspati, Bharata and Gopāla; Mallinātha adopting मुखमुन्नमय्य which is also found in F.

24. *b* P-2, H-3, H-4, B-1 प्रथमो—. *c* I-8 records तेनैव मेना as a variant, followed by Bṛ., who says तमेवेति पाठोऽसंगतः.

25. *a* So F., Bh., Va-1 with majority; I-8 धात्र्यङ्गुलीभिः परिसार्यमाणं in text, but प्रतिसार्यमाणं in Mallinātha and Bharata; प्रतिसार्यमानं in Bṛhaspati and Gopāla. *d* P-2—मयं कङ्कणहस्तसूत्रम् but on top margin—कौतुक—; P-5—मयं कौतुकसूत्रहस्तम्, but comment: कौतुकहस्तसूत्रम्.

क्षीरोदवेलेव सफेनपुञ्जा
पर्याप्तचन्द्रेव शरत् त्रियामा ।
नवं नवक्षौमनिवासिनी सा
भूयो बभौ दर्पणमादधाना ।। २६ ।।
तामर्चिताभ्यः कुलदेवताभ्यः
कुलप्रतिष्ठां प्रणमय्य माता ।
अकारयत् कारयितव्यदक्षा
क्रमेण पादग्रहणं सतीनाम् ।। २७ ।।
अखण्डितं प्रेम लभस्व पत्युर्
इत्युच्यते ताभिरुमा स्म नम्रा ।
तया तु तस्यार्धशरीरलाभात्
पश्चात्कृता बन्धुजनाशिषोऽपि ।। २८ ।।
इच्छाविभूत्योरनुरूपमद्रिस्
तस्याः कृती कृत्यमशेषयित्वा ।
सभ्यः सभायां सुहृदास्थितायां
तस्थौ वृषाङ्कागमनप्रतीक्षः ।। २९ ।।

26. *c* I-8 नवं नवं क्षौम—in Bṛhaspati · नवं नवं बभौ; Bharata : नवं नवमदृष्टपूर्वमिव भूयोऽधिकं च यथा स्यात्; Gopāla : नव नवं यथा स्यादेवं क्षौम दुकूलं निवसितु शीलं यस्याः सा; but Mallinātha नवं नवक्षौमनिवासिनी सा. *d* P-5—माददाना.

27. *d* P-3 corrects सखीनाम् into सतीनाम्

28. *b* I-2 ताभिरसौ स्म नम्रा. *c* G., Bh.—शरीरभाजा. *d* I-8 तया तु तस्यार्धशरीरलाभादधः कृता— with Mallinātha : अर्धशरीरभाजा पश्चात्कृताः अधरीकृताः; Bṛhaspati : अर्धशरीरलाभाद्दूरीकृता—; Bharata : अर्धशरीरलाभात् अधःकृताः पश्चात्कृताः जिता इत्यर्थः; Gopāla : अर्धशरीरलाभात् अधःकृताः.

29. *a* F.—रूपमद्रेः. *d* So F., V-3, P-5, H-4, I-8 in Mallinātha, Bṛhaspati, Bharata and Gopāla (who prefers—कागमनं प्रतीक्ष्य but explains—गमनप्रतीक्षः also); Vā-1, P-3, P-4, B-1, I-1, I-3—गमनं प्रतीक्ष्य.

तावद्धरस्यापि कुबेरशैले
तत्पूर्वपाणिग्रहणानुरूपम् ।
प्रसाधनं मातृभिरादृताभिर्
न्यस्तं पुरस्तात् पुरशासनस्य ।। ३० ।।
तद्गौरवान्मङ्गलमण्डनश्रीः
सा पस्पृशे केवलमीश्वरेण ।
स एव वेषः परिणेतुरिष्टं
भावान्तरं तस्य विभोः प्रपेदे ।। ३१ ।।
बभूव भस्मैव सिताङ्गरागः
कपालमेवामलशेखरश्रीः ।
उपान्तभागेषु च रोचनाङ्को
गजाजिनस्यैव दुकूलभावः ।। ३२ ।।
शङ्खान्तरद्योति विलोचनं यद्
अन्तर्निविष्टामलपिङ्गतारम् ।
सांनिध्यपक्षे हरितालमय्यास्
तदेव जातं तिलकक्रियायाः ।। ३३ ।।
यथाप्रदेशं भुजगेश्वराणां
करिष्यतामाभरणान्तरत्वम् ।
शरीरमात्रं विकृतिं प्रपेदे
तथैव तस्थुः फणरत्नशोभाः ।। ३४ ।।

30. G., Bh. भवस्यापि; so I-8 in the four commentaries, P-5 कुबीरशैले. *d* Vā-1 स्मर—.

31. *c* H-3, H-4, I-8—णेतुरिष्टो in Bṛhaspati, Bharata and Gopāla; Mallinātha—णेतुरिष्टं—. *d* F. रूपान्तरं तस्य—.

32. *a* I-5 शिताङ्क—. *d* F. गजाजिन चैव—.

33. *a* H-3, H-4 नेत्रान्तरद्योति; P-5 शखान्तर द्योति—(शंखान्तरे द्योति ? cp. Mallinātha) accepted by Bharata in I-8. *b* G. तदन्त—. *c* B-1 सांनिध्ययोगे—; H-4 हरताल—. *d* So I-8; with Mallinātha, Bṛhaspati, Bharata and Gopāla all explaining तिलकक्रियायाः; P-4 तिलकं क्रि—.

दिवापि निष्ठ्यूतमरीचिभासा
बाल्यादनाविष्कृतलाञ्छनेन ।
चन्द्रेण नित्यं प्रतिभिन्नमौलेश्
चूडामणेः किं ग्रहणं हरस्य ।। ३५ ।।

इत्यद्भुतैकप्रभवः प्रभावात्
प्रसिद्धनेपथ्यविधेर्विधाता ।
आत्मानमासन्नगणोपनीते
खड्गे निषक्तप्रतिमं ददर्श ।। ३६ ।।

स गोपतिं नन्दिभुजावलम्बी
शार्दूलचर्मान्तरितोरुपृष्ठम् ।
तद्भक्तिसंक्षिप्तबृहत्प्रमाणम्
आरुह्य कैलासमिव प्रतस्थे ।। ३७ ।।

तं मातरो देवमनुव्रजन्त्यः
स्ववाहनक्षोभचलावतंसाः ।
मुखैः प्रभामण्डलरेणुगौरैः
पद्माकरं चक्रुरिवान्तरिक्षम् ।। ३८ ।।

35. *a* F.—निष्ठ्यूतमयूखभासा—; I-5—निष्ठ्यूतमनोज्ञभासा. *b* P-2, P-3, B-1—विःकृत—, P-5—अनाविष्कृतलक्षणेन. *c* I-5 नित्यं प्रतिबद्ध—.

36. *a* and *b*: I-1, I-3—प्रभवः प्रभावा (त्) स्वसिद्धनेप—; H-3, P-5 —नेपथ्यविधिर्वि—, I-8 उदारनेपथ्यविधे—in Bharata and Gopāla; Bh. प्रसिद्धनेपथ्य—. *d* Vā-3, P-5, G. निषिक्तप्र—; I-8 in Gopāla नियुक्तप्रतिम (=संक्रान्तप्रतिच्छायम्).

37. *b* P-4—चर्मापिहितोरुपृष्ठम्. *d* So majority; Vā-1, I-1, H-4 —कैलाश—.

38. *b* H-3, H-4 सवाहनक्षोभ—; I-2 स्ववाहनाक्षोभ—; cp. पर्यक्षिपत् and पर्याक्षिपत् in 14 for redundant आ. *c* So Vā-1, P-5, F., G., S.; P-2 corrects—रश्मिगौरैः into—रेणुगौरैः; I-8: मुखैश्चलत्कुण्डलरश्मिगौरैः in Bṛhaspati; but in Bharata प्रभामण्डलरश्मिगौरैः which is also the reading of Gopāla. *d* So Vā-1,

तासां च पश्चात् कनकप्रभाणां
काली कपालाभरणा चकाशे ।
बलाकिनी नीलपयोदराजिर्
दूरं पुरःक्षिप्तशतह्रदेव ।। ३९ ।।
ततो गणैः शूलभृतः पुरोगैर्
उदीरितो मङ्गलतूर्यघोषः ।
विमानशृङ्गाण्यवगाहमानः
शशंस सेवावसरं सुरेभ्यः ।। ४० ।।
उपाददे तस्य सहस्ररश्मिस्
त्वष्ट्रा नवं निर्मितमातपत्रम् ।
स तद्दुकूलादविदूरमौलिर्
बभौ वहन् गाङ्गमिव प्रवाहम् ।। ४१ ।।
मूर्ते च गङ्गायमुने तदानीं
सचामरे देवमसेविषाताम् ।
समुद्रगारूपविपर्ययेऽपि
सहंसपाते इव लक्ष्यमाणे ।। ४२ ।।

I-2, I-5, I-8; पद्माकरीचक्रु I-8 in Bharata, Gopāla, Bh., P-5 and majority; F. पद्मा·करं चक्रिरे—.

39. *b* Vā-1, H-3, H-4, B-1 चकासे. *c* I-8—राजी in Bharata and Gopāla; Mallinātha—राजिः; F. पयोदपंक्तिः. *d* Vā-3 दूरं परिक्षिप्तशतह्रदेव; I-8 दूर पुरःक्षिप्ततडिल्लतेव in Bṛhaspati, Bharata and Gopāla, while Mallinātha adheres to—शतह्रदेव.

40. *c* I-5, I-8 सुमेरुशृङ्गाण्य—in Bṛhaspati and Gopāla, while Mallinātha and Bharata read विमानशृङ्गाणि—.

41. *a* H-3, H-4 ममाददे—. *b* वनं नि P-4. *c* P-5—लादविभिन्नमौ— *d* So Vā-1, P-3, P-4, P-5, I-2, I-1, I-3, H-4, H-3, B-1; F. Bh. बभौ पतद्गङ्ग इवोत्तमाङ्गे; so G., S., T. (so P-2 with —गाङ्ग—) and I-8 with Mallinātha, Bṛhaspati, Bharata and Gopāla.

42 *a* H-3, H-4 पूते च (with comment).

तमन्वगच्छत् प्रथमो विधाता
श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।
जयेति वाचा महिमानमस्य
संवर्धयन्तौ हविषेव वह्निम् ।। ४३ ।।

एकैव मूर्तिर्बिभिदे त्रिधासौ
सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचिद्
वेधास्तयोस्तावपि धातुराद्यौ ।। ४४ ।।

तं लोकपालाः पुरुहूतमुख्याः
श्रीलक्षणोत्सर्गविनीतवेषाः ।
दृष्टिप्रदाने कृतनन्दिसंज्ञास्
तद्दर्शिताः प्राञ्जलयः प्रणेमुः ।। ४५ ।।

कम्पेन मूर्ध्नः शतपत्रयोनिं
वाचा हरिं वृत्रहणं स्मितेन ।
आलोकमात्रेण सुरानशेषान्
संभावयामास यथाप्रधानम् ।। ४६ ।।

तस्मै जयाशीः ससृजे पुरस्तात्
सप्तर्षिभिस्तान् स्मितपूर्वमाह ।
विवाहयज्ञे विततेऽत्र यूयम्
अध्वर्यवः पूर्ववृता मयेति ।। ४७ ।।

विश्वावसुप्राग्रहरैः प्रवीणैः
संगीयमानत्रिपुरावदानः ।

43. *a* F., Vā-3, G., S., Bh. तमभ्यग—; I-5 प्रथमं वि—. *d* P-4, P-5 समेधयन्तौ.

44. *a* P-4, P-5, F., G., S., T., Bh.—धा सा. *d* H-3, H-4, F., P-5 —रीड्यौ.

45. *b* H-3, H-4 श्रीलञ्छनो—; P-4 श्रीलक्षणोत्संगवि—.

47. *a* P-4 जयाशिः. *b* Vā-1—महर्षिभिस्तान्—. *d* Vā-3 पूर्वकृतां—.

अध्वानमध्वान्तविकारलङ्घ्यस्
ततार ताराधिपखण्डधारी ।। ४८ ।।
खे खेलगामी तमुवाह वाहः
सशब्दचामीकरकिंकिणीकः ।
तटाभिघातादिव लग्नपङ्के
धुन्वन् मुहुः प्रोतघने विषाणे ।। ४९ ।।
स प्रापदप्राप्तपराभियोगं
नगेन्द्रगुप्तं नगरं मुहूर्तात् ।
पुरोविलग्नैर्हरदृष्टिपातैः
सुवर्णसूत्रैरिव कृष्यमाणम् ।। ५० ।।
तस्योपकण्ठे घननीलकण्ठः
कुतूहलादुन्मुखपौरदृष्टः ।
स्वबाणचिह्नादवतीर्य मार्गाद्
आसन्नभूपृष्ठमियाय देवः ।। ५१ ।।
तमृद्धिमद्बन्धुजनाधिरूढैर्
वृन्दैर्गजानां गिरिचक्रवर्ती ।

48. *a* F. प्राग्रसरैः प्र—; H-3 प्राग्रयहरैः प्र—. *b* F.—नत्रिपुरापदानः; P-3, Vā-1—मानस्त्रिपुरावदानः (—वदाहः ?), H-3 संगीयमानत्रिपुरावदाहः (comment : त्रिपुराणामवदाहः भस्मकरः). *d* P-4 —धिपषण्डधारी; I-8 recording तारापतिखण्ड—as a variant.

49. *b* P-4, H-4—किंकणीकः. *c* I-5 तटप्रघातादिव; H-3, H-4 तटाविघाता—(comment : अविघातं ताडनं).

50. *c* P-5 पुरो विविग्नैर्हर—; Bṛhaspati in I-8 पुरो विलग्ने हरदृष्टिपात्रे (=ललाटे). *d* P-2, P-3, P-4, P-5, F., I-5, G., S., T., Bh. कृष्यमाणः.

51. *c* I-8 स्ववाहचिह्नादव—in Bṛhaspati (स्ववाहनं वृषः तेन चिह्नात्—), Bharata (स्ववाहचिह्नात् मार्गात्, कस्मिंश्चित् कल्पे हरस्य मेघो वाहनमासीत् अतएव मेघचिह्नमाकाशः; केचित्तु स्ववाहो वृषः स एव चिह्नं यस्य तदाकाशमित्याहुः तदसंगतम्) and Gopāla, but in Mallinātha स्वबाणचिह्नात्. *d* P-4—भूपृष्टिमि—.

प्रत्युज्जगामागमनप्रतीतः
प्रफुल्लवृक्षैः कटकैरिव स्वैः ॥ ५२ ॥
वर्गावुभौ देवमहीधराणां
द्वारे पुरस्योद्घटितापिधाने ।
समीयतुर्दूरविसर्पिघोषौ
भिन्नैकसेतू पयसामिवौघौ ॥ ५३ ॥
ह्रीमानभूद् भूमिधरो हरेण
त्रैलोक्यवन्द्येन कृतप्रणामः ।
पूर्वं महिम्ना स हि तस्य दूरम्
आवर्जितं नात्मशिरो विवेद ॥ ५४ ॥
स प्रीतियोगाद् विकसन्मुखश्रीर्
जामातुरग्रेसरतामुपेत्य ।
प्रावेशयन् मन्दिरमृद्धमेनम्
आगुल्फकीर्णापणमार्गपुष्पम् ॥ ५५ ॥
तस्मिन् मुहूर्ते पुरसुन्दरीणाम्
ईशानसंदर्शनलालसानाम् ।

52. *c* गमनप्रतीक्षः I-5, I-8 in Bṛhaspati, Bharata and Gopāla ; but Mallinātha—प्रतीतः (=हृष्टः); cp. तस्थौ वृषाङ्कागमनप्रतीक्षः 29.

53. *b* H-4—ताभिधाने. *d* Vā-1, I-5, I-8 मिवोघौ; Bharata records जलौघौ as a variant.

55. *a* H-3, H-4 न प्रीति—. *c* I-5, I-8 प्रावेशयन्मन्दिरमध्यमेनम् in Bharata and Gopāla; Mallinātha and Bṛhaspati not explaining ऋद्धम् or मध्यम्. *d* F. आगुल्भ—; I-2 माङ्गल्यकीर्णापणमार्गपुष्पम्; P-5 आगुल्फकीर्णाम्बरमार्गपुष्पम् (but comment: कीर्णापणमार्ग—); I-1 आगुल्पकीर्णान्तरपुष्पवर्षम्; I-5 आगुल्फपुष्पप्रकरावकीर्णम्; I-8 आगुल्फकीर्णान्तरपुष्पमार्गम्, not followed by any of the commentators who have: Mallinātha आगुल्फकीर्णापणपुष्पमार्गम्; Bṛhaspati आगुल्फमारोपितपुष्पमार्गम् which is adopted by Bharata and Gopāla.

प्रासादमालासु बभूवुरित्थं
त्यक्तान्यकार्याणि विचेष्टितानि ॥ ५६ ॥
आलोकमार्गं सहसा व्रजन्त्या
कयाचिदुद्वेष्टनवान्तमाल्यः ।
बद्धुं न संभावित एव तावत्
करेण रुद्धोऽपि हि केशपाशः ॥ ५७ ॥
प्रसाधिकालम्बितमग्रपादम्
आक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षाद्
अलक्तकाङ्कां पदवीं ततान ॥ ५८ ॥

56. *a* I-5 अस्मिन्. *d* I-1, B-1, I-5, I-8 मुक्तान्य—in text but त्यक्तान्यकार्याणि in the four commentators. *d* I-2 विचेष्टनानि.

57. *a* I-5 त्वरया व्रजन्त्या. *b* I-1, I-3—उद्वेष्ठभवान्त—; I-8 उद्वेष्टनवान्तमाल्यः in Bṛhaspati, Bharata and in the explanation offered by Gopāla while his reading is उद्वेष्टितवान्तमाल्यः. Mallinātha उद्वेष्टनवीतमाल्यः (= उद्गीर्णमाल्यः). *c* G. बन्धुं which is followed by Gopāla in I-8. P-4 वध्रेण सं—. *d* G. रुद्धोऽपि च; so Mallinātha in I-8; I-5, I-8 रुद्धोऽपि न केशपाशः in Bharata (बद्धुं न संभावित एव न पारित एव करेणापि न रुद्धो न धृतः केवलं विस्रस्तपतितोऽभूदित्यर्थः). Gopāla agrees with Mallinātha. He adds: केचित् पठन्ति—'करेण रुद्धोऽपि हि केशपाशः बद्धुं न संभावित एव तावत्' तदयुक्तम्; cp. Rv. VII, 6.

58. *b* Vā-3 आकृष्य काचि—(from "आक्षिप्य = आकृष्य" Mallinātha, Bharata, Gopāla). After this I-3 reads:

स्तनं धयन्तं तनयं विहाय कान्तं कुचापीडनलोलहस्तम् ।
तथैव कार्पासकमुद्वहन्ती ययौ तथान्या रभसा गवाक्षे ॥

P-3 modifies it as:

स्तनं धयन्तं तनयं विहाय विलोकनाय त्वरितं व्रजन्ती ।
संप्रस्नुताभ्यां (—प्रस्नुता) पदवीं सिसेच काचित् स्तनाभ्यां पयसागवाक्षात् ॥

विलोचनं दक्षिणमञ्जनेन
संभाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसंनिकर्षं
ययौ शलाकामपरा वहन्ती ॥ ५९ ॥
जालान्तरप्रेषितदृष्टिरन्या
प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण
हस्तेन तस्थाववलम्ब्य वासः ॥ ६० ॥
अर्धाचिता सत्वरमुत्थितायाः
पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद् रशना तदानीम्
अङ्गुष्ठमूलार्पितसूत्रशेषा ॥ ६१ ॥
तासां मुखैरासवगन्धगर्भैर्
व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः
सहस्रपत्राभरणा इवासन् ॥ ६२ ॥

•

I-1 reads:

प्रस्नापयन्ती पदवी स्तनाभ्यां सिसेच काचित् पयसागवाक्षात् ।

59. *b* I-1—वामनेत्रम्; cp. Rv. VII, 8.

60. Cp. Rv. VII, 9.

61. *a* P-4 अर्धाञ्चिता—. *b* So I-2, P-3; I-5 दुर्निमिता; P-5 दुर्निमितुं (comment: निधानं निक्षेपयेत्; may be—दुर्निमितं? adverbial use); F., Vā-1 दुर्नमिते; I-8 दुर्नमिते (=संभ्रमादुत्क्षिप्ते) in Mallinātha; दुर्निर्मिता (=एकत्रीकृता); दुर्निमिता? √*mī* 'fix') in Bṛhaspati and Bharata (दुर्निर्मिता बन्धनग्रन्थिरहिता) while Gopāla seems to follow दुर्निमिता; दुर्निमिते: correct from √*mī* 'fix'='ill-fixed'. *c* Vā-3, P-3, P-4, P-5, I-1, I-8 रसना; cp. Rv. VII, 10.

62. *a* P-4—गन्धिगर्भैः. *d* So all the MSS. except F. which reads —पत्रावरणा—; cp. Rv. VII, 11; XI, 93*d*.

तावत् पताकाकुलमिन्दुमौलिर्
उत्तोरणं राजपथं प्रपेदे ।
प्रासादशृङ्गाणि दिवापि कुर्वन्
ज्योत्स्नाभिषेकद्विगुणच्छवीनि ॥ ६३ ॥

तमेकदृश्यं नयनैः पिबन्त्यो
नार्यो न जग्मुर्विषयान्तराणि ।
तथा हि शेषेन्द्रियवृत्तिरासां
सर्वात्मना चक्षुरिव प्रविष्टा ॥ ६४ ॥

स्थाने तपो दुश्चरमेतदर्थम्
अपर्णया कोमलयाभितप्तम् ।
या दास्यमप्यस्य लभेत नारी
सा स्यात् कृतार्था किमुताङ्कशय्याम् ॥ ६५ ॥

63. P-3, P-5 reverse order of 63-64. *c* P-5 विमानशृङ्गाणि. *d* I-2 योत्स्ना—; B-1 ज्योत्स्नाभिषङ्गाद्द्वि—; H-4—भिषेकाद्द्वि—; Bh., G.—भिषेकद्विगुणद्युतीनि; P-3—द्विगुणत्सवीनि—; cp. Rv. VII, 4.

64. *a* F. ताः शंकरं दृष्टिभिरापिबन्त्यः; noted by Mallinātha as a variant. *c* P-4, P-5 तदाहि; B-1, Vā-3 तथाहि सर्वेन्द्रियवृत्ति—. *d* Bṛhaspati records विनोपघातेन खिलीबभूव as a variant explaining " उपघातेन आकस्मिकशब्दपातेन विना अन्येषां चक्षुषोऽन्येषामिन्द्रियाणां वृत्तिः खिलीभूतेति " खिलमप्रहतो वध इति भूरिः; Bharata: आसां शेषेन्द्रियवृत्तिः उपघातेन विष्टम्भेन रागादिविघ्नेन विना खिलीबभूव विफलीभूता; and so is Gopāla. Cp. Rv. VII, 12.

65. *a* Vā-3 दुष्कर—. *b* Bh. पेलवयापि तप्तम्; पेलवयाभितप्तम् F., I-8 but commentators—यापि तप्तम्. Gopāla reading पेलवया (=कोमलया); Vā-3, P-4 पेशलया पि—; cp. V, 21 तथाभितप्तं where MSS. misread—पि तप्तं—; P-2, I-2 read this śloka after न नूनमारूढरुषा (67).

परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां विफलोऽभविष्यत् ॥ ६६ ॥
न नूनमारूढरुषा शरीरम्
अनेन दग्धं कुसुमायुधस्य ।
व्रीडादमुं देवमुदीक्ष्य मन्ये
संन्यस्तदेहः स्वयमेव कामः ॥ ६७ ॥
अनेन संबन्धमवाप्य दिष्ट्या
मनोरथप्रार्थितमीश्वरेण ।
मूर्धानमालि क्षितिधारणोच्चम्
उच्चैस्तरं वक्ष्यति शैलराजः ॥ ६८ ॥
इत्योषधिप्रस्थविलासिनीनां
शृण्वन् कथाः श्रोत्रसुखास्त्रिनेत्रः ।

66. *a* P-5—स्पृहणीयरूपं. *d* So F., I-5, I-8 with the four commentators; others वितथो—for which cp. Rv. VII, 14.

67. *c* I-5 व्रीडावशादेनमुदीक्ष्य मन्ये; noted on margin by I-8 and recorded by Bharata as a variant. H-3, H-4 reverse the order of 66-67.

68. *a* F., G.—न्धमुपेत्य—; P-4 दृष्ट्या; so I-8 in text but दिष्ट्या in Bharata (=भाग्येन) and Gopāla (=पुण्येन); Bṛhaspati दृष्ट्या (दिष्ट्या?) हर्षेण भाग्येन वा. *c* मालि क्षितिपालनोच्चं Vā-1; I-8 मूर्धानमाक्रम्य महीधराणाम्, followed by Bṛhaspati, Bharata and Gopāla; Mallinātha explaining our reading even in I-8. *d* So F., G., S., Bh.; so Mallinātha expressly in I-8; उच्चैस्तरां justified by Bṛhaspati, Bharata and Gopāla.

केयूरचूर्णीकृतलाजमुष्टिं
हिमालयस्यालयमाससाद ।। ६९ ।।
ततोऽवतीर्याच्युतदत्तहस्तः
शरद्घनाद् दीधितिमानिवोक्ष्णः ।
क्रान्तानि पूर्वं कमलासनेन
कक्षान्तराण्यद्रिपतेर्विवेश ।। ७० ।।
तमन्वगिन्द्रप्रमुखाश्च देवाः
सप्तर्षिपूर्वाः परमर्षयश्च ।
गणाश्च गिर्यालयमभ्यगच्छन्
प्रशस्यमारम्भमिवोत्तमार्थाः ।। ७१ ।।
तत्रेश्वरो विष्टरभाग् यथावत्
सरत्नमर्घ्यं मधुमच्च गव्यम् ।

69. *a* Vā-1, P-2, P-4 इत्यौषधि—. *c* So F., G., S., T.; केयूरचूर्णीकृतलाजमुष्टिः Vā-1; I-5 केयूरचूर्णैः कृतलाजवृष्टिं; I-1 केयूरकर्णकृतलाजमुष्टिः; I-8 कर्पूरचूर्णीकृतलाजवृष्टिं; but Mallinātha कर्पूरचूर्णीकृतलाजमुष्टिं; Bṛhaspati कर्पूरचूर्णिकृतलाजवर्षं (=कर्पूरचूर्णीभिः कृतमभिनीतमर्थात् पौरनारीभिर्लाजानां वर्षं यत्र); Bharata कर्पूरचूर्णीकृतलाजवृष्टिं (recording लाजवर्षम् also) and Gopāla कर्पूरचूर्णीकृतलाजमुष्टिः recording कर्पूरचूर्णीकृतराजमार्गम् as a variant. MSS. differ in their order of ślokas as: I-2 न नूनमारूढरुषा; अनेन संबन्धमवाप्य; परस्परेण स्पृहणीयशोभं. So is Vā-3; P-3 परस्परेण—न नूनमारूढरुषा—इत्योषधिप्रस्थ—अनेन संबन्ध—; P-5 follows our order except that it puts 63 (तावत्पताका—) after इत्योषधि—. Cp. Rv. VII, 16.

70. *a* I-2, P-2, F., S., Bh. तत्रावतीर्या—. *d* F., S., G., P-3, P-5, Bh. कक्ष्यान्त—; cp. Rv. VII, 17.

71. *a* H-3 सर्वे महेन्द्रप्रमुखाश्च देवाः; I-8 तमन्वपीन्द्रप्र—but the four commentators follow our reading. *c* I-8, Bh. अन्वगच्छन्. *d* Vā-3, Bh. प्रशस्तमारम्भ—; I-5 यशःसमारम्भमिवोत्तमार्थाः; so I-8, followed only by Gopāla.

नवे दुकूले च नगोपनीते
प्रत्यग्रहीत् सर्वममन्त्रवर्जम् ॥ ७२ ॥
दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः ।
वेलासकाशं स्फुटफेनराजिर्
नवैरुदन्वानिव चन्द्रपादैः ॥ ७३ ॥
तया प्रवृद्धाननचन्द्रकान्त्या
प्रफुल्लचक्षुःकुमुदः कुमार्या ।
प्रसन्नचेतःसलिलः शिवोऽभूत्
संसृज्यमानः शरदेव लोकः ॥ ७४ ॥

72. *b* P-3—मर्घं; I-8—मघ्यं मधुपर्कहव्यम् in Bharata (=मधुपर्करूपं हव्यं देवभक्ष्यम्) and Gopāla; while Bṛ. reads मधुपर्कमिश्रम् which is the reading of Rv. VII, 18. *c* नगोपनीतं in Bh., F., G., S., T.; and Mallinātha in I-8, where Bṛhaspati follows नगोपनीते recording नगोपनीतं as a variant; followed by Bharata and Gopāla. *d* H-3—सर्वममन्त्रवाह्यम् (comment: न मन्त्रैर्वाह्यम्); G.—सर्वमतत्रवर्जम्; I-8 —सर्वममन्त्रवन्ध्यम्; followed by Bṛhaspati (=समन्त्रकं), Bharata (न मन्त्रेण वन्ध्यं रहितं) and Gopāla, while Mallinātha goes with our text. Cp. Rv. VII, 18.

73. *a* F. दुकूलवान् सोऽथ वधूसमीपं. *b* F., G., S., T.—धदक्षैः; cp. F. on III, 32; cp. Rv. VII, 19, VI, 20, 45 and VI, 45; B-1, I-5—धमुख्यैः; so I-8, followed by Bṛhaspati, Bharata and Gopāla, while Mallinātha adopts—अवरोधदक्षैः. *c* P-2, I-1, G. वेलासमीपं. *d* Bh. चन्द्रपादः.

74. *a* So F., G., S., T., I-2, I-5, I-8; Vā-1, H-3, H-4, B-1 विवृद्धा—. *d* P-2 on margin: संस्पृश्यमानः obviously as comment. I-8 शरदेव सिन्धुः, followed by Bṛhaspati and recorded by Bharata, who prefers शरदेव लोकः which alone is acceptable to Mallinātha. Gopāla reads संपूज्यमानः शरदेव सिन्धुः but adds: शरदेव लोकः इति च पाठः.

तयोः समापत्तिषु कातराणि
किंचिद्व्यवस्थापितसंहृतानि ।
ह्रीयन्त्रणामानशिरे मनोज्ञाम्
अन्योन्यलोलानि विलोचनानि ॥ ७५ ॥
तस्याः करं शैलगुरूपनीतं
जग्राह ताम्राङ्गुलिमष्टमूर्तिः ।
उमात्मना गूढतनोः स्मरस्य
तच्छङ्किनः पूर्वमिव प्ररोहम् ॥ ७६ ॥
रोमोद्गमः प्रादुरभूदुमायाः
स्विन्नाङ्गुलिः पुंगवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन
समं विभक्तेव मनोभवस्य ॥ ७७ ॥
प्रयुक्तपाणिग्रहणं यदन्यद्
वधूवरं पुष्यति कान्तिमग्र्याम् ।
सांनिध्ययोगादनयोस्तदानीं
किं कथ्यते श्रीरुभयस्य तस्य ॥ ७८ ॥
प्रदक्षिणप्रक्रमणात् कृशानोर्
उदर्चिषस्तन् मिथुनं चकाशे ।

75. *c* P-5—णामन्वभवन् मनोज्ञाम्; ह्रीयन्त्रणां तत्क्षणमन्वभूवन् F., Bh., P-2, G., S., T., I-8, followed by the four commentators. Cp. Rv. VII, 25.

76. *c* F., G., S., T., Bh., I-8 उमातनौ, followed by the four commentators. Cp. Rv. VII, 15.

77. *d* P-4, I-5, I-8 मनोभवेन but Mallinātha, Bṛhaspati and Bharata explain मनोभवस्य. Cp. Rv. VII, 22.

78. *c* I-8—योगादुभयो—, followed by Bṛhaspati and Gopāla while Mallinātha and Bharata have अनयोः. *d* P-4, P-5, B-1 कथ्यतां.

मेरोरुपान्तेष्विव वर्तमानम्
अन्योन्यसंसक्तमहस्त्रियामम् ॥ ७९ ॥
तौ दंपती त्रिः परिणीय वह्निम्
अन्योन्यसंस्पर्शनिमीलिताक्षौ ।
स कारयामास वधूं पुरोधास्
तस्मिन् समिद्धार्चिषि लाजमोक्षम् ॥ ८० ॥
सा लाजधूमाञ्जलिमिष्टगन्धं
गुरूपदेशाद् वदनं निनाय ।
कपोलसंसर्पिशिखः स तस्या
मुहूर्तकर्णोत्पलतां प्रपेदे ॥ ८१ ॥
तदीषदार्द्रारुणगण्डलेखम्
उच्छ्वासिकालाञ्जनरागमक्ष्णोः ।
वधूमुखं क्लान्तयवावतंसम्
आचारधूमग्रहणाद् बभूव ॥ ८२ ॥
वधूं द्विजः प्राह तवैष वत्से
वह्निर्विवाहं प्रति पूर्वसाक्षी ।

79. *a* I-8 प्रदक्षिणं प्रक्र—, not followed by the four commentators. *b* Vā-1 चकासे; I-8 बभासे in Mallinātha, and implied by Bṛhaspati; Bharata and Gopāla चकाशे. *d* I-5—न्यसंयुक्त—; I-6—न्यसंत्यक्तम—. Cp. Rv. VII, 24.

80. *a* F. परिणिय्य, a common practice in F. *b* P-4—ह्निं कराग्र-संस्पर्श—; so P-5; I-8—Bṛhaspati—संपर्कनि—; cp. III, 36 भृङ्गेण संस्पर्शनिमीलिताक्षीं. *d* Vā-1 लाजहोमम्; cp. लाजविसर्गमग्नौ, Rv. VII. 25 लाजमोक्षम्. Cp. Rv. VII, 25.

81. *a* Vā-3—गन्धिं (comment: गन्धं). *c* P-4—संस्पर्शिशिखः; I-8 —शिखं in text;—शिखः in commentaries = Rv. VII, 26.

82. *a* I-8 तदीषदार्द्रगुरुगण्डलेखं, not followed by any commentator; for Mallinātha and Bṛhaspati follow our reading, while Bharata and Gopāla adopt तदीषदार्द्रागुरुपत्रलेखं = Rv. VII, 27.

शिवेन भर्त्रा सह धर्मचर्या
कार्या त्वयामुक्तविचारयेति ॥ ८३ ॥
आलोचनान्तं श्रवणौ वितत्य
पीतं गुरोस्तद् वचनं भवान्या ।
निदाघकालोल्बणभेदयेव
माहेन्द्रमम्भः प्रथमं पृथिव्या ॥ ८४ ॥
ध्रुवेण भर्त्रा ध्रुवदर्शनाय
प्रयुज्यमाना प्रियदर्शनेन ।
सा दृष्ट इत्याननमुन्नमय्य
ह्रीसन्नकण्ठी कथमप्युवाच ॥ ८५ ॥
इत्थं विधिज्ञेन पुरोहितेन
प्रयुक्तपाणिग्रहणोपचारौ ।
प्रणेमतुस्तौ पितरौ प्रजानां
पद्मासनस्थाय पितामहाय ॥ ८६ ॥

83. *a* I-5—तवैष पुत्रि. *b* F., G., S., T., Bh.—कर्मसाक्षी—; so I-8 in Mallinātha but पूर्वसाक्षी—in Bṛhaspati, Bharata (who notes कर्मसाक्षी) and Gopāla. *d* I-8 युक्तविचारयेति in Bharata and Mallinātha (can be read as मुक्त—); Bṛhaspati: त्वयामुक्तविचारयेति (—या+आ—) citing "आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापि लब्धवत्"; Bharata notes कार्या त्वया नात्र विचारणेति as a variant.

84. So Vā-1, P-2, P-3, I-2 and Mallinātha in I-8; P-4 आलोचनं तत् श्रवणौ वितत्य; P-5 आलोचनाच्छ्रवणौ वितत्य; आलोचनान्तं श्रवणे विवृत्य Vā-3, F., I-3, B-1, I-8 in Bṛhaspati, आलोचनान्तं श्रवणे वितत्य (Bh.) in Bharata. *c* —सप्तयेव Vā-1, P-2, I-2; Vā-3—ल्बणखेदयेव (comment: तापया—खेदया); F., Bh., G., S., T., P-4, P-5, I-3, I-8—ल्बणतापयेव in Mallinātha; Bṛhaspati and Bharata, निदाघकालोल्लल (ल्बण?) भेदयेव (="ग्रीष्मसमये उल्ललो महान् भेदो विदारणं यस्याः तया"). For the apt use of उल्बण cp. उल्बणो मार्गः Rv. IV, 33.

85. *c* I-3, I-5, I-8 दृष्टम् in Bṛhaspati and Bharata.

वधूर्विधात्रा प्रतिनन्द्यते स्म
कल्याणि वीरप्रसवा भवेति ।
वाचस्पतिः सन्नपि सोऽष्टमूर्ताव्
आशास्यचिन्तास्तिमितो बभूव ॥ ८७ ॥
क्लृप्तोपचारां चतुरस्रवेदीं
तावेत्य पश्चात् कनकासनस्थौ ।
जायापती लौकिकमेषितव्यम्
आर्द्राक्षतारोपणमन्वभूताम् ॥ ८८ ॥
पत्रान्तलग्नैर्जलबिन्दुवृन्दैर्
आकृष्टमुक्ताफलजालशोभम् ।
तयोरुपर्यायतनालदण्डम्
आधत्त लक्ष्मीः कमलातपत्रम् ॥ ८९ ॥
द्विधा प्रयुक्तेन च वाङ्मयेन
सरस्वती तन्मिथुनं नुनाव ।
संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन ॥ ९० ॥
तौ संधिषु व्यञ्जितवृत्तिभेदं
रसान्तरेषु प्रतिभिन्नरागम् ।

87. *d* Bh., G. मूर्तौ त्वाशास्य—. Bharata—आशास्यचिन्तया आशंसनीयचिन्तया स्तिमितः.

88. *a* P-5—पकारां; F. चतुरश्रवेदीं; P-4, P-5 चतुरन्तवेदी. *b* I-8 उपेत्य पश्चात् but comment: एत्य. *c* Bh., F.—मेषणीय—. *d*=Rv. VII, 28*d*.

89. *a* P-4—बिन्दुबन्धैः; Vā-3, G., F., Bh., S., T.—बिन्दुजालैः; so I-8 in Bharata and Mallinātha, though the text has—बिन्दुवृन्दैः which is followed by Gopāla. *b* Vā-3 —मुक्ताफलभक्ति—.

अपश्यतामप्सरसां मुहूर्तं
प्रयोगमाद्यं ललिताङ्गहारम् ॥ ९१ ॥
देवास्तदन्ते हरमूढभार्यं
किरीटबद्धाञ्जलयो निपत्य ।
शापावसानप्रतिपन्नमूर्तेर्
ययाचिरे पञ्चशरस्य सेवाम् ॥ ९२ ॥
तस्यानुमेने भगवान् विमन्युर्
व्यापारमात्मन्यपि सायकानाम् ।
काले प्रयुक्ता खलु कार्यविद्भिर्
विज्ञापना भर्तृषु सिद्धिमेति ॥ ९३ ॥

91. *b* Bh., I-8 प्रतिबन्धरागम् (प्रतिबद्ध ?) in Mallinātha; प्रतिभिन्नरागम् in Bṛhaspati and Bharata for which cp. VII, 7*b*; majority प्रतिबद्धरागम्. *d* P-5—ङ्गरागम् (comment:—ङ्गहारम्).

92. *b* P-4—टदत्ता—; so I-8 in Bṛhaspati and Bharata. *c* Bh., I-8, G., S.—वसाने; but the compound may as well be resolved: शापावसानात् (=कारणात्) प्रति—? Vā-1—प्रतिलब्धमूर्ते—. Bharata: इतः परं यत् श्लोकत्रयं क्वचित् पुस्तके दृश्यते तट्टीकाकृद्भिरव्याख्यातम् ।

93. *b* P-3 सेवकानाम्. *c* So Vā-1; others कालप्र—; Vā-1 कालविद्भिः. After this I-3, P-3 add:

देवेशसंपादितचारुमूर्तिस्तत्संसदि प्रादुरभूत् स कामः ।
लक्ष्यीकृतं शंकरमेव भूयो विध्यन् शरैः पुष्पमयैरमोघैः ॥

P-5 reads before 94:

ततः परं तत्र गिरीशनाथो
यथाप्रधानं त्रिदिवेश्वराणाम् ।
चकार रत्नैः पृथगर्घणां स
मेनोपनीतां विधिवत् प्रणम्य ॥

After this I-1 adds 4 ślokas:

तं प्रेक्ष्य चक्रीकृतचारुचापम्
अत्यन्तसंभावितदेवकार्यम् ।

अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण ।
कनककलशरक्षाभक्तिशोभासनाथं
क्षितिविरचितशय्यं कौतुकागारमागात् ।। ९४ ।।
नवपरिणयलज्जाभूषणां तत्र गौरीं
वदनमपहरन्तीं तत्कृतोत्क्षेपमीशः ।

ब्रह्मादयः साध्विति देवसंघाः
प्रीत्या मुहुः प्राहुरिति स्तुवन्त. ।। ९७ ।।
पुष्पेषुमतेव (मेतं च) रतिर्विलोक्य
पूर्वोक्तवाक्प्रत्ययकालजातम् ।
हृत्प्रेमसंहर्षविमूढभावात्
किंकिं न कुर्यामिति नाभ्यजानात् ।। ९८ ।।
चेतोभवश्चाप्युपलब्धसञ्ज्ञो
वागीश्वरादीनभिवीक्ष्य देवान् ।
बद्धाञ्जलिर्न्यस्तशरासनेषु
भूमौ प्रणामेन ततः पपात ।। ९९ ।।
ते तं समुत्थाप्य कृतप्रणामं
रतिं वियोगाभिकृशां च तेन ।
संयोज्य पूजां प्रतिचक्रुरस्य
सत्कार्मुकस्या . . . . ।।

All these ślokas have, however, been scored off. 93 has all the four comments.

94. F., I-5, P-5 आदधानः. *c* Vā-1 रक्षा; I-1 corrects रक्षा into युक्तं; I-8: Bṛhaspati ("कनकस्य कलशो यत्र कक्षायाः प्रकोष्ठस्य भक्त्या या शोभा तया सनाथं परमैश्वर्ययुक्तम्") and Bharata (कनककलशस्य, कक्षायाः प्रकोष्ठस्य, भक्तेर्विभागस्य च या शोभा तया सनाथम्) adopt—कक्षा—, but the original reading seems to be—रक्षा-भक्ति = "decorative drawings meant for protection from evil". Majority (with Bh.): कनककलशयुक्तं भक्तिशोभासनाथम्.

अपि शयनसखीभ्यो दत्तवाचं कथंचित्
प्रमथमुखविकारैर्हासयामास गूढम् ।। ९५ ।।

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ गौरीविवाहवर्णनं नाम सप्तमः सर्गः ।।

95. *b* So Vā-1, P-4, P-5, I-2; P-2, I-1, I-3, G., S., T., Bh., F. तत्कृताक्षेपम्; so I-8 in Mallinātha (—तेन कृताक्षेपं कृताकर्षण-मुन्नीतं वदनम्); but तर्किताक्षेपम् in Bṛhaspati (=ईषद्व्यक्ताक्षेपं यथा स्यात्तथा), Bharata (तर्कितोऽनुमितो अर्धादीशकर्तृक आक्षेपो यत्र तादृशं यथा स्यात्तथा) and Gopāla (ईषद्व्यक्ताक्षेपं यथा स्यात्तथा). *d* So F. with majority; Vā-1, B-1 प्रथममुखविकारैः; so I-8 in Bṛhaspati, Bharata and Gopāla; I-5 प्रमथसुखविहारैः; I-1, I-3 प्रमथसुखविकारैः.

Colophon varies: I-1, I-5, I-3, I-8, Bh. उमापरिणयो नाम...; I-2...उमापाणिग्रहणो नाम...; B-1...गौरीविवाहो नाम... ।

।। अष्टमः सर्गः ।।

पाणिपीडनविधेरनन्तरं
शैलराजदुहितुर्हरं प्रति ।
भावसाध्वसपरिग्रहादभूत्
कामदोहृदमनोहरं वपुः ।। १ ।।
व्याहृता प्रतिवचो न संदधे
गन्तुमैच्छदवलम्बितांशुका ।
सेवते स्म शयनं पराङ्मुखी
सा तथापि रतये पिनाकिनः ।। २ ।
कैतवेन शयिते कुतूहलात्
पार्वती प्रतिमुखं निपातितम् ।
चक्षुरुन्मिषति सस्मितं प्रिये
विद्युदाहतमिव न्यमीलयत् ।। ३ ।।
नाभिदेशनिहितः सकम्पया
शंकरस्य रुरुधे तया करः ।
तन्नितम्बमथ चाभवत् स्वयं
दूरमुच्छ्वसितनीविबन्धनम् ।। ४ ।।
एवमालि निगृहीतसाध्वसं
शंकरो रहसि सेव्यतामिति ।

1. *d* F. कामदोहृदमुखं मनोहरम् with no variants noted; T. agrees with it; P-5 कामदोहृदमुखं मनोहरम् (comment: कामदोहृदेन मन्मथाभिलाषेण मुखं (सुखं ?)).
2. *b* P-5—दविलम्बि—.
3. *a* P-2, P-3, Bh. शयने. *b* P-2 पार्वतीं. *c* P-2 प्रियो. *d* S. विद्युताहत—; P-5 विद्युतेव पिहितं न्य—.
4. *b* F. रुरुधे करस्तया. *c* So P-5; T. तन्नितम्बमभवत्तदा स्वयं; others (with Bh.) तद्दुकूल—.

सा सखीभिरुपदिष्टमाकुला
नास्मरत् प्रमुखवर्तिनि प्रिये ।। ५ ।
अप्यवस्तुनि कथाप्रवृत्तये
प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिगृह्य पार्वती
मूर्धकम्पमयमुत्तरं ददौ ।। ६ ।।
शूलिनः करतलद्वयेन सा
संनिरुध्य नयने हृतांशुका ।
तस्य पश्यति ललाटलोचने
मोघयत्नविधुरा रहस्यभूत् ।। ७ ।।
चुम्बनेष्वधरदानवर्जितं
सन्नहस्तमदयोपगूहने ।
क्लिष्टमन्मथमपि प्रियं प्रभोर्
दुर्लभप्रतिकृतं वधूरतम् ।। ८ ।।
यन्मुखग्रहणमक्षताधरं
दत्तमव्रणपदं नखं च यत् ।
यद्रतं च सदयं हरस्य तत्
पार्वती विषहते स्म नेतरत् ।। ९ ।।
रात्रिवृत्तमनुयोक्तुमुद्यतं
सा विभातसमये सखीजनम् ।

6. *c* So Vā-1, T., F.; others परिवीक्ष्य.

7. *d* P-3 मोघवृत्तिविधुरा.

8. *a* P-2—ने त्वधर—. *b* S. खिन्नहस्तसदयोपगूहनम्; स्विन्न—?; cp. VI, 44*c*. *c* F. विमोर्दु—. *d* F. वधूकृतम्; Bh. दुर्लभं प्रतिकृतं वधूरतम्; cp. Rv. XIX, 27.

9. *b* P-1, S. दानमव्रणपदं नखस्य यत्. *c* F., S., Bh. प्रियस्य तत्. *d* P-5 नेतरम्.

नाकरोदपकुतूहलं ह्रिया
शंसितुं तु हृदयेन तत्वरे ॥ १० ॥
दर्पणे च परिभोगदर्शिनी
पृष्ठतः प्रणयिनो निषेदुषः ।
प्रेक्ष्य बिम्बमनु बिम्बमात्मनः
कानि कानि न चकार लज्जया ॥ ११ ॥
नीलकण्ठपरिभुक्तयौवनां
तां विलोक्य जननी समाश्वसत् ।
भर्तृवल्लभतया हि मानसीं
मातुरस्यति शुचं वधूजनः ॥ १२ ॥
वासराणि कतिचित् कथंचन
स्थाणुना पदमकार्यत प्रिया ।
ज्ञातमन्मथरसा शनैःशनैः
सा मुमोच रतिदुःखशीलताम् ॥ १३ ॥
सस्वजे प्रियमुरोनिपीडिता
प्रार्थितं मुखमनेन नाहरत् ।
मेखलाप्रणयलोलतां गतं
हस्तमस्य शिथिलं रुरोध सा ॥ १४ ॥
भावसूचितमदृष्टविप्रियं
चाटुमत् क्षणवियोगकातरम् ।
कैश्चिदेव दिवसैस्तयोस्तथा
प्रेम रूढमितरेतराश्रयम् ॥ १५ ॥

10. *b* S. प्रभातसमये. *c* F. प्रिया. *d* F. हृदयेन तत्परा; Bh. शंसितुं च हृदयेन तत्वरे.
11. *c* F. बिम्बमुपबिम्ब—. *d* S., T. कानि कान्यपि चकार—.
12. *b* T., G., Bh. समाश्वसीत्.
13. *b* S. स्थाणुना रतमकारि चानया. *d* P-4, Bh.—रतदुःख—.
14. *a* S.—मुरोनिपीडनं; Bh.—उरोनिपीडितं. *c* F. मेघला.
15. *b* So Vā-1, F., G.; T. चाटु तत्क्षण—; S. दाढर्यभाक्क्षण—. *c* T., Bh., Vā-1 तयोस्—तदा.

तं यथात्मसदृशं वरं वधूर्
अन्वरज्यत वरस्तथैव ताम् ।
सागरादनपगा हि जाह्नवी
सोऽपि तन्मुखरसैकनिर्वृतिः ॥ १६ ॥

शिष्यतां निधुवनोपदेशिनः
शंकरस्य रहसि प्रपन्नया ।
शिक्षितं युवतिनैपुणं तया
यत्तदेव गुरुदक्षिणीकृतम् ॥ १७ ॥

दष्टमुक्तमधरोष्ठमम्बिका
वेदनाविधुतपाणिपल्लवा ।
शीतलेन निरवापयत् क्षणं
मौलिचन्द्रशकलेन शूलिनः ॥ १८ ॥

चुम्बनादलकचूर्णरूषितं
शंकरोऽपि नयनं ललाटजम् ।
उच्छ्वसत्कमलगन्धये ददौ
पार्वतीवदनगन्धवाहिने ॥ १९ ॥

एवमिन्द्रियसुखस्य वर्त्मनः
सेवनादनुगृहीतमन्मथः ।

16. *d* S. तन्मुखरसैकवृत्तिभाक्.

17. *a* F. निधुवरोप—. *d* T. तत् तदेवगुरु—.

18. *a* Bh. अधरौष्ठ—. *b* S., P-5—हस्तपल्लवा.

19. So G., F.; Vā-1, P-2, P-3, P-5, T.—चूर्णदूषितं (op. 64 —भोगदूषितं). *b* F.—रोऽथ. *c* P-4 उत्स्वसत्—. *d* F.—गन्धवादिने. Bh.:

उच्छ्वसत्कमलगन्धये ददौ
पार्वतीवदनगन्धवाहिने ।
चुम्बनादलकचूर्णदूषितं
शंकरोऽपि नयनं ललाटजम् ॥

शैलराजभवने सहोमया
मासमात्रमवसद् वृषध्वजः ॥ २० ॥
सोऽनुमन्त्र्य हिमवन्तमात्मभूर्
आत्मजाविरहदुःखपीडितम् ।
तत्र तत्र विजहार संपतन्
अप्रमेयगतिना ककुद्मता ॥ २१ ॥
मेरुमेत्य मरुदाशुवाहनः
पार्वतीस्तनपुरस्कृतः कृती ।
हेमपल्लवविभङ्गसंस्तरान्
अन्वभूत् सुरतमर्दनक्षमान् ॥ २२ ॥
पद्मनाभवलयाङ्कितारमसु
प्राप्तवत्स्वमृतविप्रुषो नवाः ।
मन्दरस्य कटकेषु चावसत्
पार्वतीवदनपद्मषट्पदः ॥ २३ ॥
रावणध्वनितभीतया तया
कण्ठसक्तघनबाहुबन्धनः ।

20. *a* T.—सुखस्य चात्मनः.

21. *a* So Vā-1, T.; F., P-3, P-4, P-5, G., S., Bh. सोऽनुमान्य. *b* S.—विरहदुःखखेदितम्. *c* G., Bh. संचरन्.

22. *a* Bh. as ours; F. मेरुमत्सु मरुदा—; P-1 मेरुमेत्य मरुदाशुगोक्षकः (—गोक्षकः ?); S.—मरुदाशुगोक्षकः (=आशुगः उक्षा यस्य). *b* So Vā-1, F., Bh., G., T.; others—पुरस्कृतान्. *c* and *d*: So Vā-1, T., S.; F., G., P-5 हेमपल्लवविभङ्गसंस्तरामन्वभूत् सुरततत्परः क्षपाम् (so Bh. except in हैम—); P-2—सुरततत्पुरःक्षिपम् (=सुरते तां पुरः क्षिप्त्वा ?).

23. *a* S., T., Bh.—नामचरणाङ्किताश्मसु. *b* P-2 नवान्. *c* Vā-1 —चावसत्. *d* F. सुप्रियावदन—.

एकपिङ्गलगिरौ जगद्गुरुर्
निर्विवेश विशदाः शशिप्रभाः ।। २४ ।।
तस्य जातु मलयस्थलीरतेर्
धूतचन्दनवनः प्रियाक्लमम् ।
आचचाम सलवङ्गकेसरश्
चाटुकार इव दक्षिणानिलः ।। २५ ।।
हेमतामरसताडितप्रिया
तत्कराम्बुविनिमीलितेक्षणा ।
खे व्यगाहत तरङ्गिणीमुमा
मीनपङ्क्तिपुनरुक्तमेखला ।। २६ ।।
तां पुलोमतनयालकोचितैः
पारिजातकुसुमैः प्रसाधयन् ।
नन्दने चिरमयुग्मलोचनः
सस्पृहं सुरवधूभिरीक्षितः ।। २७ ।।
इत्यभौममनुभूय शंकरः
पार्थिवं च वनितासखः सुखम् ।
लोहितायति कदाचिदातपे
गन्धमादनवनं न्यवर्तत ।। २८ ।।
तत्र काञ्चनशिलातलाश्रयो
नेत्रगम्यमवलोक्य भास्करम् ।

24. *a* T. वारणस्वनित for ध्वनित; others रावणध्वनित—. *b* So Vā-1 ; S.—सक्तदृढबाहु—; F., G., T., Bh.—सक्तमृदुबाहु—; P-2—बन्धनम्. Ellora represents Rāvaṇa shaking Kailāsa.

25. *a* Bh.—मलयस्थलीरते (no *visargas*). *b* So T.; others —धूतचन्दनलतः. *c* T.—केशर—; Bh.—सतुषारशीतलः.

26. *a* Bh. हैमताम—. *c* T. सा व्यगाहत (cp. I-1). *d* Bh.—मेखलाम्.

27. *d* So F., T., S., G.; Vā-2—वधूभिरैक्ष्यत.

28. *b* P-2, P-3, S. दयितासखः. *d* So Vā-2, P-3, P-4, G., S., Bh.; P-2, P-5—मादनगिरिं न्यवर्तत; T.—मादनवनं व्यगाहत.

दक्षिणेतरभुजव्यपाश्रयां
व्याजहार सहधर्मचारिणीम् ॥ २९ ॥
पद्मकान्तिमरुणत्रिभागयोः
संक्रमय्य तव नेत्रयोरिव ।
संक्षये जगदिव प्रजेश्वरः
संहरत्यहरसावहर्पतिः ॥ ३० ॥
शीकरव्यतिकरं मरीचिभिर्
धूनयत्यवनते विवस्वति ।
इन्द्रचापपरिवेषशून्यतां
निर्झरास्तव पितुर्व्रजन्त्यमी ॥ ३१ ॥
दष्टतामरसकेसरत्यजोः
क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नयोः सरसि चक्रवाकयोर्
अल्पमन्तरमनल्पतां गतम् ॥ ३२ ॥
स्थानमाह्निकमपास्य दन्तिनः
सल्लकीविटपभङ्गवासितम् ।
आविभातचरणाय गृह्णते
वारि वारिरुहबद्धषट्पदम् ॥ ३३ ॥
पश्य पश्चिमदिगन्तलम्बिना
निर्मितं मितकथे विवस्वता ।

29. *a* P-4 काञ्चनगुहाशिलाश्रयो; others—तलाश्रये.

30. *a* T.—मरुणान्तभागयोः. *b* P-1 सगमय्य तव.

31. *a* Vā-1 शीकरद्युतिकरं; G., S. सीकरव्यतिकरं. *b* So T.; others दूर—. *c* Vā-1—परिवेश—. *d* T., Vā-2 निर्झराः प्रसवितुर्व्रजन्ति ते.

32. *a* Vā-1—केशर—; T. दष्टतामरसकेसरस्रजो; so Vā-2, S. *b* P-3, Bh. क्रन्दतोर्विरहदीनकण्ठयोः. *c* T., Bh. भिन्नयोः सरसि. *d* So MSS.; Vā-1—रल्पमम्बरम—; cp. note on 39.

33. *a* T. शल्लकी. *c* T. आविभाति शरणाय गच्छतो; P-1 साध्यकर्मविषयेऽनुगृह्णते.

दीर्घया प्रतिमया सरोऽम्भसां
तापनीयमिव सेतुबन्धनम् ।। ३४ ।।
उत्तरन्ति विनिकीर्य पल्वलं
गाढपङ्कमतिवाहितातपाः ।
दंष्ट्रिणो वनवराहयूथपा
दष्टभङ्गुरबिसाङ्कुरा इव ।। ३५ ।।
एष वृक्षशिखरे कृतास्पदो
जातरूपरसबर्हमण्डलः ।
हीयमानमहरत्ययातपं
पीवरोरु पिबतीव बर्हिणः ।। ३६ ।।
पूर्वभागतिमिरप्रवृत्तिभिर्
व्यक्तपङ्कमिव जातमेकतः ।
खं हृतातपजलं विवस्वता
भाति किंचिदिव शेषवत्सरः ।। ३७ ।।
आविशद्भिरुटजाङ्गणं मृगैर्
मूलसेकसरसैश्च वृक्षकैः ।
आश्रमाः प्रविशदग्रचधेनवो
बिभ्रति श्रियमुदीरिताग्नयः ।। ३८ ।।

34. *b* P-4 मितकथं; Vā-2, T. कथमिदं. *c* S. लब्धया प्रति—; F.—म्भसा—.

35. *b* P-4—पङ्कविनिवारितातपाः. *d* Vā-1—विशा—; F., Bh. —विसा—.

36. *b* So F. , S., Vā-1, Vā-2, P-3, P-4, Bh. जातरूपरसगौरमण्डलम्; T., P-2 जातरूपरसगौरमण्डलः; cp. Mallinātha in G.: जातरूपरसगौरमण्डलः आतपरूषणात् काञ्चनद्रववदरुणबर्हमण्डलः, which may support F. *c* F. ह्रियमाण—.

37. *b* So Vā-1, F., S. ; T. लग्नपङ्क—. *d* Vā-1 शेषवत्.

38. *a* P-2, B-3 आवसद्भि—; Vā-2—ङ्गणे; Bh. आविशद्भिरुटजाङ्गनं—. *c* So S. ; P-1—शदग्न्यधेनवो (—दग्रच ?); Vā-1, F., T., Bh., P-2, P-3—शदग्निधेनवो; cp. अग्निपरिमेयरश्मिना in 40.

बद्धकोशमपि तिष्ठति क्षणं
सावशेषविवरं कुशेशयम् ।
षट्पदाय वसतिं ग्रहीष्यते
प्रीतिपूर्वमिव दातुमन्तरम् ।। ३९ ।।
दूरमग्निपरिपेयरश्मिना
वारुणी दिगरुणेन भानुना ।
भाति केसरवतेव मण्डिता
बन्धुजीवतिलकेन कन्यका ।। ४० ।।
सामभिः सहचराः सहस्रशः
स्यन्दनाश्वहृदयंगमस्वरैः ।
भानुमग्निपरिकीर्णतेजसं
संस्तुवन्ति किरणोष्मपायिनः ।। ४१ ।।
सोऽयमानतशिरोधरैर्हयैः
कर्णचामरविघट्टितेक्षणैः ।
अस्तमेति युगभुग्नकेसरैः
संनिधाय दिवसं महोदधौ ।। ४२ ।।
खं प्रसुप्तमिव संस्थिते रवौ
तेजसो महत ईदृशी गतिः ।

39. *d* S. records उत्तरम् as a variant. Note Vā-1 अम्बरम् for अन्तरम् in 32.

40. *a* So Bh.; F. दूरमग्रपरिमेयरश्मिना; P-1, P-3, S.—मग्रपरिमेयरश्मिना; Vā-1, T. (दूरमग्निपरिमेयरश्मिना अग्निना परिमेया रश्मयो यस्य तेन); cp. Aitareya Br. 8, 28, 9–10 "the sun, while setting, enters into fire", and Ṛv. V, 37, 1 and note on 38. *c* Vā-1 केशर—. *d* Vā-2—जीवकुसुमेषु क—; T.—जीवकुसुमेन—.

41. *a* and *b*: So Vā-1, F.; So T.—शो वन्दनैश्च हृदयंगमस्वनैः. *c* P-4—मग्निविनिकीर्ण—.

42. F. सोमयानत—; T. सोऽयमानतशिरोरुहैर्हयैः. *c* F. युगभुग्मकेसरैः; Vā-1, P-3 युगभग्नकेशरैः.

तत् प्रकाशयति यावदुद्गतं
मीलनाय खलु तावतश्च्युतम् ।। ४३ ।।
संध्ययाप्यनुगतं रवेर्वपुर्
वन्द्यमस्तशिखरे समर्पितम् ।
येन पूर्वमुदये पुरस्कृता
नानुयास्यति कथं तमापदि ।। ४४ ।।
रक्तपीतकपिशाः पयोमुचां
कोटयः कुटिलकेशि भान्त्यमूः ।
द्रक्ष्यसि त्वमिति संधिवेलया
वर्तिकाभिरिव साधु मण्डिताः ।। ४५ ।।
सिंहकेसरसटासु भूभृतां
पल्लवप्रसविषु द्रुमेषु च ।
पश्य धातुशिखरेषु भानुना
संविभक्तमिव सांध्यमातपम् ।। ४६ ।।
पार्ष्णिमुक्तवसुधास्तपस्विनः
पावनाम्बुरचिताञ्जलिक्रियाः ।

43. *c* F. यावदुत्थितं; P-4 तावदुद्गतं; P-2 यावदुद्गतैः. *d* T. तावताच्यु—.

44. *a* and *b*: Vā-2, T. रवेः पदं धर्ममस्त—. *c* F. प्राक् तथेयमुदये पुरस्कृता, which is followed by Mallinātha.

45. *c* F. त्वमिति वेलयानया; S.—संध्ययानया; P-3, Bh., G. —सांध्यवेलया. *d* Vā-2, T. वर्णिकाभिरिव—; F., P-2, G., P-4, Bh. साधु वर्तिताः (T. = उत्पादिताः Mallinātha); P-3 वर्णिताम्; P-2 वर्णिता.

46. *a* Vā-1—केशर—; F. भूभृता प—(भूभृता अद्रिणा Mallinātha). *b* F.—द्रिमेषु च. *c* P-4—शिखरे विवस्वता; F., G.—रेषु चात्मना; T. चात्मनः; Bh. पश्य चास्तशिखरे विवस्वता.

ब्रह्म गूढमभिसंध्यमादृताः
शुद्धये विधिविदो गृणन्त्यमी ॥ ४७ ॥
तन्मुहूर्तमनुमन्तुमर्हसि
प्रस्तुताय नियमाय मामपि ।
त्वां विनोदनिपुणः सखीजनो
वल्गुवादिनि विनोदयिष्यति ॥ ४८ ॥
निर्विभुज्य दशनच्छदं ततो
वाचि भर्तुरवधीरणापरा ।
शैलराजतनया समीपगाम्
आललाप विजयामहेतुकम् ॥ ४९ ॥
ईश्वरोऽपि दिवसात्ययोचितं
मन्त्रपूर्वमनुतस्थिवान् विधिम् ।
पार्वतीमवचनामसूयया
प्रत्युपेत्य पुनराह सस्मितम् ॥ ५० ॥
मुञ्च कोपमनिमित्तकोपने
संध्यया प्रणमितोऽस्मि नान्यया ।
किं न वेत्सि सहधर्मचारिणं
चक्रवाकसमवृत्तिमात्मनः ॥ ५१ ॥
निर्मितेषु पितृषु स्वयंभुवा
या तनुः सुतनु पूर्वमुज्झिता ।

47. *b* Vā-2—म्बुविहिताञ्जलि—; P-2—म्बुसरसाञ्जलक्रियाः. *c* Bh. संध्यम्, so Mallinātha. *d* Vā-2, T. सिद्धये.

49. *a* P-3 निर्बिभज्य—. *d* T. विजयां सहेतु—.

50. *b* T.—मनुतष्ठिवान्. *d* T. सोऽभ्युपेत्य पुन—.

51. *b* So Vā-1, Vā-2, P-1, P-3, P-4, T., Bh., S.; F. नान्यथा; so Mallinātha—प्रकारान्तरं न; P-2 संध्यया प्रणमतोऽहमन्यथा. *c* T. —सहनर्मचारिणं. *d* P-4—समवृत्त—.

सेयमस्तमुदयं च सेवते
तेन मानिनि ममात्र गौरवम् ॥ ५२ ॥
तामिमां तिमिरवृत्तिपीडितां
भूमिलं स्वमिव संप्रति स्थिताम् ।
एकतस्तटतमालमालिनीं
पश्य धातुरसनिम्नगामिव ॥ ५३ ॥
सांध्यमस्तमितशेषमातपं
रक्तरेखमपरा बिभर्ति दिक् ।
संपरायवसुधा सशोणितं
मण्डलाग्रमिव तिर्यगुज्झितम् ॥ ५४ ॥
यामिनीदिवससंधिसंभवे
तेजसि व्यवहिते सुमेरुणा ।
एतदन्धतमसं निरङ्कुशं
दिक्षु दीर्घनयने विजृम्भते ॥ ५५ ॥

52. *b* So all MSS.; Vā-1, Bh.—मुत्थिता; cp. Mallinātha on उज्झिता. *c* So Vā-1, S., Bh.; F.—मस्तमुदये च सेव्यते; G.—मस्तमुदयं च सेव्यते; so explained by Mallinātha; cp. 51 संध्यया प्रणमितोऽस्मि.

53. *a* Vā-1, Bh., P-1, P-2, P-3—वृद्धिपी. *b* So F. (=स्थूलीभूतमात्मतत्त्वमिव; or धूमिलं स्व—?); T. भूमिलग्नमिव संप्रतिष्ठिताम्; G., S., Bh. भूमिलग्नमिव सप्रति स्थिताम्, followed by Mallinātha; S., however, has शैलराजतनयेऽधुना स्थिताम्; obviously a departure to avoid the difficult construction; cp. VI, 8*b*.

54. *b* So F., followed by Mallinātha; others—लेख. *c* So Vā-1, T., G.; सांपराय S., but संपराय—in Mallinātha; F. सांपरायवसुधा न शोणितं. *d* P-3 corrects मण्डलाग्र—into मण्डनाग्र—; so Vā-1, F., S.; —गुत्थितम् T., G., Bh. and Mallinātha; P-4—गूर्जितम्.

55. *c* P-4 एतदेव तिमिरं; Mallinātha—तपसं निरर्गलं. *d* F. विजृम्भिते.

नोर्ध्वमीक्षणगतिर्न चाप्यधो
नाभितो न पुरतो न पृष्ठतः ।
लोक एष तिमिरोल्बवेष्टितो
गर्भवास इव वर्तते निशि ।। ५६ ।।
शुद्धमाविलमवस्थितं चलं
वक्रमार्जवगुणान्वितं च यत् ।
सर्वमेव तमसा समीकृतं
धिङ महत्त्वमसतां हृतान्तरम् ।। ५७ ।।
नूनमुन्नमति यज्वनां पतिः
शार्वरस्य तमसो निषिद्धये ।
पुण्डरीकमुखि पूर्वदिङमुखं
कैतकैरिव रजोभिराहृतम् ।। ५८ ।।
मन्दरान्तरितमूर्तिना निशा
लक्ष्यते शशभृता सतारका ।
त्वं मया प्रियसखीभिरावृता
श्रोष्यतेव वचनानि पृष्ठतः ।। ५९ ।।
रुद्धनिर्गमनमादिनक्षयात्
पूर्वदृष्टतनुचन्द्रिकास्मितम् ।

56. *b* F. नाभितो न च •पुरो न पृष्ठतः. *c* G. लोक एव; F. तिमिरोल्पवे—; P-1, S. तिमिरौघवे—; śloka omitted by P-2.

57. *a* F.—लमतस्थितं—; Bh.—मवस्थितं जल. *d* F. दिङ म—; so F., Vā-1, G. and Mallinātha; T., S. हृतान्तरम्; P-1 —मसतामनन्तरम्; P-2 reads 57 after यामिनीदिवस—55.

58. *a* T. उन्नयति; F.—येज्वनोपतिः. *b* P-3 शारदस्य तमसो. *c* and *d*: So Vā-1, S., G.; T., Vā-2—मुखि पश्य दिङमुख कैतकैरिव रजोभिरावृतम्; so Mallinātha; F.—मुखि पूर्वदिङमुख कैतकैरिव रजोभिरावृतम्; Bh.—मुखि दिङमुखं यथा.

59. *c* So F.; त्वं मया प्रियसखीसमागता elsewhere. *d* P-3 श्रोष्यते च व—.

एतदुद्गिरति रात्रिनोदिता
दिग् रहस्यमिव चन्द्रमण्डलम् ॥ ६० ॥
पश्य पक्वफलिनीफलत्विषा
बिम्बलाञ्छितवियत्सरोऽम्भसा ।
विप्रकृष्टविवरं हिमांशुना
चक्रवाकमिथुनं विडम्ब्यते ॥ ६१ ॥
शक्यमोषधिपतेर्नवोदयाः
कर्णपूररचनाकृते तव ।
अप्रगल्भयवसूचिकोमलाश्
छेत्तुमग्रनखसंपुटैः कराः ॥ ६२ ॥
अङ्गुलीभिरिव केशसंचयं
संनिगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं
चुम्बतीव रजनीमुखं शशी ॥ ६३ ॥
पश्य पार्वति नवेन्दुरश्मिभिः
सामिभिन्नतिमिरं नभस्तलम् ।

60. *a* Vā-1 पूर्वदृष्टमनु च—. *c* and *d* : So Vā-1, P-4, Bh. and T, so also F., G., and Mallinātha except in रात्रिचोदिता; S., P-1 एतदुद्गिरति चन्द्रमण्डल दिग् रहस्यमिव रात्रिनोदितम्.

61. *c* P-3, T.—कृष्टविधुर; P-1—कृत्तविवरं; cp. 32 (अल्पमन्तरमनल्पतां गतम्) and 39 (सावशेषविवरं).

62. *a* F. शक्यमाषधिपतेर्नवोदया कर्ण—, rest as ours except भेत्तुम् for छेत्तुम्; P-3, P-4—क्यमौष—; rest as ours. T. reads:

शक्य ओषधिपतेर्नवोदयः
कर्णपूररचनाकृते तव ।
अप्रगल्भयवसूचिकोमलश्
छेत्तुमग्रनखसंपुटैः करः ॥

63. *b* F. सरस्मितिमिरमगृह्यरीचिभिः ? *c* F.—लोचने.

लक्ष्यते द्विरदभोगरूषितं
संप्रसीददिव मानसं सरः ॥ ६४ ॥
रक्तभावमपहाय चन्द्रमा
जात एष परिशुद्धमण्डलः ।
विक्रिया न खलु कालदोषजा
निर्मलप्रकृतिषु स्थिरोदया ॥ ६५ ॥
उन्नतेषु शशिनः प्रभा स्थिता
निम्नसंश्रयपरं निशातम. ।
नूनमात्मसदृशी प्रकल्पिता
वेधसेह गुणदोषयोर्गतिः ॥ ६६ ॥
चन्द्रपादजनितप्रवृत्तयश्
चन्द्रकान्तजलबिन्दवो गिरौ ।
मेखलातरुषु निद्रितानमून्
बोधयन्त्यसमये शिखण्डिनः ॥ ६७ ।

64. *b* So Vā-1, F.; T., Vā-2: भग्नसान्द्रतिमिरं नभस्तलम्; S. भिन्नसान्द्रतिमिर नभस्तलम्; Mallinātha agrees with ours except नभस्तलम्; so G.; Bh. सविभिन्नतिमिरं नभस्तलम्. *c* So P-3; others—भोगदूषितं—; cp. 19 अलकचूर्णरूषितम् (= उपहतम् Mallinātha). *d* Vā-2, S., P-1, T. संप्रसादमिव.

65. *a* Vā-2 रक्तभागम्—; śloka omitted by P-2.

66. *c* F.—सदृशो हि क—. *d* P-1 वेधसा ह्—; G., T. वेधसैव; F. वेधसा हि—.

67. So Vā-1; F. reads:

चन्द्रपादजनितप्रवृत्तिभिश्
चन्द्रकान्तमणिबिन्दुभिर्गिरिः ।
मेखलातरुषु निद्रितानिमान्
बोधयत्यसमये शिखण्डिनः । ।

So S., T. with—जलबिन्दुभि—; so also Mallinātha with अमून् and—जलबिन्दु—.

कल्पवृक्षशिखरेषु संप्रति
प्रस्फुरद्भिरविकल्पसुन्दरि ।
हारयष्टिगणनामिवांशुभिः
कर्तुमागतकुतूहलः शशी ।। ६८ ।।
उन्नतावनतभागवत्तया
चन्द्रिका सतिमिरा गिरेरियम् ।
भक्तिभिर्बहुविधाभिरर्पिता
भाति भूतिरिव मत्तदन्तिनः ।। ६९ ।।
एतदुच्छ्वसितपीतमैन्दवं
वोढुमक्षममिव प्रभारसम् ।
मुक्तषट्पदविरावमञ्जसा
भिद्यते कुमुदमा निबन्धनात् ।। ७० ।।
पश्य कल्पतरुलम्बि शुभ्रया
ज्योत्स्नया जनितरूपसंशयम्
मारुते चलति चण्डि केवलं
व्यज्यते विपरिवृत्तमंशुकम् ।। ७१ ।।
शक्यमङ्गुलिभिरुद्धृतैरधः
शाखिनां पतितपुष्पपेशलैः ।

68. *b* S., Bh. प्रस्फुरद्भिरिव पश्य सुन्दरि. *c* S.—यष्टिरचनामि—. *d* F., G., Bh., P-3—मुद्यतकुतू—.

69. *a* P-1, S.—भाववत्तया. *b* F.—का सुतिमिरा—. *d* P-2, P-4, S. मत्तहस्तिनः.

70. *a* F.—सितवीतमैन्दवं. *b* F. सोढुम—. *c* Vā-1 भुक्तषट्—; Vā-2 युक्तषट्—.

71. *a* So F.; others शुद्धया. *b* F. ज्योत्सया—. *c* Vā-1 चरति; P-1 केवलाद्; T. चण्डिके चलं; S. चण्डिके बलाद्. We follow Vā-1, F., G. and Mallinātha.

पत्रझर्झरशशिप्रभालवैर्
एभिरुत्कचयितुं तवालकान् ॥ ७२ ॥
एष चारुमुखि योगतारया
युज्यते तरलबिम्बया शशी ।
साध्वसादुपगतप्रकम्पया
कन्ययेव नवदीक्षितो वरः ॥ ७३ ॥
पाकभिन्नशरकाण्डगौरयोर्
उल्लसत्प्रतिकृतिप्रसन्नयोः ।
रोहतीव तव गण्डलेखयोश्
चन्द्रबिम्बनिमिताक्षि चन्द्रिका ॥ ७४ ॥
लोहितार्कमणिभाजनार्पितं
कल्पवृक्षमधु बिभ्रती स्वयम् ।
त्वामियं स्थितिमतीमुपस्थिता
गन्धमादनवनाधिदेवता ॥ ७५ ॥
आर्द्रकेसरसुगन्धि ते मुखं
मत्तरक्तनयनं स्वभावतः ।

72. *a* S.—हस्थितै—. *b* T., F.—पुष्पकोमलै . *c* So F. alone (—filtered through √*kṣar* ?); others (with Mal.) पत्रजर्जर—. *d* Vā-2, P-3, P-4, T. तवालकम्, F., Bh तवालकाः.

73. *a* F. एष तारमुखि योगतारया; P-4 एष चन्द्रमुखि योगतारया; Vā-2, T. एष चारुमुखि पश्य तारया; P-1, P-3, S.—योग्यतारया; P-2 —योगितारया. *d* F. नवदीक्षयादरः; P-4, Vā-2, P-1, P-2, P-3, S., G., Bh., Mallinātha—दीक्षया वरः.

74. *a* T. पाकपाण्डुशर—. *b* F. अल्लसत्प्रति—; P-3—कृतिप्रपन्नयोः; F., G.—कृतिप्रदीप्तयोः; S.—कृतिप्रसादयो॰; Bh.—प्रतिकृति॰ प्रसन्नयोः. *c* F. रोरुहातिपतीवगण्डरेखयोः. *d* So F. alone; Vā-1, Mallinātha, G., T., Bh.—निहिताक्षि . . . ; S.—निहिताक्षिण; so P-1, P-4.

75. *b* F. बिभ्रति. *c* S., Bh.—मतीमुपागता; P-1—मती समागता.

अत्र लब्धवसतिर्गुणान्तरं
किं विलासिनि मदः करिष्यति ॥ ७६ ॥
मान्यभक्तिरथवा सखीजनः
सेव्यतामिदमनङ्गदीपनम् ।
इत्युदारमभिधाय शंकरस्
तामपाययत पानमम्बिकाम् ॥ ७७ ॥
पार्वती तदुपभोगसंभवां
विक्रियामपि सती मनोभवाम् ।
अप्रतर्क्यविधियोगनिर्मिताम्
आम्रतेव सहकारतां ययौ ॥ ७८ ॥
तत्क्षणं विपरिवर्तितह्रियोर्
शिक्षतोः शयनमिद्धरागयोः ।
सा बभूव वशवर्तिनी द्वयोः
शूलिनः सुवदना मदस्य च ॥ ७९ ॥

76. *a* P-4 पद्मकेसर—; T. आर्द्रकेशर—. *b* P-3 रक्तमत्तनयनं; T. रक्तमेव न—; P-4, G., Bh प्रान्तरक्तनयनं, F. मत्तमत्तनयनं; cp. प्रस्फारितोन्नम्रविनम्रकण्ठं, IX, 9, repetition for emphasis. *d* G., Mallinātha कं विलासिनि मधुः करि—; F. किं विलासिनि मधुः करि—.

77. *a* F. मानभक्ति—. *b* F. सेदृता—. *d* F.—मम्बिका.

78. *a* T., F., G., S.—पयोग—. *b* F., S., G., Vā-2, P-1, P-3, P-4, Bh. मनोहराम्. *c* F. अप्रतर्क्यविधियोगकारिनाम् recording अप्रतर्क्यविनियोगकारिता and अप्रतर्क्यविनियोगनिर्मिताम्. T reads (*c* and *d*) :

अप्रतर्क्यविधियोगनिर्मिता
नम्रतेव सहकारितां ययौ ॥

A good reading, adopted in Mallinātha with सहकारतां.

79. *a* P-1—परिवृत्तलज्जयोः; T. तत्क्षणे विपरिवर्तितह्रियोः; F. तत्क्षणं विपरिवर्तिह्रिययोः. *b* F. शिप्यतोः शयन—; T. वाञ्छतोः शयन—; others नेष्यतोः. *d* F., G. प्रेयसः सु—.

घूर्णमाननयनं स्खलत्कचं
स्वेदबिन्दुमदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्
चक्षुषा चिरमुमामुखं पपौ ॥ ८० ॥
तां विलम्बितपनीयमेखलाम्
उद्वहन् जघनभारदुर्वहाम् ।
ध्यानसंभवविभूतिसंभृतं
प्राविशन् मणिशिलागृहं हरः ॥ ८१ ॥
तत्र हंसधवलोत्तरच्छदं
जाह्नवीपुलिनचारुदर्शनम् ।
अध्यशेत शयनं प्रियासखः
शारदाभ्रमिव रोहिणीपतिः ॥ ८२ ॥
क्लिष्टकेशमभिलुप्तचन्दनम्
व्युत्पथार्पितनखं समत्सरम् ।
तस्य तच्छिदुरमेखलागुणं
पार्वतीरतमभून्न तृप्तये ॥ ८३ ॥

80. *a* So Bh. alone, G., S. स्खलत्कथं; Vā-2, P-1 स्खलद्वचः; cp. 88.

81. *c* So F.; Vā-1 ध्यानसंभृतविभूतिगौरवः; T. ध्यानसंभृतिविभूति शोभितं; Bh., S. ध्यानसंभृतविभूतिरीश्वरः with which agree P-2, P-3, P-4; G., Mallinātha ध्यानसभृतविभूतिसभृतं (= ध्यानमभृतया सकल्पमात्रसिद्धया विभूत्या भोगसाधनेन संभृत सपूर्णम्). *d* रहः P-3, P-4, P-1, S, Bh.; P-2 ततः. *c* and *d* : Of this śloka and *a* and *b* of 82 are omitted by Vā-2.

83. *a* and *b* : So Vā-1; T., S. क्लिष्टकेशमवलुप्तचन्दनं व्यत्ययार्पितनखं समत्सरम्. So P-3, P-4; F., G. क्लिष्टचन्द्रमदयैः कचग्रहैरुत्पथार्पितनखं समत्सरम्, so Mallinātha; P-2—मविलुप्तचन्दन (—मभिलुप्तचन्दनं? as ours), so P-3, Bh.; Vā-1 उत्पथार्पित—; P-4 हृत्पथार्पितनखं. *d* F.—रतमभूततृप्तये; P-3, G, Bh. मभूदतृप्तये.

केवलं प्रियतमादयालुना
ज्योतिषामवनतासु पङ्क्तिषु ।
तेन तत्परिगृहीतवक्षसा
नेत्रमीलनकुतूहलं कृतम् ॥ ८४ ॥
स व्यबुध्यत बुधस्तवोचितः
शातकुम्भकमलाकरैः समम् ।
मूर्छनापरिगृहीतकैशिकैः
किंनरैरुषसि गीतमङ्गलः ॥ ८५ ॥
तौ क्षणं शिथिलितोपगूहनौ
दंपती रचितमानसोर्मयः ।
पद्मभेदपिशुनाः सिषेविरे
गन्धमादनवनान्तमारुताः ॥ ८६ ॥
ऊरुमूलनखमार्गराजिभिस्
तत्क्षणं हृतविलोचनो हरः ।
वाससः प्रशिथिलस्य संयमं
कुर्वतीं प्रियतमामवारयत् ॥ ८७ ॥
स प्रजागरकषायलोचनं
गाढदन्तपदपीडिताधरम् ।

84. *a* F. केवलप्रिय—. *c* S. प्रतिगृहीत—.

85. *a* F. बुधस्तपोचितः; Vā-2, T.—ध्यत तया निशाक्षये. *b* T. —कमलाकरः. *c* T.—गृहीतवंशिकैः; P-3—गृहीतकेशकैः; P-4 —गृहीतमानसैः; Bh. मूर्छनापरिगृहीतकैशकैः. *d* F. समुपगीतमगलः.

86 *a* F. शिदिलि—; Vā-2 प्रशिथिलोपगू—. *b* So majority; P-2, P-3, Bh. चलितमा—. *c* F. पद्मबोधनिपुणाः; G. पद्मभेदनिपुणाः. *d*With गन्धमादन Vā-1, the basis of our text ends; henceforth Vā-2 has been our basis.

87. *a* F.—मार्गराजभिः; P-2 ऊरुलग्ननख—जिभिः. *c* F. प्रसिदिलस्य; so P-1, P-2, P-3, P-4, Bh., S., G., F.; Vā-1 संचयं.

आकुलालकमरंस्त रङ्गवान्
प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ॥ ८८ ॥
तेन भङ्गिविषमोत्तरच्छदं
मध्यपिण्डितविसूत्रमेखलम् ।
निर्मलेऽपि शयनं निशात्यये
नोज्झितं चरणरागलाञ्छितम् ॥ ८९ ॥
स प्रियासुखरसं दिवानिशं
हर्षवृद्धिजननं सिषेविषुः ।
दर्शनप्रणयिनामदृश्यताम्
आजगाम विजयानिवेदितः ॥ ९० ॥
समदिवसनिशीथं सङ्गिनस्तत्र शंभोः
शतमगमदृतूनां साग्रमेका निशेव ।
न तु सुरतसुखेभ्यश्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ९१ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ शिवयोः संभोगवर्णनं नामाष्टमः सर्गः ॥

88. *a* F. न प्रजागरकषायलोचना; F., T., Bh. गाढदन्तपदताडिताधरम्; P-1 गाढदन्तपरिताडि—; P-4—दन्तपरिपीडिताधरम्. *c* P-2, Bh. —लकमपास्तचित्रकं (प्रेक्ष्य); so F. In P-2 and Bh. verb is wanting, note स in this śloka and तेन in 89.

89. *a* So Bh., Vā-2, F.; P-2 भङ्गवि—; T., S. भिन्नवि—. *b* Vā-2 मध्यपीडित; P-4 मध्यमण्डितवितस्तमेखलम्.

90. *a* So Bh. alone, others प्रियामुखरम *b* F. निषेविषुः. *d* S., Bh.—निवेदनात्.

91. *b* So Vā-2, S. (साग्रं किंचित्साधिकसंख्यम्); others सार्धम् (with Mallinātha). *c* F. न च सुरतसुखैश्च; Bh. न च सुरतसुखेषु. *d* So F., G., S., Mallinātha; Vā-1, Bh. तज्जलेषु; T. तज्जलेभ्यः.

Colophon: After this P-4 has:. . .पार्वतीसंभोगवर्णनो नामाष्टमः सर्गः ।

अथो शिवश्चन्द्रसुचारुमौलिः
सस्मार तत्रामरशिल्पिराजम् ।
चिकीर्षयागारवरस्य विष्णुर्
मायां तु संसारसिसृक्षयेव ।।

संवत्। ६७५ वर्षे माघमासे कृष्णपक्षे रुद्रातिथौ काव्यवासरे। भट्टारव श्रीदेवेन्द्रकीर्तिजी तत्सिषि नारायणदामस्वमेव लिखापितं। लिखितं लेखक सा० जोधाग्राम वनहटामध्ये लिषि। श्रीरस्तु। कल्याणमस्तु; P-2 :...हरसंभोग वर्णनोष्टमः। संपूर्णमिति। ८। संवत्। ६४० वर्षे पौषसुदि १४ बृहस्पतिवासरे। लिष्यते पुरनमल काईस्थमाथुरेण। लिषाईत भटविश्रामजी आत्मपढनार्थम्। शुभमस्तु भवेत्; P. agrees with Vā-2. P-1...शिवपार्वतीसुरतक्रीडावर्णन नाम...; S., Bh. उमासुरतवर्णनं...; G....हरविहारो नाम...; Mallinātha उमासुरतवर्णनं नामाष्टमः सर्गः; F. इति श्रीकालिदासस्य कृतौ कुमारसंभवे महाकाव्ये अष्टमः सर्गः। करकृतमपराधं क्षन्तुमर्हन्ति सन्तः। श्रीरामचन्द्राय मङ्गलम्। श्रीसाम्बशिवार्पणमस्तु।

।। नवमः सर्गः ।।

तथाविधेऽनङ्गरसप्रसङ्गे
मुखारविन्दे मधुपः प्रियायाः ।
संभोगवेश्म प्रविशन्तमन्तर्
ददर्श पारावतमेकमीशः ।। १ ।।

सुकान्तकान्तामणितानुकारं
कूजन्तमाघूर्णितरक्तनेत्रम् ।
प्रस्फारितोन्नम्रविनम्रकण्ठं
मुहुर्मुहुर्न्यञ्चितचारुपुच्छम् ।। २ ।।

विशृङ्खलं पक्षतियुग्ममीषद्
दधानमानन्दगतिं मदेन ।
शुभ्रांशुवर्णं जटिलाग्रपादम्
इतस्ततो मण्डलके चरन्तम् ।। ३ ।।

रतिद्वितीयेन मनोभवेन
ह्रदात् सुधायाः प्रविगाह्यमानात् ।
तं वीक्ष्य फेनस्य चयं नवोत्थम्
इवाभ्यनन्दत् क्षणमिन्दुमौलिः ।। ४ ।।

तस्याकृतिं कामपि वीक्ष्य दिव्याम्
अन्तर्भवश्छद्मविहंगमग्निम् ।
विचिन्तयन् संविविदे स देवो
भ्रूभङ्गभीमश्च रुषा बभूव ।। ५ ।।

2. *c* Cp. VIII, 76 मत्तमत्तनयन in F. *d* T --मुहुर्नर्तितचारु—, so Vā-2, Bh.

3. *b* T., V. आनन्दगतं. *d* G , S., T., V.—लकैश्चर—; so Bh.

4. *b* So all the MSS.; note preference for वगाह् to विगाह with reference to I-1.

5. *a* T. तदाकृतिं. *b* So S.; others—भवच्छद्म—.

स्वरूपमास्थाय ततो हुताशः
श्वासस्खलत्कण्ठकृताञ्जलिः सन् ।
प्रवेपमानो नितरां स्मरारिम्
इदं वचो व्यक्तमथाभ्युवाच ॥ ६ ॥

असि त्वमेको जगतामधीशः
स्वर्गौकसां त्वं विपदो निहंसि ।
अतः सुरेन्द्रप्रमुखाः प्रभो त्वाम्
उपासते दैत्यवरैर्विधूताः ॥ ७ ॥

त्वया प्रियाप्रेमवशंवदेन
शतं व्यतीयेऽत्रभवन्नृतूनाम् ।
बहिःस्थितोऽपि त्वदवीक्षणार्तो
दैन्यं परं प्राप सुरैः सुरेन्द्रः ॥ ८ ॥

त्वदीयसेवावसरप्रतीक्षैर्
अभ्यर्थितः शक्रमुखैः सुरैस्त्वाम् ।
उपागतोऽन्वेष्टुमहं विहंग-
रूपेण विद्वन्त्समयोचितेन ॥ ९ ॥

इति प्रभो चेतसि संप्रधार्य
तं नोऽपराधं भगवन् क्षमस्व ।
पराभिभूता वद किं क्षमन्ते
कालातिपातं शरणार्थिनोऽमी ॥ १० ॥

6. *b* So Bh. alone; T., V. त्रामस्खलत्कम्प्रकृताञ्जलिः सन्; S. स्खलन् वलत्कम्पकृताञ्जलिः मन् (comm.: वलन्नुद्भवन् कम्पो यथा तथा); Vā-2 त्रमन् स्खलत्कम्प्रकृताञ्जलिः सन्; T., Vi.—मानोऽतितरां. *d* So T , Vi ; Vā-2, S., G., Bh.—थाभ्युवाच.

8. *b* So T., V.; —व्यतीये सुरतादृतूनाम् Vā-2, S., G., Bh. *c* So Vā-2; G. बहिः स्थितेन त्वदवीक्षणार्तो; S., Bh. रहः स्थितेन त्वदवीक्षणार्तो; T., V. रहः स्थितेन त्वदवीक्षणेन.

9. *d* Vā-2 विद्वत्समयो—.

10. *b* Bh. ममापराधं—.

प्रभो प्रसीदाथ सृजात्मपुत्रं
यं प्राप्य सेनान्यमसौ सुरेन्द्रः ।
स्वर्लोकलक्ष्मीप्रभुतामवाप्य
जगत्त्रयं पाति तव प्रसादात् ॥ ११ ॥
स शंकरस्तामिति जातवेदो-
विज्ञापनामर्थकरीं निशम्य ।
अभूत् प्रसन्नः परितोषयन्ति
गीर्भिर्गिरीशा रुचिराभिरीशम् ॥ १२ ॥
प्रसन्नचेता मदनान्तकारी
स तारकारेर्जयिनो भवाय ।
शक्रस्य सेनाधिपतेर्जयाय
व्यचिन्तयच्चेतसि भावि किंचित् ॥ १३ ॥
युगान्तकालाग्निमिवाविषह्यं
परिच्युतं मन्मथरङ्गभङ्गात् ।
रतान्तरेतः स हिरण्यरेतस्य्
अथोर्ध्वरेतास्तदमोघमाधात् ॥ १४ ॥
अत्युष्णवाष्पानिलदूषितान्तर्
विशुद्धमादर्शमिवात्मदेहम् ।
बभार भूम्ना सहसा पुरारि-
रेतःपरिक्षेपकुवर्णमग्निः ॥ १५ ॥
त्वं सर्वभक्षो भव भीमकर्मा
कुष्ठाभिभूतोऽनल धूमगर्भः ।

11. *a* So Bh.; so T., Vi. except in सृजाशु; Vā-2 प्रभो प्रसीदाशु सृजस्व पुत्रं; G., S.—दाशु मृजात्मपुत्र. *c* T., V. स्वर्गैक—; Bh. स्वर्लोकलक्ष्मोप्रयुतामुपेत्य
12. *b* T., V., Bh. अर्थवनीं.
13. *a* So Vā-2; Bh. and others—न्तकारः.
15. *a* So Vā-2; T., V. अथोष्णबाष्पानिलदूषितान्तं, G. अथोष्ण-बाष्पानलदूषितान्तर्—; Bh. अथोष्मबाष्पानलदूषितान्तर्. *d* Bh. रेतः परिक्षिप्तकुवर्ण—.
16. *d* T., Vi. तथा रता—.

इत्थं शशापाद्रिसुता हुताशं
रुष्टा रतानन्दसुखस्य भङ्गात् ॥ १६ ॥
दक्षस्य शापेन शशी क्षयीव
प्लुष्टो हिमेनेव सरोजकोशः ।
वहन् विरूपं वपुरुग्ररेतश्-
चयेन वह्निः किल निर्जगाम ॥ १७ ॥
स पावकालोकरुषा विलक्षां
स्मरत्रपास्मेरविनम्रवक्त्राम् ।
विनोदयामास नगेन्द्रपुत्रीं
शृङ्गारगर्भैर्मधुरैर्वचोभिः ॥ १८ ॥
हरो विकीर्णं घनघर्मतोयैर्
नेत्राञ्जनाङ्कं सदयं प्रियायाः ।
द्वितीयकौपीनचलाञ्चलेना-
हरन् मुखेन्दोरकलङ्किनोऽस्याः ॥ १९ ॥
मन्देन स्विन्नाङ्गुलिना करेण
कम्प्रेण तस्या वदनारविन्दात् ।
परामृशन् घर्मजलं जहार
हरः सहेलं व्यजनानिलेन ॥ २० ॥
रतिश्लथं तत्कबरीकलापम्
अंसावसक्तं विगलत्प्रसूनम् ।
स पारिजातोद्भवपुष्पमय्या
स्रजा बबन्धामृतमूर्तिमौलिः ॥ २१ ॥

17. *a* **T.** शशी क्षयाय. **S., V., G. agree with ours.** *b* **T., Vi.** प्रुषो हिमेनेव—.

18. *a* **T., V.** पावकालोकनतो—. *c* **S., T., Vi., Bh.** गिरीन्द्रपुत्री.

19. *b* **So T., Vi.; others** हृदयप्रि—. *d* **T., Vi.** (—न) हरन्मखेन्दो—; **Bh** —रकलङ्किनोपि.

20. *b* **G.** प्रेम्णा च.

कपोलपाल्यां मृगनाभिचित्र-
पत्रावलीमिन्दुमुखः सुमुख्याः ।
स्मरस्य सिद्धस्य जगद्विमोह-
मन्त्राक्षरश्रेणिमिवोल्लिलेख ॥ २२ ॥
रथस्य कर्णाविभि तन्मुखस्य
ताटङ्कचक्रद्वितयं न्यधात् सः ।
जगज्जिगीषुर्विषमेषुरेष
ध्रुवं यमारोहति पुष्पचापः ॥ २३ ॥
तस्याः स कण्ठे पिहितस्तनाग्रां
न्यधत्त मुक्ताफलहारवल्लीम् ।
या प्राप मेरुद्वितयस्य मूर्ध्नि
स्थितस्य गङ्गौघयुगस्य लक्ष्मीम् ॥ २४ ॥
नखव्रणश्रेणिधरे बबन्ध
नितम्बबिम्बे रशनाकलापम् ।
चलस्वचेतोमृगबन्धनाय
मनोभुवः पाशमिव स्मरारिः ॥ २५ ॥
भालेक्षणाग्नौ स्वयमञ्जनं स
भङ्क्त्वा॰दृशोः साधु निवेश्य तस्याः ।
नवोत्पलाक्ष्याः पुलकोपगूढे
कण्ठे विनीलेऽङ्गुलिमुज्जघर्ष ॥ २६ ॥

23. *a* Bh. रथस्य कर्णावलितं मुखस्य; T. तन्मखस्य; G. कर्णाविहितं मु—. *b* G., Bh. व्यधात्—.

24. *a* T., Vi. कण्ठेऽभिघनस्तन यां; Bh. कण्ठेऽभि घनस्तनाग्र. *c* T., Vi. सा प्राप—. *d* S. गाङ्गौघ, but comm.: गङ्गाया ओघयोः प्रवाहयोर्युगस्य.

25. *a* Vā-2 नखव्रणश्रोणिवरे—. *b* T., V. रसना—. *c* So majority; T., V. चलत्स्व—. *d* T. मनोभवः; all others मनोभुवः

26. So Vā-2, G., S.; न्यक्त्वा T., Vi. (note use of √*bhanj* in this sense; *see also* XII, 60*b*—भञ्जनम्). *c* Bh., T., Vi. पुलकोपगूढः. *d* So T , G., S., Vi., Bh.; Vā-2 विलीनाङ्गुलि—.

अलक्तकं पादसरोरुहाग्रे
सरोरुहाक्ष्याः किल संनिवेश्य ।
स्वमौलिगङ्गासलिलेन हस्ता-
रुणत्वमक्षालयदिन्दुचूडः ।। २७ ।।
भस्मानुलिप्ते वपुषि स्वकीये
सहेलमादर्शतलं विमृज्य ।
नेपथ्यलक्ष्मीपरिभावनार्थम्
अदर्शयज्जीवितवल्लभां सः ।। २८ ।।
प्रियेण दत्ते मणिदर्पणे सा
संभोगचिह्नं स्ववपुर्विभाव्य ।
त्रपावती तत्र घनानुरागं
रोमाञ्चदम्भेन बहिर्बभार ।। २९ ।।
नेपथ्यलक्ष्मीं दयितोपक्लृप्तां
सस्मेरमादर्शतले विलोक्य ।
अमंस्त सौभाग्यवतीषु धुर्यम्
आत्मानमुद्भूतविलक्षभावा ।। ३० ।।
अन्तःप्रविश्यावसरेऽथ तत्र
स्निग्धे वयस्ये विजया जया च ।
सुसंपदोपाचरतां कलानाम्
अङ्कस्थितां तां शशिखण्डमौलेः ।। ३१ ।।

27. *d* T., Vi.—इन्दुमौलि·
28. *c* G., S., Bh.—लक्ष्म्याः परि—.
29. *a* T., Vi—दर्पणे च. *b* Vi संयोग—. *c* Vā-2—वतीमत्र; cp. Rv. XIX, 28.
30. *c* So G, Vā-2, T, Vi.; S. धुर्या—; cp. X, 53*c*. *d* T., Vi. उद्भूतविलक्षता सा, Bh. उद्भूतवि—.
31. *c* G., Bh. स्वसंपदो—; T., Vi. उमां तदोपाचरतां कलाभां. *d* Vi. दूरे स्थितां तां; T. दुरे स्थिता तां.

व्यधुर्बहिर्मङ्गलगानमुच्चैर्
वैतालिकाश्चित्रचरित्रचारु ।
जगुश्च गन्धर्वगणाः सशङ्ख-
स्वनं प्रमोदाय पिनाकपाणेः ॥ ३२ ॥
ततः स्वसेवावसरे सुराणां
गणांस्तदालोकनतत्पराणाम् ।
द्वारि प्रविश्य प्रणतोऽथ नन्दी
निवेदयामास कृताञ्जलिः सन् ॥ ३३ ॥
मानसराजहंसी
करे दधानस्तनयां हिमाद्रेः ।
संभोगलीलालयतः सहेलं
हरो बहिस्तानभि निर्जगाम ॥ ३४ ॥
क्रमान् महेन्द्रप्रमुखाः प्रणेमुः
शिरोनिबद्धाञ्जलयो महेशम् ।
प्रालेयशैलाधिपतेस्तनूजां
देवीं च लोकत्रयमातरं ताम् ॥ ३५ ॥
यथागत तान् विबुधान् विसृज्य
प्रसाद्य मानक्रियया प्रतस्थे ।
स नन्दिना दत्तभुजोऽधिरुह्य
वृषं वृषाङ्कः सह शैलपुत्र्या ॥ ३६ ॥
मनोऽतिवेगेन ककुद्मता स
प्रतिष्ठमानो गगनाध्वनोऽन्ते ।

32. *b* T., Vi. चित्रितचारुवेद्याम्. *d* T., Vi.—शङ्खध्वनि (=ध्वनि ? adverbial).

34. *d* T., Vi. हसन् बहि—.

35. *b* Bh., G. गिरीशम्. *d* So G , Bh.; others ते.

36. *b* G., Bh. प्रमाद्यमानः क्रि—; T., Vi. प्रसादमानक्रियया.

37. *b* Bh. गगनाध्वनीनः; rest as ours; T., Vi. read :
मनोऽतिवेगेन ककुद्मता स
प्रतिष्ठमानो गगनाध्वनीनः ।

वैमानिकैः साञ्जलिभिर्ववन्दे
विहारहेलागतिभिर्गिरीशः ।। ३७ ।।
स्वर्वाहिनीवारिविहारचारी
रतान्तनारीश्रमशान्तिकारी ।
तौ पारिजातप्रसवप्रसङ्गो
मरुत् सिषेवे गिरिजागिरीशौ ।। ३८ ।।
पिनाकिनापि स्फटिकाचलेन्द्रः
कैलासनामा कलिताम्बराशः ।
धृतार्धसोमोऽद्भुतभोगिभोगो
विभूतिधारी स्व इव प्रपेदे ।। ३९ ।।
विलोक्य यत्र स्फटिकस्य भित्तौ
सिद्धाङ्गनाः स्वं प्रतिबिम्बमारात् ।
भ्रान्त्या परस्या विमुखीभवन्ति
प्रियेषु मानग्रहिला नमत्सु ।। ४० ।।
सुबिम्बितस्य स्फटिकांशुगुप्तेश्
चन्द्रस्य चिह्नप्रकरः करोति ।
गौर्यार्पितस्येव रसेन यत्र
कस्तूरिकायाः शकलस्य लीलाम् ।। ४१ ।।

तौ पारिजातप्रसवप्रसङ्गो
मरुत् सिषेवे गिरिजागिरीशौ ।।

The two omit *c* and *d* of 37 and *a* and *b* of 38. *b* G. प्रतिष्ठमानो गगनाध्वनीनः; S. प्रतिष्ठमानो गगनाध्वगोऽन्तः. Rest as ours in both.

39. *b* So Bh., G.; others—म्बरांशः; T., Vi.—म्बरासः. *c* T., Vi. भृतभोगिभोगो.

40. *b* Bh.—स्वप्रति—. *c* T., Vi.—परस्याभिमुखी—. *d* Bh., G. मनःसु.

41. *d* G., Vi., T , Bh. कस्तूरिकास्थासकुलस्यलीलाम्.

यदीयभित्तौ प्रतिबिम्बिताङ्गम्
आत्मानमालोक्य रुषा करीन्द्राः ।
मत्तान्यकुम्भिभ्रमतोऽतिभीम-
दन्ताभिघातव्यसनं वहन्ति ॥ ४२ ॥
निशासु यत्र प्रतिबिम्बितानि
ताराकुलानि स्फटिकालयेषु ।
दृष्ट्वा रतान्तच्युततारहार-
मुक्ताभ्रम बिभ्रति सिद्धवध्वः ॥ ४३ ॥
नभश्चरीमण्डनदर्पणश्रीः
सुधानिधिर्मूर्धनि यस्य तिष्ठन् ।
अनर्घ्यचूडामणितामुपैति
शैलाधिराजस्य शिवालयस्य ॥ ४४ ॥
समीयिवांसो रहसि स्मरार्ता
रिरंसवो यत्र सुराः प्रियाभिः ।
एकाकिनोऽपि प्रतिबिम्बभाजो
विभान्ति भूयोभिरिवाचिताः स्वैः ॥ ४५ ॥
देवोऽपि गौर्या सह चन्द्रमौलिर्
यदृच्छया स्फाटिकशैलशृङ्गे ।
शृङ्गारचेष्टाभिरनारताभिर्
मनोहराभिर्व्यहरच्चिराय ॥ ४६ ॥
देवस्य तस्य स्मरसूदनस्य
हस्तं समालम्ब्य सुविभ्रमश्रीः ।
सा नन्दिना वेत्रभृतोपदिष्ट-
मार्गा पुरोगेण कलं चचाल ॥ ४७ ॥

42. *c* T., Vi. मत्तान्यनाग—.

43. *c* G. रतान्ते च्युत—.

45. *d* G., S., Vi., T., Bh.—भिरिवान्विताः स्वैः.

46. *a* T., Vi. दिष्टोऽपि.

47. *b* So G., Vi., T., Bh.; others समालिङ्ग्य *c* G.—भृतोपदिष्टं मार्गं पुरोगेण; T., Vi., Bh. पुरोगेन.

चलच्छिखाग्रो विकटाङ्गभङ्गः
सुदन्तुरः शुक्लसुतीक्ष्णतुण्डः ।
भ्रुवोपदिष्टः स हि शंकरेण
तस्या विनोदाय ननर्त भृङ्गी ॥ ४८ ॥
कण्ठस्थलीलोलकपालमाला
दंष्ट्राकरालाननमभ्यनृत्यत् ।
प्रीतेन तेन प्रभुणा प्रणुन्ना
काली कलत्रस्य मुदे प्रियस्य ॥ ४९ ॥
भयंकरौ तौ विकटं नटन्तौ
विलोक्य बाला भयविह्वलाङ्गी ।
सरङ्गमुत्सङ्गमनङ्गशत्रोर्
गाढं प्रसह्य स्वयमालिलिङ्ग ॥ ५० ॥
उत्तुङ्गपीनस्तनपीडपीडं
ससंभ्रमं तत्परिरम्भमीशः ।
प्रपद्य सद्यः पुलकोपगूढः
स्मरेण रूढप्रमदो ममाद ॥ ५१ ॥
इति गिरितनुजाविलासलीला-
विविधविभङ्गिभिरेष तोषितः सन् ।
अमृतकरशिरोमणिर्गिरीन्द्रे
कृतवसतिर्वशिभिर्गणैर्ननन्द ॥ ५२ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ कैलासगमनं नाम नवमः सर्गः ॥

48. *a* and *b*. T., V1. चलद्विषाणो विकटाङ्गभङ्गः स दन्तुरः शुष्कसुतीक्ष्ण-तुण्डः. *b* So Vā-2, S., G., Bh.; others न दन्तुरः. *c* T., Vi., G., Bh., S —स तु शं—.

49. *c* S., Vā-2 नियुक्ता.

50. *a* Vā-2, S. नदन्तौ. *c* Bh. सुरङ्गामु—.

51. *a* Vā-2, S.—पीनस्तनपिण्डपीड.

52. *a* G., T., Vi., Bh. इति गिरिसुतया वि—.

Colophon: G., Bh. . . . कैलासगमनं नाम—; T. . . . कैलासगमनो नाम—; Vi., S. . . . कैलासगनो नाम—.

।। दशमः सर्गः ।।

आससाद शुनासीरं सदसि त्रिदशैः सह ।
एष त्रैयम्बकं तीव्रं वहन् वह्निर्महन्महः ।। १ ।।
सहस्रेण दृशामीशो द्युषदां सोऽतिसादरम् ।
दुर्दर्शनं ददर्शाग्निं धूम्रधूमिलमण्डलम् ।। २ ।।
दृष्ट्वा तथाविधं वह्निमिन्द्रः क्षुब्धेन चेतसा ।
व्यचिन्तयच्चिरं किंचित् कंदर्पद्वेषिरोषजम् ।। ३ ।।
स विलक्ष्यमुखैर्देवैर्वीक्ष्यमाणः क्षणं क्षणम् ।
उपाविशत् सुरेन्द्रेणादिष्टं सादरमासनम् ।। ४ ।।
हव्यवाह त्वयासादि दुर्दर्शेयं दशा कुतः ।
इति पृष्टः सुरेन्द्रेण स निःश्वस्य वचोऽवदत् ।। ५ ।।
अनतिक्रमणीयात्ते शासनात् सुरनायक ।
पारावतं वपुः प्राप्य वेपमानोऽतिसाध्वसात् ।। ६ ।।
अभिगौरि रतासक्तं जगामाहं महेश्वरम् ।
कालस्येव स्मरारातेः स्वं रूपमहमासदम् ।। ७ ।।

1. *a* S., T., Bh. मुनासीरं—. *c* T., Vi. गत्वा त्रैयम्बकं.
2. *a* and *b* : So G., T., Vi.; S., Vā-2—मीशः कुत्मिताङ्ग च सा— but cp. दुर्दर्शनं. *d* So Vā-2, Bh., G., others धूम्रधूमित—.
3. *b* G., Bh. क्रुद्धेन.
4. *a* Bh., G. विलक्षमु—; T., Vi. स्रवज्जलमुखैर्देवै·
5. *b* S. दुर्दर्शेयं दशा; G., Bh. सुदुर्दर्शा दशा; T., Vi. सुमहादुर्दशा. T., Vi., G., Bh. have the order :

   अनतिक्रमणीयात्ते शासनात् सुरनायक ।
   अतिगौरीरतासक्तं (G., Bh. अभि गौ—) जगामाहं महेश्वरम् ।।
   पारावतं वपुः प्राप्य वेपमानोऽतिसाध्वसात् ।
   कालस्येव स्मराररातेरुपान्तमहमासदम् ।।

7. *a* So S.; Vā-2, Bh. अभिगौरी (comm. गौर्यामित्यभिगौरि).

दृष्ट्वा छद्मविहंगं मां सुज्ञो विज्ञाय जम्भभित् ।
ज्वलज्ज्वालानले होतुं कोपनो माममन्यत ।। ८ ।।
वचोभिर्मधुरैः सान्त्वैर्विनम्रेण मया स्तुतः ।
प्रीतिमानभवद्देवः स्तोत्रं कस्य न तुष्टये ।। ९ ।।
शरण्यः सकलत्राता मामत्रायत शंकरः ।
क्रोधाग्नेर्ज्वलतो ग्रासत्रासतो दुर्निवारतः ।। १० ।।
परिहृत्य परीरम्भं रभसाद् दुहितुर्गिरेः ।
कामकेलिरसोत्सेकाद् व्रीडया विरराम सः ।। ११ ।।
रङ्गभङ्गच्युतं रेतस्तदमोघं सुदुर्वहम् ।
त्रिजगद्दाहकं सद्यो मद्विग्रहमधि न्यधात् ।। १२ ।।
दुर्विषह्येण तेनाहं तेजसा दहनात्मना ।
निर्दग्धमात्मनो देहं दुर्वहं वोढुमक्षमः ।। १३ ।।
रौद्रेण दह्यमानस्य महसातिमहीयसा ।
मम प्राणपरित्राणप्रगुणो भव वासव ।। १४ ।।
इति श्रुत्वा वचो वह्नेः परितापोपशान्तये ।
हेतुं विचिन्तयामास मनसा विबुधेश्वरः ।। १५ ।।
तेजोदग्धानि गात्राणि पाणिनास्य परामृशन् ।
किंचित् कृपीटयोनिं तं दिवस्पतिरभाषत ।। १६ ।।
प्रीतः स्वाहास्वधाहन्तकारैः प्रीणयसे स्वयम् ।
देवान् पितॄन्मनुष्यांस्त्वमेकस्तेषां मुखं यतः ।। १७ ।।

8. *b* Bh., G. यज्ञभित्; Vi., T. ज्ञानभृन्. *d* Vi., T. कोपतोऽयममन्यत; G., Bh. कोपतो मामलोकयत्.

9. *a* Vā-2, S. सार्थैः.

10. *c* So Bh., G., T., Vi.; Vā-2, S. ग्रासात् त्रासतो—.

11. *a* So G., Bh.; others परीरम्भ रभसं.

12. *b* So Vā-2, S., G.; T., Vi.—तदमोघं सुदुर्धरम्. *d* Bh.—हमभि न्यधात्.

13. *a* Bh. दुर्विषह्येन.

त्वयि जुह्वति होतारो हवींषि ध्वस्तकल्मषाः ।
भुञ्जन्ति स्वर्गमेकस् त्वं स्वर्गप्राप्तौ हि कारणम् ॥ १८ ॥
हवींषि मन्त्रपूतानि हुताश त्वयि जुह्वतः ।
तपस्विनस्तपःसिद्धिं यान्ति त्वं तपसां प्रभुः ॥ १९ ॥
निधत्से हुतमर्काय स पर्जन्योऽभिवर्षति ।
ततोऽन्नानि प्रजास्तेभ्यस्तेनासि जगतः पिता ॥ २० ॥
अन्तश्चरसि भूतानां तानि त्वत्तो भवन्ति च ।
ततो जीवितभूतस्त्वं जगतः प्राणदोऽसि च ॥ २१ ॥
अमीषां सुरसंघानां त्वमेकोऽर्थसमर्थने ।
विपत्तिरपि संश्लाघ्योपकारव्रतिनोऽनल ॥ २२ ॥
देवी भागीरथी पूर्वं भक्त्यास्माभिः प्रतोषिता ।
निमज्जतस्तवोदीर्णं तापं निर्वापयिष्यति ॥ २३ ॥
गङ्गां तद् गच्छ मा कार्षीर्विलम्बं हव्यवाहन ।
अर्थेष्ववश्यकार्येषु सिद्धये क्षिप्रकारिता ॥ २४ ॥

18. *c* T., Vi. भुञ्जते.

20. *a* Vi., T. नयसे. *c* T., Vi. ततोऽन्नानि प्रजायन्ते तेनासि—

21. So Bh.; others अन्तश्चरोऽसि. *b* So Vā-2; T., Vi. तानि त्वद्बल-वन्ति च. *c* T., Vi. त्वत्तो जीवितभूयस्त्व; Bh. ततो जीवनभूतस्त्व. *d* T., Vi., Bh.—दोऽसि तत्. After this Bh., G., S. read :

जगतः सकलस्यास्य त्वमेकोऽस्युपकारकृत् ।
कार्योपपादने तत्र त्वत्तोऽन्यः कः प्रगल्भते ॥

22. *a* T., Vi. सुरसैन्यानां. *c* T., Vi. read :

विपदोऽपि पदं श्लाघ्योपकारयति नो हि सः ।

Bh., G. have : विपदोऽपि पदं श्लाघ्योपकारव्रतिनो हि सा.

24. *b* Vā-2, T., Vi. विषादं हव्य—. *c* So T., Vi.; Vā-2, S. कार्येष्ववश्यकार्येषु; Bh., G. read :

गङ्गां तद् गच्छ मा कार्षीर्विलम्ब हव्यवाहन ।
तत्र गत्वा च तद्बीजममोघं मुञ्च सुस्थिरम् ॥

For a close parallel cf. Dante, *Divine Comedy*, II, 3, l. 78.

शंभोरम्भोमयी मूर्तिः सैव देवी सुरापगा ।
त्वत्तः स्मरद्विषो बीजं दुर्धरं धारयिष्यति ।। २५ ।।
इत्युदीर्य शुनासीरो विरराम स चानलः ।
तद्विसृष्टस्तमामन्त्र्य प्रतस्थे स्वर्धुनीमभि ।। २६ ।।
हिरण्यरेतसा तेन देवी स्वर्गतरङ्गिणी ।
तीर्णाध्वना प्रपेदे सा निःशेषाघविनाशिनी ।। २७ ।।
स्वर्गारोहणनिःश्रेणिर्मोक्षमार्गाधिदेवता ।
उदारदुरितोद्गारहारिणी दुर्गतारिणी ।। २८ ।।
महेश्वरजटाजूटवासिनी पापनाशिनी ।
सगरान्वयनिर्वाणकारिणी धर्मचारिणी ।। २९ ।।
विष्णुपादोदकोद्भूता ब्रह्मलोकादुपागता ।
त्रिभिः स्रोतोभिरश्रान्तं पुनाना भुवनत्रयम् ।। ३० ।।
जातवेदसमायान्तमूर्मिहस्तैः समुच्छ्रितैः ।
आजुहावार्थसंसिद्ध्यै सुप्रसादधरेव सा ।। ३१ ।।
संमिलद्भिर्मरालैः सा कलं कूजद्भिरुन्मदैः ।
ददे श्रेयांसि दुःखानि निहन्मीति तमभ्यधात् ।। ३२ ।।
कल्लोलैरुद्गतैरर्वाचीनं तटमभिद्रुतैः ।
प्रीतेव तमभीयाय स्वर्धुनी जातवेदसम् ।। ३३ ।।
अथाभ्युपेतस्तापार्तो निममज्जानलः किल ।
विपदा परिभूताः किं व्यवस्यन्ति विलम्बितुम् ।। ३४ ।।

26. *a* T , Vi., S., Bh. सुनासीरो. , *c* Bh., G., S. तमापृच्छ्य.
27. *d* Bh., G., S. निःशेषक्लेशनाशिनी.
28. *b* T., Vi. स्वर्गमार्गा—.
29. T., Vi. सागरान्वय—; S. सरागान्वय—; cp. Md. I, *54b*. *d* T., Vi., Bh. धर्मधारिणी.
30. *b* Vā-2—लोकानुपा—. *d* T., Vi. पुनाति भु—.
31. *b* —हस्तैः समुत्थितैः J. *c* and *d*: T. आजुहावास्य संसिद्ध्यै सुप्रसादादरेव सा; आजुहावार्थसिद्ध्यै तं J.; आजुहावास्य संसिद्धौ सुप्रसादादरेव सा Vi.
33. *b* तटमुपागतै Bh., G. *c* प्रीत्येव तमभी—Bh., G., Vi.
34. *a*—भ्युपेत्य तापार्तो Bh., G., T., Vi. *c* विपदा परिभूतः किं व्यवस्यति—Bh., G.

गङ्गावारिणि कल्याणकारिणि श्रमहारिणि ।
स मग्नो निर्वृतिं प्राप पुण्यकारिणि तारिणि ।। ३५ ।।
तत्र माहेश्वरं धाम संचक्राम हविर्भुजः ।
गङ्गायामिद्धभङ्गायामन्तस्तापविपद्धृति ।। ३६ ।।
कृशानुरेतसो रेतस्यादृते सरिता तया ।
निश्चक्राम ततः सौख्यं हव्यवाहो वहन् बहु ।। ३७ ।।
सुधासारैरिवाम्भोभिः परिषिक्तो हुताशनः ।
यथागतं जगामाथ परां निर्वृतिमादधत् ।। ३८ ।।
सा सुदुर्विषहं कामं धाम कामजितो महत् ।
आदधाना परीतापमवाप व्योमवाहिनी ।। ३९ ।।
बहिरार्ता युगान्ताग्नेस्तप्तानीव शिखाशतैः ।
हित्वोष्णानि जलान्यस्या निर्जग्मुर्जलजन्तवः ।। ४० ।।
तेजसा तेन रौद्रेण तप्तानि सलिलान्यपि ।
समुदञ्चन्ति चण्डानि दुर्भराणि बभार सा ।। ४१ ।।
जगच्चक्षुषि चण्डांशौ किंचिदभ्युदयोन्मुखे ।
जग्मुः षट् कृत्तिका माघे मासि स्नातु सुरापगाम् ।। ४२ ।।

35. *d* पुण्यभारिणि तारिणि G., J., Bh., S.

36. Vā-2, P-1 omit verses 36–40. *c* and *d*: गङ्गायामुत्तरङ्गायाम्— J. *d* So J., S.; others—विपद्धृतः; —मन्तस्तापभिदाभृति Bh., G.

37. *b*—रेतस्याहृते T., Vi., note confusion of दृ—हृ; cp. note on गल्दा—गल्हा in my *Atharva-Prātiśākhya*, Intr., p. 65.

38. *b*—रभिषिक्तो—G., J.

39. *a* J., S. have गङ्गा कामं. Bh. reads 38-39 :

सुधासारैरिवोदारैरभिषिक्तो हुताशनः ।
यथागतं जगामाथ परां निर्वृतिमादधत् ।। ३८ ।।
सुधासारैरिवाम्भोभिः परिषिक्तो हुताशनः ।
आदधाना परीतापमवाप व्योमवाहिनी ।। ३९ ।।

41. *d* दुर्धराणि J., S.

शुभ्रैरभ्रंकषैरूर्मिशतैः स्वर्गमनं सताम् ।
कथयन्तीमिवालोकावगाह्याचमनादिना ॥ ४३ ॥
सुस्नातानां मुनीन्द्राणां बलिकर्मोचितैरलम् ।
बहिः पुष्पोत्करैः कीर्णतीरां दूर्वाक्षतान्वितैः ॥ ४४ ॥
ब्रह्मध्यानपरैर्योगिवरैर्ब्रह्मासनस्थितैः ।
योगनिद्रां गतैर्भोगिभोगबद्धैरुपाश्रिताम् ॥ ४५ ॥
पादाङ्गुष्ठाग्रभूमिष्ठैः सूर्यसंविष्टदृष्टिभिः ।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपसेविताम् ॥ ४६ ॥
अथ दैवीं धुनीं देवीमभ्यनन्दन् विलोक्य ताः ।
कं नाभिनन्दयत्येषा दृष्टा पीयूषवाहिनी ॥ ४७ ॥

43. *b* and *d* :

—शतैः स्वर्गनिवासिनाम् ।
कथयन्तीमिवालोकावगाह्याचमनादिकम् ॥
—J., S.

45. So Vā-2.; G. reads :

परैर्योगिवरैर्ब्रह्मासनस्थितैः ।
योगनिद्रागतैर्भोगिभोगयुक्तैरुपाश्रिताम् ॥

J., S. :

परैर्योगपरैर्ब्रह्मासनस्थितैः ।
योगनिद्रागतैर्योगपदबन्धैरुपाश्रिताम् ॥

T., Vi. :

परैर्योगपरैः पद्मासनस्थितैः ।
योगनिद्रां गतैर्भोगिभोगबद्धैरुपाश्रिताम् ॥

46. *a* So G., Bh., Va-2, P-1, Vi. ; —भूयिष्ठैः T. ; —भूमिस्थैः J., S. *b*—सबद्धदृष्टिभिः J., S.

47. *a* So Bh., G.; दिव्यां नदीं देवीम् J., S., Vā-2 ; —दैवीं धुनीं T., Vi. *c* So J., S., T., Vi.; Vā-2, Bh. किं ना—. *d* देवी पी—G., S., T., Vi.

चन्द्रचूडामणिर्देवो यामुद्वहति मूर्धनि ।
यस्या विलोकनं पुण्यं श्रद्दधुस्तां मुदा हृदि ।। ४८ ।।
दिष्ट्या विष्णुपदीं देवीं निर्वाणपददेशिनीम् ।
निर्धूतकल्मषां मूर्ध्ना सुप्रह्वास्ता ववन्दिरे ।। ४९ ।।
सौभाग्यैः खलु सुप्रापां मोक्षप्रतिभुवं सतीम् ।
भक्त्या प्रतुष्टुवुस्तां ताः श्रद्दधाना दिवो धुनीम् ।। ५० ।।
मुक्तिस्त्रीसङ्गदौत्यज्ञैस्तत्र ता विमलैर्जलैः ।
प्रक्षालितमलाः सस्नुः सुस्नातास्तपसान्विताः ।। ५१ ।।
स्नात्वा तत्र सुलभ्यायां भाग्यैः परिपचेलिमैः ।
चरितार्थं स्वमात्मानं बहु ता मेनिरे मुदा ।। ५२ ।।
कृशानुरेतसो रेतस्तासामभि कलेवरम् ।
अमोघं संचचाराथ सद्यो गङ्गावगाहनात् ।। ५३ ।।
रौद्रं सुदुर्धरं धाम दधाना दहनात्मकम् ।
परितापमवापुस्ता मग्ना इव विषाम्बुधौ ।। ५४ ।।
अक्षमा दुर्वहं वोढुमम्बुनो बहिरातुराः ।
अग्निं ज्वलन्तमन्तस्ता दधाना इव निर्ययुः ।। ५५ ।।

48. *c* तस्या वि—G., T., Vi.; तस्यावलो Bh. *d* So majority, श्रद्दधुस्ता मु—; cp. 49*d*, 50*d*.

49. *a* So T., Vi. *b*—पददर्शिनीम् Bh., G. *d*—ह्वास्तां Vi.

50. So Vā-2, J.; सभाग्यैः Bh.; स्वभाग्यैः खलु सुप्राप्तां T., Vi. *b* The use of सती is significant, for it designates Pārvatī (=*parvatasyāpatyam*, sister of Gaṅgā); —भुवं सताम् Bh., Vi. *c* भक्त्यात्र तुष्टुवु—J., S., T., Vi. *d* श्रद्दधानाः सिषेविरे Bh., G., J., T., Vi.

51. Omitted by Vā-2 but shown on margin by P-1. *a*—दूत्यज्ञैः J., S. *b* तत्र भागविमलैर्जलैः Bh., G.

52. *a*—तत्र सुरम्यायां T., Vi., but cp. सुप्रापां in 15. *c* and *d*: So Vā-2, P-1, J. and majority; चरितार्थमिवात्मानं T., Vi. *d* बहुला मे—Bh., G.

55. *c*—न्तमन्तःस्थ T., Vi. For *c* and *d* Bh., G. read :

निर्ययुः सहिताः शीघ्रं कृत्तिका विस्मयान्विताः ।।

अमोघं शांभवं बीजं सद्यो नद्योज्झितं महत् ।
तासामभ्युदरं दीप्तं स्थितं गर्भत्वमागमत् ॥ ५६ ॥
सुज्ञा विज्ञाय ता गर्भीभूतं तद् वोढुमक्षमाः ।
विषादमदधुः सद्यो गाढं भर्तृभिया ह्रिया ॥ ५७ ॥
ततः शरवणे सार्धं भयेन व्रीडया सह ।
तद् गर्भजातमुत्सृज्य ता गृहानभितो ययुः ॥ ५८ ॥
ताभिस्तत्रामृतकरकलाकोमलं भासमानं
तन्निक्षिप्तं क्षणमभिनभो गर्भमभ्युज्जिहानैः ।
स्वैस्तेजोभिर्दिनपतिशतस्पर्धमानैरमानैर्
वक्त्रैः षड्भिः स्मरहरगुरुस्पर्धया चाजनीव ॥ ५९ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ कार्त्तिकेयोत्पत्तिर्नाम दशमः सर्गः ॥

56. *b*—नद्या स्थितं महत् T., Vi.

57. *b* So Bh.; others गर्भभूतं. *d*—भयाद् घ्रिया T., Vi. After this Bh., G., T., Vi. add :

अकाममरणं जातमकाण्ड भाविनोऽर्थतः ।
संभूयान्योन्यमात्मानं शुशुचुस्तास्तदाविलम् ॥

This is omitted by Vā-2, P-1.

58. T., Vi. read :

ततः शरवणे शापभयेन व्रीडया सह ।
तद् गर्भजातमुत्सृज्य ता गृहानभितो ययुः ॥

J., S. :

ततः शरवणे सार्धं भयेन व्रीडया च ताः ।
तद्गर्भजातमुत्सृज्य स्वान् गृहानभिनिर्ययुः ॥

59. *b* तद्विक्षिप्तं J., S., Vā-2. *c*—दिनकरशत—G., T., Vi. *d*—स्मरहरशिरःस्पर्धयेव प्रपेदे G., T., Vi. For *c* and *d* Bh. has :

तैस्तेजोभिर्दिनकरशतस्पर्धमानैरमानैर्
वक्त्रं षड्भिः स्मरहरशिरःस्पर्धयेव प्रपेदे ॥

Colophon : J., S., T. इति श्रीकालिदासकृतौ कुमारसंभवे कुमारोत्पत्तिर्नाम दशमः सर्गः; Vi. इति कुमारसंभवे दशमः सर्गः.

॥ एकादशः सर्गः ॥

अभ्यर्थ्यमाना विबुधैः समग्रैः
प्रह्वैः सुरेन्द्रप्रमुखैरुपेत्य ।
तं पाययामास सुधातिपूर्णं
सुरापगा स्वस्तनमाशु मूर्ता ॥ १ ॥
पिबन् स तस्याः स्तनयोः सुधौघं
क्षणं क्षणं साधु समेधमानः ।
प्रापाकृतिं कामपि षड्भिरेत्य
निषेव्यमाणः खलु कृत्तिकाभिः ॥ २ ॥
भागीरथीपावककृत्तिकानाम्
आनन्दवाष्पाकुललोचनानाम् ।
तं नन्दनं दिव्यमुपात्तुमासीत्
परस्परं प्रौढतरो विवादः ॥ ३ ॥
अत्रान्तरे पर्वतराजपुत्र्या
समं शिवः स्वैरविहारहेतोः ।
नभो विमानेन विगाहमानो
मनोऽतिवेगेन जगाम तत्र ॥ ४ ॥
निसर्गवात्सल्यवशाद् विवृद्ध-
चेतःप्रमोदौ गलदश्रुनेत्रौ ।
अपश्यतां तं गिरिजागिरीशौ
षडाननं तद्दिनजातमात्रम् ॥ ५ ॥

1. *c* T., Vi.—घाभिपूर्णं; cp. सुपूर्णं 14*d*. *d* T., Vi. धात्री.
2. *c* T., Vi.—रेष.
4. *d* Bh. मनोनिवेगेन.
5. *a* T., Vi निसर्गवात्सल्यविवृद्धचेतः पृथुप्र—. *d* So T., Vi.; cp. the last śloka of the canto षष्ठे दिने etc. Vā-2, S., Bh षड्दिनजातमात्रम्.

अथाह देवी शशिखण्डमौलिं
कोऽयं शिशुर्दिव्यवपुः पुरस्तात् ।
कस्याथवा धन्यतमस्य पुंसो
मातास्य का भाग्यवतीषु धुर्या ।। ६ ।।
स्वर्गापगासावनलाऽयमताः
षट् कृत्तिकाः किं कलहायमानाः ।
पुत्रो ममायं न तवायमित्थं
मिथोऽतिवैलक्ष्यमुदाहरन्ति ।। ७ ।।
एतेषु कस्येदमपत्यमीशा-
खिलत्रिलोकीतिलकायमानम् ।
अन्यस्य कस्याप्यथ देवदैत्य-
गन्धर्वसिद्धोरगराक्षसेषु ।। ८ ।।
श्रुत्वेति वाचं हृदयप्रियायाः
कौतूहलिन्या विमलस्मितश्रीः ।
सान्द्रप्रमोदोदयसौख्यहेतु-
भूतं वचोऽवोचत चन्द्रचूडः ।। ९ ।।
जगत्त्रयीनन्दन एष वीरः
प्रवीरमातुस्तव नन्दनोऽस्ति ।
कल्याणि कल्याणकरः सुराणां
त्वत्तोऽपरस्याः कथमेष सर्गः ।। १० ।।
देवि त्वमेवास्य निदानमाद्ये
सर्गे जगन्मङ्गलगानहेतोः ।
सत्यं त्वमेवेति विचारयस्व
रत्नाकरे युज्यत एव रत्नम् ।। ११ ।।

7. *d* G., Bh.—हरन्ते.

9. *a* G., S. वाक्य.

10. *a* Bh. जगत्त्रयानन्दन एष—. *b* G., T., Vi. प्रवीरमातस्तव नन्दनोऽयम्; so Bh. with—नन्दनोऽस्ति.

11. *a* निदानमास्ते S.;—नमार्ये T., Vi. *b* T., Vi. स्वर्गे ज—.

अतः शृणुष्वावहितेन वृत्तं
बीजं यदग्नौ निहितं मया तत् ।
संक्रान्तमन्तस्त्रिदशापगायां
ततोऽवगाहे सति कृत्तिकासु ।। १२ ।।
गर्भत्वमाप्तं तदमोघमेतत्
ताभिः शरस्तम्बमधि न्यधायि ।
बभूव तत्रायमभूतपूर्वो
महोत्सवोऽशेषचराचरस्य ।। १३ ।।
अशेषविश्वप्रियदर्शनेन
धुर्या त्वमेतेन सुपुत्रिणीनाम् ।
अलं विलम्ब्याचलराजपुत्रि .
सुपूर्णमुत्सङ्गतलं विधेहि ।। १४ ।।
अथेतिवादिन्यमृतांशुमौलौ
शैलेन्द्रपुत्री रभसेन सद्यः ।
सान्द्रप्रमोदेन सुपीनगात्री
धात्री समग्रस्य चराचरस्य ।। १५ ।।
किरीटबद्धाञ्जलिभिर्नभःस्थैर्
नमस्कृता सत्वरनाकिलोकैः ।
विमानतोऽवातरदात्मजं तं
ग्रहीतुमुत्कण्ठितमानमाभूत् ।। १६ ।।
स्वर्गापगापावककृत्तिकादीन्
कृताञ्जलीनानमतोऽपि भूयः ।

12. *a* Bh. अत्र शृणुष्वा—. *c* G., Bh त्रिदिवापगायां. *d* T , Vi. विगाहे सति; cp. note on I, 1.

14. *d* So Bh., T., Vi.; Vā-2, S., G. स्वपुत्रमुत्सङ्गतल निधेहि.

15. *d* Vā-2, S. समस्तस्य.

16. *b* T., Vi.—नाकलोकैः. *d* Bh. गृहीतु—.

17. *b* G., Bh. मूर्ध्ना; T., Vi. भूम्ना. *c* G., T., Vi., Bh. सुकान्तं—. *d* So T., Vi.; others का; cp.—कस्य चेतः, 20.

हित्वोत्सुका तं सुतमाससाद
पुत्रोत्सवे माद्यति को न हर्षात् ॥ १७ ॥
प्रमोदबाष्पाकुललोचना सा
न तं ददर्श क्षणमग्रतोऽपि ।
परिस्पृशन्ती करकुड्मलाभ्यां
सुखान्तरं प्राप किमप्यपूर्वम् ॥ १८ ॥
स विस्मयानन्दविकस्वरायाः
शिशुर्गलद्बाष्पतरङ्गितायाः ।
विवृद्धवात्सल्यरसोत्तराया
देव्या दृशो गोचरतां जगाम ॥ १९ ॥
तमीक्षमाणा क्षणमीक्षणानां
सहस्रमाप्तुं विनिमेषमैच्छत् ।
सुनन्दनालोकनमङ्गलेषु
क्षणं क्षणं तृप्यति कस्य चेतः ॥ २० ॥
विनम्रदेवासुरपृष्ठगाभ्याम्
आदाय तं पाणिसरोरुहाभ्याम् ।
नवोदयत्पार्वणचन्द्रचारुं
गौरी स्वमुत्सङ्गतलं निनाय ॥ २१ ॥
स्वमङ्कमारोप्य सुधानिधानम्
इवात्मनो नन्दनमिन्दुवक्त्रा ।
तमेकदेवं जगदेकदेवी
बभूव पूज्या धुरि पुत्रिणीनाम् ॥ २२ ॥

18. *c* So Vā-2, T., Vi.; others कुड्मलेन; cp. 21 पाणिसरोरुहाभ्यां in all.

19. *a* S., G., P-1, Bh. सुविस्म—. *d* G., S., Bh. दृशोर्गोच—.

20. *c* So T., Vi.; G., Bh. न नन्दना—; S., Vā-2 सानन्दनालोकन—; cp. 27*a* and above सुविस्मया—. *d* Bh.—हृष्यति कस्य चेतः.

21. *c* So G., Bh.; T., Vi. महोदयात् पार्वण—; others नवोदयं पा—. *d* Bh. तमुत्सङ्गतलं—.

22. *c* So T., Vi.; others तमेकमेषा जगदेकवीरं.

निसर्गवात्सल्यरसौघसिक्ता
सान्द्रप्रमोदामृतपूरपूर्णा ।
तमेकपुत्रं जगदेकमाता-
भ्युत्सङ्गिनं प्रस्नविणी बभूव ।। २३ ।।
अशेषलोकत्रयमातुरस्याः
षाण्मातुरः स्तन्यसुधामधासीत् ।
सुरस्रवन्त्यानलकृत्तिकाभिर्
मुहुर्मुहुः सस्पृहमीक्ष्यमाणः ।। २४ ।।
सुखाश्रुपूर्णेन मृगाङ्कमौलेः
कलत्रमेकेन मुखाम्बुजेन ।
तस्यैकनालाद्गतपञ्चपद्म-
लक्ष्मीं क्रमात् षड्वदनीं चुचुम्ब ।। २५ ।।
हैमं फलं हेमगिरेर्लतेव
विकस्वरं नाकनदीव पद्मम् ।
पूर्वेव दिङ् नूतनमिन्दुमाभात्
तं पार्वती नन्दनमादधाना ।। २६ ।।
प्रीतात्मना सुप्रयतेन दत्त-
हस्तावलम्बा शशिशेखरेण ।
कुमारमुत्सङ्गतले दधाना
विमानमभ्रंलिहमारुरोह ।। २७ ।।

23. *c* G., Bh. तमेकमेव जगदेकदेवी—. *d* T., Vi. (—माता—) मुत्सङ्गिनं; Bh.—भ्युत्सङ्गिनं प्रस्नविनी—.

24. *c* S. सुरस्रवन्त्याः किल—; Vā-2—स्रवन्त्या किल—.

25. *c* T., Vi.—कनालोद्गमपञ्च—. *d* Bh. चुचुम्बे.

26. *a* So T., Vi., G.; others हैमी फलं.

27. *a* So all except S. with सा प्रयतेन; for a similar confusion cp. 19*a*, 20*c*, 40*a*.

महेश्वरोऽपि प्रमदप्ररूढ-
रोमोद्गमो भूधरनन्दनायाः ।
अङ्कादुपादत्त तदङ्कतः सा
तस्यास्तु सोऽप्यात्मजवत्सलत्वात् ।। २८ ।।
दधानया नेत्रसुधैकसत्रं
पुत्रं पवित्रं सुतया तयाद्रेः ।
संश्लिष्यमाणः शशिखण्डधारी
विमानवेगेन गृहान् जगाम ।। २९ ।।
अधिष्ठितः स्फाटिकशैलशृङ्गे
तुङ्गे निजं धाम निकामरम्यम् ।
महोत्सवाय प्रमथप्रमुख्यान्
पृथून् गणान् शंभुरथादिदेश ।। ३० ।।
पृथुप्रमोदप्रगुणो गणानां
गणः समग्रो वृषवाहनस्य ।
गिरीन्द्रपुत्र्यास् तनयस्य जन्म-
न्यथोत्सवं संववृते विधातुम् ।। ३१ ।।

28. *c* T., Vi. : अकाण्डमादत्त तमङ्कत. म
तस्यास्तु सौम्यात्मजवत्सलत्वात् ।।

G. agrees with ours except—मोऽप्यात्मज—.

29. *a* So Vā-2, P-1, S., G. (सत्रं मदादानम्=नेत्रयोरमृतवत् सुखदातारम्); T., Vi. दत्त्वानया नेत्रसुधैकपात्रं. *b* T., Vi.—सुतया तथाद्रेः. *c* G., Bh —खण्डमौलिः. *d* T., Vi. गृहम्; Bh. ग्रहान्.

30. G., Bh.—ष्ठितस्फाटिक—. *b* T. तुङ्गे निजे धामनि कामरम्ये; Vi. agrees with T. except in कालरम्ये; Bh. तुङ्गे निजे धाम्नि निकामरम्ये. *c* and *d* : T. reads:

महोत्सवाय प्रमथान् स नाथः
पृथून् महिम्ना स्वमुदादिदेश ।।

Bh., G. : महोत्सवाय प्रमथान् सनाथः
पृथून् प्रथिम्ना पृथगादिदेश ।

31. *a* So Vā-2, P-1, G., Bh.; T., Vi. पृथुप्रमोदः प्रगुणो गणानां.

स्फुरन्मरीचिच्छुरिताम्बराणि
संतानशाखिप्रसवाञ्चितानि ।
उच्चिक्षिपुः काञ्चनतोरणानि
गणा वराणि स्फटिकालयेषु ।। ३२ ।।
दिक्षु प्रसर्पस्तदधीश्वराणाम्
अथामराणामिव नाकिलोके ।
महोत्सवं शंसितुमाहतोऽन्यैर्
दध्वान धीरं पटहः पटीयान् ।। ३३ ।।
महोत्सवे तत्र समागतानां
गन्धर्वविद्याधरसुन्दरीणाम् ।
संभावितानां गिरिराजपुत्र्या
गृहेऽभवन्मङ्गलगीतकानि ।। ३४ ।।
सुमङ्गलोपायनमात्रहस्तास्
तं मातरो मातृवदभ्युपेताः ।
निधाय दूर्वाक्षतकानि मूर्ध्नि
निन्युः स्वमङ्कं गिरिजातनूजम् ।। ३५ ।।
ध्वनत्सु तूर्येषु सुमन्द्रमङ्क्या-
लिङ्ग्योर्ध्वकेष्वप्सरसो रसेन ।
सुसंधिबन्धं ननृतुः सवृत्ति
गीतानुगं भावरसानुविद्धम् ।। ३६ ।।
वाता ववुः सौख्यकराः प्रसेदुर्
आशा विधूमो हुतभूग् दिदीपे ।
जलान्यभूवन् विमलानि तत्रो-
त्सवेऽन्तरिक्षं प्रससाद सद्यः ।। ३७ ।।

32. *c* Bh. विचिक्षिपुः. *d* T., Vi. गणाश्चलानि.

33. *b* So G.. Bh.;—मिव मध्यलोके in S., Vā-2. *d* S. धीरः; śloka omitted by T., Vi.

35. *b* T., Vi.—दभ्युपेत्य.

36. *c* So Bh.; Vā-2, P-1, S. सुवृत्तगीता—('सुवृत्तानि शोभनच्छन्दांसि गीतानि'); G. सवृत्ति गीतं for which cp. VII, 91 व्यञ्जितवृत्तिभेदं; T., Vi. सुतन्त्रिगीतानुगं.

गम्भीरशङ्खध्वनिमिश्रमुच्चैर्
गृहोद्भवा दुन्दुभयः प्रणेदुः ।
दिवौकसां व्योम्नि विमानसंघा
विमुच्य पुष्पप्रचयान् प्रसस्रुः ।। ३८ ।।
इत्थं महेशाद्रिसुतासुतस्य
जन्मोत्सवे संमदयांचकार ।
चराचरं विश्वमशेषमेतत्
परं चकम्पे किल तारकश्रीः ।। ३९ ।।
ततः कुमारः स मुदां निदानैः
स्वबाललीलाचरितैर्विचित्रैः ।
गिरीशगौर्योर्हृदयं जहार
मुदे न हृद्या किमु बालकेलिः ।। ४० ।।
महेश्वरः शैलसुता च हर्षात्
सतर्षमेकेन मुखेन गाढम् ।
अजातदन्तानि मुखानि सूनोर्
मनोहराणि क्रमतश्चुचुम्ब ।। ४१ ।।
क्वचित् स्खलद्भिः क्वचिदस्खलद्भिः
क्वचित् प्रकम्पैः क्वचिदप्रकम्पैः ।

38. *a* Bh., G.—शब्दध्वनि—. *b* So Vā-2, P-1; Bh. and others दिवि ध्रुवा—. *d* T., Vi विमुञ्चतां पुष्पचयान्.

39. *b* T., Vi., G., Bh. जन्मोत्सवः.

40. *a* Vā-2, P-1, S., Bh. सुमुदां ; cp. note on 27*a*; T., Vi. समुदी. *b* Vā-2, P-1, G., S., Bh. स बाल—; Bh. स बाललीलाललितै—. *d* Vā-2, P-1—किल बाल—may be मुदे नु हृद्या किल बालकेलिः.

41. *a* and *b* : T., Vi. :

महेश्वरः शैलसुतापि हर्षात्
सहर्षमेकेन मुखेन गाढम् ।

So Bh., G. except in सतर्षम् (for ससर्ष्वम्). *c* and *d* : Bh. : अजातदन्तानि मनोहराणि वक्त्राणि सूनोः क्रमतश्चुचुम्बे.

42. *c* T., Vi. बालः सलीलं च—. *d* S. तयोर्मुदं वर्धयति स्म पित्रोः, III.

बालः स लीलाचलनप्रयोगैस्
तयोर्मुदं कन्दलयांचकार ।। ४२ ।।
अहेतुहासच्छुरिताननेन्दुर्
गृहाङ्गणक्रीडनधूलिधूम्रः ।
मुहुर्वदन् किंचिदलक्षितार्थं
मुदं तयोरङ्कगतस्ततान ।। ४३ ।।
गृह्णन् विषाणे हरवाहनस्य
स्पृशन्नुमाकेसरिणः सटालीः ।
स भृङ्गिणः सूक्ष्मतरं शिखाग्रं
कर्षन् बभूव प्रमदाय पित्रोः ।। ४४ ।।
एको नव द्वौ दश पञ्च सप्ते-
त्यजीगणन् मञ्जु मुखं प्रसार्य ।
महेशकण्ठोरगदन्तपंक्तिं
तदङ्कगः शैशवनुन्नभीतिः ।। ४५ ।।
कपर्दिकण्ठान्तकपालदाम्नो-
ऽङ्गुलिं प्रवेश्याननकोटरेषु ।
दन्तानुपात्तुं रभसीबभूव
मुक्ताफलभ्रान्तिकरान् कुमारः ।। ४६ ।।

43. *b* T., Vi., G. गेहाङ्गणक्रीडन—, so Bh. with —ङ्गन —; cp. *Aś.*, VII, 17.

44. *b* Vā-2, P-1, S.—केसरिणं सलीलम्; cp. आमर्दक्लिष्टकेसरम् *Aś.*, VII, 14.

45. Vā-2, P-1, S. अजीगणन्नात्ममुखं (—णत् नात्म—? Comm. in S. leaves ना—unexplained). *d* So G., Bh.; Vā-2, P-1, S. शैशवमौग्ध्यमैशिः ("शैशवमौग्ध्यं बालत्वनिमित्तमूढतां दधानः); T., Vi. शैशवमुग्धमैशिः; Bh. तदङ्गगः शैशव—.

46. *d* So T., Vi.; Bh., G.—भ्रान्तिधरः कुमारः; Vā-2, P-1, S. —भ्रान्तिकरः कुमारः.

शंभोः शिरोऽन्तः सरितस्तरङ्गान्
विगाह्य गाढं शिशिरान् रसेन ।
स जातजाड्यं निजपाणिपद्मम्
अतापयद् भालविलोचनाग्नौ ॥ ४७ ॥

किंचित् कलं भङ्गुरकन्धरः स
नमज्जटाजूटधरस्य शंभोः ।
प्रलम्बमानं किल कौतुकेन
चिरं चुचुम्बे मुकुटेन्दुखण्डम् ॥ ४८ ॥

इत्थं शिशोः शैशवकेलिवृत्तैर्
मनोऽभिरामैर्गिरिजागिरीशौ ।
मनोविनोदैकरसप्रसक्तौ
दिवानिशं नाविदतां कदाचित् ॥ ४९ ॥

इति बहुविधं बालक्रीडाविचित्रविचेष्टितम्
ललितललितं सान्द्रानन्दं मनोहरमाचरन् ।
अलभत परां बुद्धिं षष्ठे दिने नवयौवनं
स किल सकलं शस्त्रं शास्त्रं विवेद विभोरपि ॥ ५० ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ बालक्रीडावर्णनं नामैकादशः सर्गः ॥

47. *c* So Vā-2, P-1, Bh., S., G.; T., Vi. संजातजाड्यो.

48. *a* So Vā-2, P-1; G., Bh.—कन्धरस्य; so S. in text but cp. commentary "भङ्गुरा पतनशीला कन्धरा यस्य, बालत्वात् स कुमारः", the usual divergence between text and commentary; T., V. भङ्गुरकण्ठरम्यनमज्जटा—.

49. *c* T., Vi. मुदा विनोदैक—.

50. *c* So Vā-2, P-1, S.; T., Vi., Bh., G. वृद्धिं. *d* So T., Vi., Bh., G.; others विभुर्यया.

Colophon: T. इति कुमारसंभवे कुमारकौमारवर्णनो नामैकादशः सर्गः; so Vi. except—वर्णनं—; G. इति श्रीकुमारसंभवे . . . कार्तिकेयबालक्रीडावर्णनं नाम . . ., so Bh.; S . . . कुमारोत्पत्तिर्नामैका—.

॥ द्वादशः सर्गः ॥

अथ प्रपेदे त्रिदशैरशेषैः
क्रूरासुरोपप्लवदुःखितात्मा ।
पुलोमपुत्रीदयितोऽन्धकारिं
तृषातुरश्चातकवत् पयोदम् ॥ १ ॥

दृप्तासुरत्रासखिलीकृतात् स
कथंचिदम्भोदविहारमार्गात् ।
अवाततारामि गिरिं गिरीश-
गौरीपदन्यासविशुद्धमिन्द्रः ॥ २ ॥

संक्रन्दनः स्यन्दनतोऽवतीर्य
मेघात्मनो मातलिदत्तहस्तः ।
पिनाकिनोऽथालयमुच्चचाल
शुचौ पिपासाकुलितो यथाम्भः ॥ ३ ॥

इतस्ततोऽथ प्रतिबिम्बभाजं
विलोकमानः स्फटिकाद्रिभूमौ ।
आत्मानमप्येकमनेकधा स
व्रजन् विभोरास्पदमाससाद ॥ ४ ॥

विचित्रचञ्चन्मणिभङ्गिसङ्गं
सौवर्णदण्डं दधतातिचण्डम् ।
स नन्दिनाधिष्ठितमध्यतिष्ठत्
सौधाङ्गणद्वारमनङ्गशत्रोः ॥ ५ ॥

1. *d* So T., Vi., Bh.; Vā-2, P-1 पक्षीव तृष्णाव्यथितः पयोदम्; S. पत्रीव तृष्णातुरितः पयोदम्.
2. *a* So T., Vi., Bh.; Vā-2, P-1, S. दृप्तारिसंत्रास—.
3. *c* T., Vi. पिनाकिरम्यालयमु—. *d* T., Vi., Bh.—साकुलवज्जलौघम्.
4. *a* T., Vi., Bh.—ततोऽपि.
5. *a* and *b*: T., Vi., Bh. विचित्रचञ्चन्मणिभङ्गिसङ्गिसौवर्णदण्डं.
d Bh. सौधाङ्गन—.

ततः स कक्षाहितहेमदण्डो
नन्दी सुरेन्द्रं प्रतिपद्य सद्यः ।
प्रतोषयामास सुगौरवेण
गत्वा शशंस स्वयमीश्वरस्य ॥ ६ ॥

भ्रूसंज्ञयानेन कृताभ्यनुज्ञः
सुरेश्वरं तं जगदीश्वरेण ।
प्रवेशयामास सुरैः पुरोगः
समं स नन्दी सदनं हरस्य ॥ ७ ॥

स चण्डिभृङ्गिप्रमुखैर्गरिष्ठैर्
गणैरनेकैर्विविधस्वरूपैः ।
अधिष्ठितायां सदि रत्नमय्यां
सहस्रनेत्रः शिवमालुलोके ॥ ८ ॥

कपर्दमुद्बद्धमहीनमूर्ध-
रत्नांशुभिर्भासुरमुल्लसद्भिः ।
दधानमुच्चैस्तरमिद्धधातोः
सुमेरुशृङ्गस्य समत्वमाप्तम् ॥ ९ ॥

बिभ्राणमुत्तुङ्गतरङ्गमालां
गङ्गां जटाजूटतटं भजन्तीम् ।
गौरीं तदुत्सङ्गजुषं हसन्तीम्
इव स्वफेनैः शरदभ्रशुभ्रैः ॥ १० ॥

6. *a* So Bh. alone; cp. 27. *c* Bh. स गौरवेण. *d* So Bh., Vā-2, P-1, S.; गत्वा सदोमण्डलमीश्वरस्य T., Vi.

7. *a* T., Vi. भ्रूसंज्ञया तेन. *d* Vā-2, P-1, S. मदनं सदस्य (=सत्+अस्य).

8. *a* Bh. स चण्डभृङ्गि—. *c* So Bh. alone; others अधिष्ठितं संसदि रत्नवत्यां (and रत्नमय्याम्). *d* T., Vi.—लोकः.

9. *a* and *b*: Vā-2, P-1—महीनमूर्ध्वं—(=अहि+इनम्; ऊर्ध्वरत्नांशुभिः); Bh.—र्दमुद्बन्धमहाहिमूर्धर—; T., Vi. कन्दर्पमूर्धस्थमहाहिमूर्ध्वं—(र्ध ?) रत्नांशुभि—.

10. *a* T., Vi.—उत्तुङ्गकपालमालां. *b* T., Vi.—जूटतलं.

गङ्गातरङ्गप्रतिबिम्बितैः स्वैर्-
बहूभवन्तं शिरसा सुधांशुम् ।
ज्वलन्मरीचिप्रचयैस्तुषार-
गौरैर्हिमद्योतिनमुद्वहन्तम् ॥ ११ ॥
भालस्थले लोचनमेधमान-
धामाधरीभूतरवीन्दुनेत्रम् ।
युगान्तकालोचितहव्यवाहं
मीनध्वजप्लोषणमादधानम् ॥ १२ ॥
महार्हरत्नाचितयोरुदार-
स्फुरत्प्रभामण्डलयोः समन्तात् ।
कर्णस्थिताभ्यां शशिभास्कराभ्याम्
उपासितं कुण्डलयोश्छलेन ॥ १३ ॥
स्वबद्धया कण्ठिकयेव नील-
माणिक्यमय्या कुतुकेन गौर्या ।
नीलस्य कण्ठस्य परिस्फुरन्त्या
कान्त्या महत्या सुविराजमानम् ॥ १४ ॥
कालार्दितानां त्रिदशासुराणां
चितारजोभिः परिपाण्डुराङ्गम् ।
महन्महेभाजिनमुद्गताभ्र-
प्रालेयशैलश्रियमुद्वहन्तम् ॥ १५ ॥

11. Bh. omits this śloka. *a* T., Vi.:

गङ्गातरङ्गैः प्रतिबिम्बितैस्तैर्बह्रूभवन्तं शिरसा सुधांशुम् ।
चलन्मरीचिप्रचयैस्तुषारैर्गौरैर्दिगुद्योतिनमुद्वहन्तम् ॥

12. *a* and *b*: so Vā-2, P-1, S., Bh.; T., Vi.—मेधमान धामाधरी—.

13. *a* So Bh.; Vā-2, P-1—न्वितयोरुदारं; S.—रत्नाञ्चितयोरुदारं स्फुरत्प्र—; T., Vi.—रत्नाञ्चितयोरुदारस्फुरत्प्र—; cp. एधमान-धामाधरीभूत—in 12th.

14. *a* and *b*: So Vā-2, P-1, S. (except गौर्याः), while T., Vi., Bh. differ in सुबद्धया.

15. *c* T., Vi.—मुन्नताभ्र—.

पाणिस्थितब्रह्मकपालपात्रं
वैकुण्ठकङ्कालकरालकायम् ।
सुरास्थिखण्डाभरणं रणान्त-
मूलं त्रिशुलं कलयन्तमुच्चैः ॥ १६ ॥
पुरातनीं ब्रह्मकपालमालां
कण्ठे वहन्तं पुनराश्वसन्तीम् ।
उद्गीर्णवेदां मुकुटेन्दुवर्षत्-
सुधाभरौघाप्लवलब्धसंज्ञाम् ॥ १७ ॥
सलीलमङ्कस्थितया गिरीन्द्र-
पुत्र्या नवाष्टापदवल्लिभासा ।
विराजमानं शरदभ्रखण्डं
परिस्फुरन्त्याचिररोचिषेव ॥ १८ ॥
दृप्तान्धकप्राणहरं पिनाकं
महासुरस्त्रीविधवात्वहेतुम् ।
करेण गृह्णन्तमगृह्यमन्यैः
पुरा स्मरप्लोषणकेलिकारम् ॥ १९ ॥
भद्रासनं काञ्चनपादपीठं
महार्हमाणिक्यविभङ्गिचित्रम् ।

16. *b* So T., Vi., G., Bh.; Vā-2, S. वैकुण्ठभाजापि निषेव्यमाणम्. *c* So T., Vi., G., Bh.; Vā-2 नरास्थि—.

17. *b* G. पुनरावसन्तीम्. *c* and *d*: Vā-2, S.—तवेदां; T., Vi.:

उद्गीर्णवेदां मुकुटेन्दुवर्षत्सुधौघसंप्लावनलब्धसंज्ञाम्.

G., Bh. उदीर्णवेदां मुकुटेन्दुवर्षत्सुधौघ—.

18. *b* T., Vi.—पदतुल्यभासा. *d* Bh.—रन्त्या चिर—.

19. *b* So S. (except विधवत्वहेतुम् repeated in comment); Vā-2 माहासुर—; T., Vi., Bh. गजासुरस्त्रीविधवात्व—. *c* and *d*: T., Vi.—न्तमसह्यशूलं पुरासुरप्लोषण—; note the uniform use of केलिकार in all.

20. *a* and *b*: Bh.—पादपीठमहार्ह—(S. comm.: 'the auspicious seat with its feet and back made of gold').

अधिष्ठितं चन्द्रमरीचिगौरैर्
उद्वीज्यमानं चमरैर्गणाभ्याम् ।। २० ।।
शस्त्रास्त्रविद्याभ्यसनावसक्ते
सविस्मयैरेत्य गणैः सुदृष्टे ।
नीराज्यमाने स्फटिकाचलेन
सानन्दनिदिष्टदृशं कुमारे ।। २१ ।।
तथाविधं शैलसुताधिनाथं
पुलोमपुत्रीदयितो निरीक्ष्य ।
आसीत् क्षणं क्षोभपरोऽथ कस्य
मनो न हि क्षुभ्यति धामधाम्नि ।। २२ ।।
विकस्वराम्भोजवनश्रिया तं
दृशां सहस्रेण निरीक्षमाणः ।
सर्वाङ्गजेन द्युपतिर्बभासे
पुष्पोत्कराकीर्ण इवाम्रशाखी ।। २३ ।।
दृष्ट्वा सहस्रेण दृशां महेशम्
अभूत् कृतार्थोऽतितरां महेन्द्रः ।
सर्वाङ्गजातं तदथो विरूपम्
इव प्रियालोपकरं विवेद ।। २४ ।।

21. *a* So Bh.; Vā-2, S.—भ्यसनैकसक्ते; T., Vi.—नैकसक्तैः (सविस्मयैरेत्य गणैः सुदृष्टम्). *c* and *d*: T., Vi. सवीज्यमानेऽम्बिकयाञ्चलेन, rest as ours; Bh.°नीरज्यमानेऽम्बिकयाञ्चलेन; G. नीराज्यमानेऽम्बिकया—.

22. *c* Vi.—क्षोभपरोन्तकस्य; T.—क्षोभपरो नु कस्य; G., Bh.—क्षोभपरोऽत्र कस्य.

23. *c* So G., Bh.; Vā-2, S. रोमालिभिः स्वर्गपतिर्बभासे; T., Vi. सर्वाङ्गनेत्रो द्यु—. *d* Bh., T., Vi. इवाग्रशाखी.

24. *b* T., Vi., Bh., G. अभूत् कृतार्थः खलु तेन शक्रः. *c* and *d*: So Vā-2, S.; T., Vi. have:

सर्वाङ्गजानेत्रदलं विपूरं पुरा प्रियालोकपरं विवेद ।

Bh., G.: सर्वाङ्गजातं विकलं विरूपं पुरा प्रियाकोपपरो विवेद ।

ततः कुमारं कनकाद्रिसारं
पुरंदरः प्रेक्ष्य धृतास्त्रशस्त्रम् ।
महेश्वरोपान्तिकवर्तमानं
शत्रोर्जयाशां मनसा बबन्ध ॥ २५ ॥
श्रीनीलकण्ठ द्युपतिः पुरोऽस्ति
तव प्रणामावसरं प्रतीच्छन् ।
सहस्रनेत्रेऽत्र भव त्रिनेत्र
दृष्ट्वा प्रसादप्रगुणो महेश ॥ २६ ॥
इति प्रबद्धाञ्जलिरेत्य नन्दी
निधाय कक्षामभि हेमवेत्रम् ।
प्रसादपात्रं पुरतो भविष्णुर्
अथ स्मरारातिमुवाच वाचम् ॥ २७ ॥
पुरासुरारिं सुरसंघसेव्यं
त्रिलोकसेव्यस्त्रिपुरासुरारिः ।
प्रीत्या सुधासारविसारिणेव
ततोऽनुजग्राह विलोकनेन ॥ २८ ॥
किरीटकोटिच्युतपारिजात-
पुष्पोत्करेणानमितेन मूर्ध्ना ।
स्वर्गैकवन्द्यो जगदेकवन्द्यं
तं देवदेवं प्रणनाम देवः ॥ २९ ॥

26. *b* T., Vi. त्वयि प्रणामावसरं च पृच्छन्; Bh.—सरंप्रतीक्षन्; G. तव प्रणामावसरं काङ्क्षन्. *c* T., Vi. सहस्रनेत्रोऽत्र—; Bh., G. सहस्रनेत्र प्रसर त्रिनेत्रम्. *d* S. दृष्टया; T., Vi. प्रसादप्रवणो महेश; Bh., G.—प्रवणो महेशः.

27. *b* T., Vi., G. हेमदण्डम्. *d* G., Bh.—ष्णुरधि स्मरा—; T., Vi. —ष्णुमध्यन्धकारातिमु—.

28. *a* S. पुरासुरेन्द्रं; G. मुदासुरेन्द्रं; T. मुदाऽसुरेन्द्रं; Vi. मुदाऽसुरारिं. *b* Bh., T., Vi. त्रैलोक्यसेव्यः. *c* So T., Vi.; Bh. सुधासारणिधारिणेव; G.—विधारिणेव; Vā-2, S.—निधारिणेव.

29. *b* T., Vi.—पुष्पेण भक्त्यानमितेन मूर्ध्ना. *c* Bh. स्वर्गौकवन्द्यो; T., Vi. स्वर्गैकवन्द्योजगदेकदेवं. *d* T., Vi. ननाम देवः स सहस्रनेत्रः.

अनेकलोकैकनमस्क्रियार्हं
महेश्वरं तं त्रिदशेश्वरः सः ।
भक्त्या नमस्कृत्य कृतार्थतायाः
पात्रं पवित्रं परमं बभूव ॥ ३० ॥
सुभक्तिभाजामधि पादपीठं
प्रान्तक्षितेर्नम्रतरैः शिरोभिः ।
ततः प्रणेमुः पुरतो गणानां
गणाः सुराणां क्रमतः पुरारिम् ॥ ३१ ॥
गणोपनीते प्रभुणोपदिष्टे
ध्रुवासने हेममये पुरस्तात् ।
प्रापोपविश्य प्रमुदं सुरेन्द्रः
प्रभुप्रसादो हि मुदे न कस्य ॥ ३२ ॥
क्रमेण चान्येऽपि विलोकनेन
संभाविताः सस्मितमीश्वरेण ।
उपाविशंस्तोषविशेषमाप्ता
दृग्गोचरे तस्य सुराः समग्राः ॥ ३३ ॥
अथाह देवो बलवैरिमुख्यान्
गीर्वाणवर्गान् करुणार्द्रचेताः ।

30. *b* Bh.—त्रिदिवेश्वरः सः.

31. *a* and *b*: So Vā-2; S. has:—पादपीठं प्रान्तक्षितिं नम्र—(comm. finds difficulty in justifying—क्षितिम्); Bh., G.—पीठं प्रान्तीकृतैर्नम्र—; T., Vi.—पीठं प्रीताक्षिभिर्नम्र—. *c* and *d*: So Vā-2, G., S.; T., Vi. ततः प्रणेमुः पुरतः सुराणां गणाः सशङ्काः क्रमतः स्मरारिम्; Bh. agrees with this in *c* but differs in *d*: गणाः सुरेन्द्रक्रमतः पुरारिम्.

32. *b* So G., Bh.; T., Vi. नृपासने; S., Vā-2 शुभासने. *c* T., Vi. प्रमदं. *d* Bh. प्रभोः प्रसादो.

33. *a* Bh.—चान्येन विलोकनेन. *c* Vi. उपाविशुस्तोष—; T. agrees here with ours. *d* T., Vi. पुरः समेता.

34. *b* T., Vi. गीर्वाणमुख्यान्. *c* T., Vi. असुरैर्विधूतान्. *d* T., Vi.: ध्वस्तप्रियान् शीर्णमुखानवेक्ष्य.

कृताञ्जलीकानसुराभिभूतान्
ध्वस्तश्रियः श्रान्तमुखानवेक्ष्य ।। ३४ ।।
अहो बतानन्तपराक्रमाणां
दिवौकसो वीरवरायुधानाम् ।
हिमोदबिन्दुग्लपितस्य किं वः
पद्मस्य दैन्यं दधते मुखानि ।। ३५ ।।
स्वर्गौकसः स्वर्गपरिच्युताः किं
स्वपुण्यराशौ सुमहत्तमेऽपि ।
चिह्नं चिरोढं बत यूयमेते
निजाधिपत्यस्य परित्यजध्वम् ।। ३६ ।।
दिवौकसो देवगृहं विहाय
मनुष्यसाधारणतामवाप्ताः ।
यूयं कुतः कारणतश्चरध्वं
महीतले मानभृतो महान्तः ।। ३७ ।।
अनन्यसाधारणसिद्धमुच्चैस्
तद्दैवतं धाम निकामरम्यम् ।
कस्मादकस्मान्निरगाद् भवद्भ्यश्
चिरार्जितं पुण्यमिवापचारात् ।। ३८ ।।
दिवौकसो वो हृदयस्य कस्मात्
तथाविधं धैर्यमहार्यमार्याः ।

35. *b* T., Vi. दिवौकसां.

36. *b* T., Vi. सुमहत्तरेऽपि. *c* Bh.—चरोढं ननु—.

37. *a* Bh., G. स्वर्गौकसो. *c* Vi. चरध्वे. *d* T., Vi. महीभृतो मानधना महान्तः.

38. *a* and *b*: Vi.—सिद्धमुच्चैः सुदैवतं—. . . निकामकामम्; Bh. तद्दैवतं धाम निकामकाम्यम्; G.—निकायकाम्यम्. *c* and *d*: T., Vi. —निरगाद्यमाद्यैश्चिरार्जितं पुण्यमिवापवादात्; Bh.—निरगादगाधं चिरार्जितं पुण्यमिवापचारात्; so G.

39. T., Vi. omit this śloka. *a* G., Bh. विरुद्धतो वो हृदयस्य—. *d* Bh., G. ग्रीष्मातपापत्तिवशा—.

अगादगाधस्य जलाशयस्य
ग्रीष्मातितापादिवशादिवाम्भः ।। ३९ ।।
सुराः शुनासीरपुरःसराणां
समीयुषां वः सममातुराणाम् ।
तद् ब्रूत लोकत्रयजित्वराः किं
महासुरात् तारकतो विरुद्धम् ।। ४० ।।
पराभवं तस्य महासुरस्य
निषेद्धुमेकोऽहमलंभविष्णुः ।
दावानलप्लोषविपत्तिमन्यो
महाम्बुदात् किं हरते वनानाम् ।। ४१ ।।
इतीरिते मन्मथमर्दनेन
सुराः सुरेन्द्रप्रमुखा मुखेषु ।
सान्द्रप्रमोदाश्रुतरङ्गितेषु
दधुः श्रियं सत्वरमाश्वसन्तः ।। ४२ ।।
ततो गिरीशस्य गिरां विरामे
जगाद लब्धेऽवसरे सुरेशः ।
भवन्ति वाचोऽवसरे प्रयुक्ता
ध्रुवं फलाविष्टमहोदयाय ।। ४३ ।।

40. T. reads: सुराः पुरारातिपुरो विवर्णं समीयिवांसं सममातुराणाम् ।
Vi. has: सुराः पुरारातिपुरः सुवर्णां समीयुषां सामसमातुराणाम् ।
तद्ब्रूतलोकत्रय—
G., Bh.: सुराः शुनासीरपुरःसराणां समीहितं यत् सममातुराणाम् ।
तद् ब्रूत लोकत्रयजित्वराः किं महासुरप्रायकतो विरुद्धम् ।।
S.: सुराः सुराधीशपुरःसराणां; rest as ours.

41. *b* T., Vi. निषेद्धुकामोऽहमलं—. *d* (अ)रण्यस्य हर्तुं जलदात् प्रभुः किम् ?

42. *c* T., Vi. सान्द्रप्रमोदाः सुचिरस्मितेषु.

43. *a* T., Vi. गिरां विताने; cp. II, 53. *d* T., Vi. ध्रुवं प्रविस्पष्टफलोदयाय; Bh., G. ध्रुवं प्रभाविष्टफलोदयाय.

ज्ञानप्रदीपेन तमोऽपहेना-
विनश्वरेणास्खलितप्रभेण ।
भूतं भवद् भावि च यच्च किंचित्
सर्वज्ञ सर्वं तव गोचरं तत् ।। ४४ ।।
दुर्वारदोरुद्यमदुःसहेन
यत्तारकेणामरघस्मरेण ।
तदीशतामाप्तवता निरस्ता
वयं दिवोऽमी बत किं न वेत्सि ।। ४५ ।।
विधेरमोघं स वरप्रसादम्
आसाद्य सद्यस्त्रिजगज्जिगीषुः ।
सुरानशेषानहकप्रमुख्यान्
दोर्दण्डचण्डो मनुते तृणाय ।। ४६ ।।
स्तुत्या पुरास्माभिरुपासितेन
पितामहेनेति निरूपितं नः ।
सेनापतिः संयति दैत्यमेनं
पुरा स्मरारातिसुतो निहन्ति ।। ४७ ।।
अहो ततोऽनन्तरमद्य यावत्
सुदुःसहां तस्य पराभवार्तिम् ।

44. *d* सर्वत्र सर्वं तव गोचरस्तत् T., Vi.

45. *a* T., Vi. दुर्वारदोर्दुर्मददुःसहेन. *c* T., Vi. तदीश नन्वात्मपदान्निरस्ता; Bh., G. तदीश वामाप्लवता निरस्ता. *d* G., Bh., Vā-2, S. —वद किं—.

46. *a* T., Vi., Bh., G. सुवरप्र—. *c* and *d*: सुरान् स जम्भारिमुखान् प्रचण्डदोर्दण्डदण्डो; Bh., G.—स जम्भारिमुरारिमुख्यान् दोर्दण्डचण्डो मनुते—.

47. *d* G. पुरा स्मरारेस्तनयो निहन्ति; Bh. पुरस्मरारे (पुरः स्म—?) स्तनयौ नि—.

48. Vi.: अकामतोऽनन्तरमद्य यावत्
सुरा अदान्तस्य पराभवार्तिम् ।
विषेहिरे तस्य हृदन्तशल्यम्
आज्ञानियोगं त्रि—।।

विषेहिरे हन्त हृदन्तशल्यम्
आज्ञानिवेशं त्रिदिवौकसोऽमी ।। ४८ ।।
निदाघधामक्लमविक्लवानां
नवीनमम्भोदमिवौषधीनाम् ।
सच्चन्दनं नन्दनमात्मनो नः
सेनान्यमेनं स्वयमादिश त्वम् ।। ४९ ।।
त्रैलोक्यलक्ष्मीहृदयैकशल्यं
समूलमुत्खाय महासुरं तम् ।
अस्माकमेषां पुरतो भविष्णुर्
दुःखापहारं युधि यो विधत्ते ।। ५० ।।
महाहवे नाथ तवास्य सूनोः
शस्त्रैः शितैः कृत्तशिरोधराणाम् ।
महासुराणां रमणीविलापैर्
दिशो दशैता मुखरीभवन्तु ।। ५१ ।।
महारणक्षोणिपशूपहारी-
कृतेऽसुरे तत्र तवात्मजेन ।
बन्दिस्थितानां सुदृशां करोतु
वेणीप्रमोकं सुरलोक एषः ।। ५२ ।।

So T. except in अकामतो—.
Bh., G.: अतस्ततोऽनन्तरमद्य यावत्
सुदुःसहं तस्य पराभवं तम् । Rest as ours.

49. Śloka omitted by T., Vi. *c* So Bh., G.; others सुनन्दनं. *d* Bh., G.—मेनं—.

50. *a* Bh.—लक्ष्मीद्वितयैकशल्यं. *c* Vā-2 अस्माकमेषां पुरतो भवन् सन्. *d* Bh., G.—हारं सुधिया विधाता.

51. *b* G., Bh. शस्त्रैः शरैः कृत्त—.

52. *a* Vi.—पशूपहारे कृते; T.—रणक्षोणिपशूपहारे कृते—. *d* T., Vi., Bh., G., S. वेणिप्र—; Vā-2 वेणीप्रमोक्षं.

इत्थं सुरेन्द्रे वदति स्मरारिः
सुरारिदुश्चेष्टितजातरोषः ।
कृतानुकम्पस्त्रिदशेषु तेषु
भूयोऽपि भूताधिपतिर्बभाषे ।। ५३ ।।

अहो अहो देवगणाः सुरेन्द्र-
मुख्याः श्रृणुध्वं वचनं ममैतत् ।
विचेष्टते शंकर एष देव-
कार्याय सज्जः सकलं शुभाय ।। ५४ ।।

पुरा मयाकारि गिरीन्द्रपुत्र्याः
प्रतिग्रहोऽयं नियतात्मनापि ।
तत्रैष हेतुः खलु तद्भवेन
वीरेण यद् वध्यत एष शत्रुः ।। ५५ ।।

अत्रोपपन्नं तदमी नियुज्य
कुमारमेनं पृतनापतित्वे ।
निघ्नन्तु शत्रु सुरलोकमेष
भुनक्तु भूयोऽपि सुरैः सहेन्द्रः ।। ५६ ।।

इत्युदीर्य भगवान् स्वमात्मजं
घोरसंगरमहोत्सवोत्सुकम् ।
नन्दनेहि जहि देवविद्विषं
संयतीति निजगाद शंकरः ।। ५७ ।।

54. *b* T., Vi.—न्द्रमुखाः; so Bh.; others ममैते. *c* Bh.—शंकर एव—. *d* So T., Vi.; Bh., G.—सज्जः सकलैः शुभास्त्रैः; Vā-2, S. सज्जो भवतां सुताद्यैः.

55. *c* T., Vi. तत्रैकहेतुः. *d* T., Vi. यद्धन्यत—.

56. *a* Vi., T. अथोपपन्नं तदितो नियुज्य; Bh., G. अत्रोपपन्नं तदतो नियुज्य. *c* Vi., T. निहन्तु शत्रुं; Bh., G. निहत्य शत्रुं. *d* Bh., G. लभेत; T., Vi. पुनातु.

57. *a* Bh.—भगवांस्तमात्मजं. *c* So Bh., G., T., Vi.; written as नन्दने हि (but is = नन्दन + इहि); S., Vā-2 नन्दनं हि.

शासनं पशुपतेः स कुमारः
स्वीचकार शिरसावनतेन ।
सर्वथैव पितृभक्तिरतानाम्
एष एव परमः खलु धर्मः ।। ५८ ।।
असुरयुद्धविधौ विबुधेश्वरे
पशुपतौ वदतीति तमात्मजम् ।
गिरिजया मुमुदे सुतविक्रमे
न किमु नन्दति संयति वीरसूः ।। ५९ ।।
सुरपरिवृढः प्रौढं वीरं कुमारमुमापतेर्
बलवदमरारातिस्त्रीणां दृगञ्जनभञ्जनम् ।
जगदभयदं सद्यः प्राप्य प्रमोदपरोऽभवद्
ध्रुवमभिमते पूर्णे को वा मुदा न हि माद्यति ।। ६० ।।

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ कुमाराभ्यर्थनं नाम द्वादशः सर्गः ।।

58. *b* Bh., G.—सा विन—; so Vi. and T.

59. *b* Bh., G. वदति प्रियपुत्रकम्; Vi., T. वदति प्रियमात्मकम्. *d* So Vi., T.; Bh., G., Vā-1, S. सति न नन्दति का खलु वीरसूः.

60. *c* P-1, Vā-2—दभयपदं—; cp. the use of √भञ्ज् in भङ्क्त्वा in IX, 26*b*.

Colophon: Bh., G.: इति श्रीकुमारसंभवे........बालाभ्यर्थनं नाम द्वादशः सर्गः; T., Vi.: इति कुमारसंभवे कुमारसैनापत्यवर्णन नाम द्वादशः सर्गः; S.: इति श्रीकालिदासकृतौ कुमारसंभवे महाकाव्ये कुमारसैनापत्यवर्णनं नाम द्वादशः सर्गः ।

॥ त्रयोदशः सर्गः ॥

प्रस्थानकालोचितचारुवेषः
स स्वर्गिवर्गैरनुगम्यमानः ।
ततः कुमारः शिरसानतेन
त्रैलोक्यभर्तुः प्रणनाम पादौ ॥ १ ॥

जहीन्द्रशत्रु समरेऽमरेश-
पदं स्थिरत्वं नय वीर वत्स ।
इत्याशिषा तं प्रणमन्तमीशो
मूर्धन्युपाघ्राय मुदाभ्यनन्दत् ॥ २ ॥

प्रह्वीभवन् नम्रतरेण मूर्ध्ना
नमश्चकाराङ्घ्रियुगं स मातुः ।
तस्याः प्रमोदाश्रुपयःप्रपूरस्
तस्याभवद् वीरवराभिषेकः ॥ ३ ॥

तमङ्कमारोप्य सुता हिमाद्रेर्
आश्लिष्य गाढं सुतवत्सला सा ।
शिरस्युपाघ्राय जगाद शत्रुं
जित्वा कृतार्थीकुरु वीरसू माम् ॥ ४ ॥

उद्दामदैत्येशविपत्तिहेतुः
श्रद्धालुचेताः समरोद्धुरः सः ।
आपृच्छ्य भक्त्या गिरिजागिरीशौ
ततः प्रतस्थेऽभि दिवं कुमारः ॥ ५ ॥

1. *d* Vā-2 त्रिलोक—.
3. *b* G., Vi. युगं स्वमातुः; Vā-2—युगाय मातुः. *c* Vā-2—पयः-प्रवृष्टि—; Bh.—श्रुपयःप्रवर्षः.
4. *b* Vā-2—लास्या. *d* Bh.—कृतार्थां कुरु.
5. *a* T., Vi. दैतेयवि—. *b* So T., Vi.; S., Vā-2., Bh. समरोत्सवस्य *d* Bh.—स्थे त्रिदिवं—.

देवं महेशं गिरिजां च देवीं
ततः प्रणम्य त्रिदिवौकसोऽपि ।
प्रदक्षिणीकृत्य सुरेशमुख्याः
सुराः समग्रास्तमथानुजग्मुः ॥ ६ ॥
अथ व्रजद्भिस्त्रिदशैरशेषैः
स्फुरत्प्रभामण्डलभासुरैस्तैः ।
नभो बभासे परितो विकीर्णं
दिवापि नक्षत्रगणैरिवोग्रैः ॥ ७ ॥
रराज तेषां व्रजतां सुराणां
मध्ये कुमारोऽधिककान्तिकान्तः ।
नक्षत्रताराग्रहमण्डलानाम्
इव त्रियामारमणो नभोऽन्ते ॥ ८ ॥
गिरीशगौरीतनयेन सार्धं
पुलोमपुत्रीदयितादयस्ते ।
उत्तीर्य नक्षत्रपथं मुहूर्तात्
प्रपेदिरे लोकमथात्मनीनम् ॥ ९ ॥
ते स्वर्गलोकं चिरकालदृष्टं
महासुरत्रासविशंवदत्वात् ।
सद्यः प्रवेष्टुं न विषेहिरे तत्-
क्षणं व्यलम्बन्त सुराः समग्राः ॥ १० ॥

6. *c* and *d*: So Bh. (—भिजग्मुः), G., T., Vi.; Vā-2 कृत्य च नाथपूर्वा सुराः समस्ता—; S. प्रदक्षिणीकृत्य च नाकनाथपूर्वाः समस्तास्तमथानुजग्मुः.

7. *a* T., Vi.—शैः सरोषैः. *b* Bh., G., T., Vi. स्फुरत्प्रभाभासुरमण्डलैस्तैः. *c* T., Vi. ततो बभासे परितोऽवकाशो दिवा—.

8. *b* G., Bh.—धिककान्तकान्तिः. *d* T. त्रियामादयितो नभोन्तः; so Vi., excepting नभोन्ते.

9. *c* Vi. मुहूर्तं; T. agrees with ours. *d* T., Vi.—कमथो मुनीनाम्.

10. *a* T., Vi. तं स्वर्ग—. *c* Vā-2, G., S., Vi.; T., Bh. तं क्षणं; T., Vi. सुराः समस्ताः.

पुरो भव त्वं न पुरो भवामि
नाहं पुरोगोऽस्मि पुरःसरस्त्वम् ।
इत्थं सुरास्तत्क्षणमेव भीताः
स्वर्गं प्रवेष्टुं कलहं वितेनुः ॥ ११ ॥
सुरालयालोकनकौतुकेन
मुदा शुचिस्मेरविलोचनस्य ।
दधुः कुमारस्य मुखारविन्दे
दृष्टिं द्विषत्साध्वसकातरां ते ॥ १२ ॥
सहेलहासच्छुरिताननेन्दुस्
ततः कुमारः पुरतो निविष्टः ।
स तारकापातमवेक्षमाणो
रणप्रवीरोऽभि सुरानवोचत् ॥ १३ ॥
भीत्यालमद्य त्रिदिवौकसोऽमी
स्वर्ग भवन्तः प्रविशन्तु सद्यः ।

11. *a* Vi. पुरोऽस्त तत्त्वं न—. *c* T., Vi. इत्थं द्विषा तेन कृते स्ववश्ये स्वर्गे; G., Bh. इत्थं द्विषा तेन हृता मिथस्ते स्वर्गं...

12. *a* T.:

सुरत्वरालोकनकौतुकेन मुदा सुविस्मेरविलोचनस्य ।
दधुः.................कातरास्ते ।

Bh. agrees with ours except in *b*: मुदा सुविस्मेरविलोचनान्ताः read by G.: मुदा सविस्मेरविलोचनान्तः....कातरां ते, and by S.: मुदा शुचिस्मेरविलोचनास्ते.....द्विषत्साध्वसकातरान्ताम् (="कातरान्तां भीतप्रान्ताम्" an illustration of how the commentators could explain anything in Sanskrit; the intended reading being कातरां ताम्).

13. *a* T. सहेलहासोद्धुरिता—. *b* S. पुरतो भविष्णुः. *c* S.—पातमपेक्षमाणो. *d* G., S.—रो हि—; G. agrees with ours except in हि.

14. *d* S. खलु दृष्टपूर्वः; T.—सुरो यः खलु कालदृष्टः; The use of √*daṃś* is familiar in this sense.

अत्रैव मे दृक्पथमेतु शत्रुर्
महासुरो वः खलु कालदष्टः ॥ १४ ॥
स्वर्लोकलक्ष्मीकचकर्षणाय
दोर्मण्डलं वल्गति यस्य चण्डम् ।
इहैव तच्छोणितपानकेलिम्
अह्नाय कुर्वन्तु शरा ममैते ॥ १५ ॥
शक्तिर्ममासावहतप्रचारा
प्रभावसारा सुमहःप्रसारा ।
स्वर्लोकलक्ष्मीविपदा सहारेः
शिरो हरन्ती दिशतान्मुदं वः ॥ १६ ॥
इत्यन्धकारातिसुतस्य दैत्य-
वधाय युद्धोत्सुकमानसस्य ।
सर्वं शुचिस्मेरमुखारविन्दं
गीर्वाणवृन्दं वचसा ननन्द ॥ १७ ॥
सान्द्रप्रमोदात् पुलकोपगूढः
सर्वाङ्गसंफुल्लसहस्रनेत्रः ।
तस्योत्तरीयेण निजाम्बरेण
निरूहणं चारु चकार शक्रः ॥ १८ ॥
घनप्रमोदाश्रुपरिप्लुताक्षैर्
मुखैश्चतुर्भिः प्रचुरप्रसादैः ।

15. *a* G. स्वर्गैकलक्ष्मी—; Bh. स्वर्गौकलक्ष्मी (=स्वर्गौक ?). *b* Bh., T.—लं यस्य बलातिचण्डम्.

16. *b* G., Bh. सुमहाप्रसारा. *c* So Bh., G. with सहारि(शिरो); Vā-2, S.—लक्ष्म्या विपदा—. *d* T., Vi. दिशतां सुखं वः.

17. *b* T., Vi., G.—बद्धोत्सवमानसस्य. *c* T., Vi., G., Bh. सुविस्मेरमुखा—.

18. *a* T., Vi. सान्द्रप्रमोदः पुलको—. *b* T., Vi. सर्वाङ्गसंलग्नसहस्र—. *d* So Bh.; T. निर्मञ्छनं; others निरुञ्छनं; cp. 21*c*.

19. *a* So T., Vi.; others—श्रुतरङ्गिताक्षैः. *b* T., Vi. प्रचुरप्रमोदः. *c* G. तमाचु—; T. विधिराब्धि—. *d* T. षट्सु शिरःषु—. So T. After this śloka T., Vi. have:

क्रमाच्चुचुम्बे विधिरादिवृद्धः
षडाननं षट्सु मुखेषु हर्षात् ॥ १९ ॥
तं साधु साध्वित्यभितः प्रशस्य
मुदा कुमारं त्रिपुरासुरारेः ।
आनन्दयन् वीर जयेति वाचा
गन्धर्वविद्याधरसिद्धसंघाः ॥ २० ॥
दिव्यर्षयः शत्रुविजेष्यमाणं
तमभ्यनन्दन् किल नारदाद्याः ।

दिव्यर्षयस्तस्य वचो वरार्थं
तदभ्यनन्दन् किल नारदाद्याः ॥ १९ ॥

T. numbers from घनप्रमोदाश्रु—up to नारदाद्याः as one śloka having six feet, while Vi. numbers these two lines as 20th. T. goes on:

ततः सुराः शक्तिधरस्य तस्या-
वष्टम्भतः साध्वसमुत्यजन्तः ।
आनन्दयन् वीर जयेति वाचा
गन्धर्वविद्याधरसिद्धसंघाः ॥ २० ॥ T. 21 Vi.

सुसाधु साध्वित्यभितः प्रशस्य
मुदा कुमारं त्रिपुरासुरारेः ।
निरुञ्छनं चक्रुरथोत्तरीयैश्
चामीकरीयैर्निजवल्कलैश्च ॥ 2 ॥ 22 Vi.

G. reads:

दिव्यर्षयस्तस्य वचो वरार्थ
समभ्यनन्दन् किल नारदाद्याः ।
निरुञ्छनं चक्रुरथोत्तरीयैश्
चामीकरीयैर्नवल्कलैश्च ॥ २० ॥

तं साधु साध्वित्यभितः प्रशस्य
मुदा कुमारं त्रिपुरासुरारेः ।
आनन्दयन् वीर जयेति वाचा
गन्धर्वविद्याधरसिद्धसंघाः ॥ २१ ॥

निरुञ्छनं चक्रुरथोत्तरीयैश्
चामीकरीयैर्नववल्कलैश्च ॥ २१ ॥
ततः सुराः शक्तिधरस्य तस्या-
वष्टम्भतः साध्वसमुत्सृजन्तः ।
उत्सेहिरे स्वर्गमनन्तशक्तेर्
गन्तुं वनं यूथपतेरिवेभाः ॥ २२ ॥
अथाभिपृष्ठं गिरिजासुतस्य
पुरंदरारातिवधं चिकीर्षोः ।
सुरा निरीयुस् त्रिपुरं दिधक्षोर्
इव स्मरारेः प्रमथाः समन्तात् ॥ २३ ॥
सुराङ्गनानां जलकेलिभाजां
प्रक्षालितैः संततमङ्गरागैः ।
प्रपेदिरे पिञ्जरवारिपूरां
स्वर्गौकसः स्वर्गधुनीं पुरस्तात् ॥ २४ ॥

ततः सुराः शक्तिधरस्य तस्या-
वष्टम्भतः साध्वसमुत्सृजन्तः ।
उत्सेहिरे स्वर्गमनन्तशक्त्यै
गन्तुं वनं यूथपतेरिवेभाः ॥ २२ ॥ So is Bh.

S. agrees with our reading and order of verses.

23. *a* T., Vi.—पृष्ठे. *b* T., Vi.—दरारातिजयं. After this T., Vi. have:

सुराङ्गनानां जलकेलिभाजां
कराहतैर्भीमतरैस्तरङ्गैः ।
आप्लावयन्तीं मुहुरालवाल-
श्रेणीस्तरूणां निजतीरजानाम् ॥

They omit *b*, *c*, *d* of 24th and *a* up to विहार—of the 25th by haplology; for obviously the eye of the scribe wandered from भाजां of 24*a* to—भाजां of 25*a* with the result that the intervening matter was dropped out. So it is in Bh.; and this fact alone should establish an intimacy between the two.

दिग्दन्तिनां वारिविहारभाजां
कराहतैर्भीमतरैस्तरङ्गैः ।
आप्लावयन्तीं मुहुरालवाल-
श्रेणीं तरूणां निजतीरजानाम् ।। २५ ।।
लीलारसाभिः सुरकन्यकाभिर्
हिरण्मयीभिः सिकताभिरुच्चैः ।
माणिक्यगर्भाभिरुपोहिताभिः
प्रकीर्णतीरां वरवेदिकाभिः ।। २६ ।।
सौरभ्यलुब्धभ्रमरोपगीतैर्
हिरण्यहंसावलिकेलिलोलैः ।
चामीकरीयैः कमलैर्विनिद्रैश्
च्युतैः परागैः परिपिङ्गतोयाम् ।। २७ ।।

25. *a* and *b* : T., Vi. :

दिग्दन्तिनां वारिविहारलीलां
कराहतैर्भीमवराहयूथैः ।
आशंसयन् सादरमद्रिपुत्री-
महेशपुत्राय पुरः पुरोगाः ।। २४ ।।

स कार्त्तिकेयः पुरतः परीतो
वियच्चरैर्लोलतरैस्तरङ्गैः ।
आप्लावयन्तीं मुहुरालवाल-
श्रेणीस्तरूणां गुरुतीरजानाम् ।। २५ ।।

So Bh. Obviously *c* and *d* of 24th and *a* and *b* of 25th are an awkward intrusion in our reading which seems original. S.—श्रेणिं.

26. *a* T., Vi. लोलालसाभिः; cp. I, 29*d*. *b* T., Vi. हिरण्यहंसाभिरुताभिरुच्चैः; G., Bh. हिरण्यजाभिः सिकताभिरुच्चै. *c* S., T., Vi.—गर्भाभिरुपाहिताभिः; others agree with Vā-2. *d* G.—तीराम्बरवेदिकाभिः.

27. *a* T., Vi.—भ्रमरावकीर्णैः. *d* T., Vi. परिपिञ्जतोयाम्.

कुतूहलाद् द्रष्टुमुपागताभिस्
तीरस्थिताभिः सुरसुन्दरीभिः ।
अभ्यूर्मिराजिप्रतिबिम्बिताभिर्
मुदं दिशन्तीं व्रजतां जनानाम् ।। २८ ।।
ननन्द सद्यश्चिरकालदृष्टां
विलोक्य शक्रः सुरदीर्घिकां ताम् ।
अदर्शयत् सादरमद्रिपुत्री-
महेशपुत्राय ततः पुरोगः ।। २९ ।।
स कार्त्तिकेयः पुरतः परीतः
सुरैः समस्तैः सुरनिम्नगां ताम् ।
अपूर्वदृष्टामवलोकमानः
सविस्मयः स्मेरविलोचनोऽभूत् ।। ३० ।।
उपेत्य तां रत्नकिरीटकोटि-
न्यस्ताञ्जलिर्भक्तिपरः कुमारः ।
गीर्वाणवृन्दैः प्रणुतां प्रणुत्य
नम्रेण मूर्ध्ना मुदितो ववन्दे ।। ३१ ।।
प्रणर्तितस्मेरसरोजराजिः
पुरः परीरम्भमिलन्महोर्मिः ।

28. *b* So Bh.; others तीरे स्थिताभिः; T., Vi. सुरकन्यकाभिः. *c* G., Bh. अत्यूर्मिराजि—; Vi. अभ्यूर्मिराजी—.

29. So Vā-2, P-1; Bh., G., S.; T., Vi. read:

ननन्द शक्रश्चिरकालदृष्टां
विलोक्य सद्यः सुरदीर्घिकां ताम् ।
अपूर्वदृष्टामिव लोकमानः
स विस्मयस्मेरविलोचनोऽभूत् ।। २१ ।।

Cp. note on 25th for confused reading of *c* and *d* of 29th and *a* and *b* of 30th.

31. *c* Bh., G. प्रणतां. *d* T., Vi. नमितो; G., Bh. प्रणतो.

32. *a* Bh. प्रनर्तित; T., Vi. प्रपाटितस्मेर—. *d* Vā-2, S.—गुहं स सरितः—; others as our text.

कपोलपालिश्रमवारिहारी
भेजे गुहं स्वःसरितः समीरः ॥ ३२ ॥
ततो व्रजन् नन्दननामधेयं
लीलावनं जम्भजितः पुरस्तात् ।
विभिन्नभग्नोद्धतशालसंघं
प्रेक्षांचकार स्मरशत्रुसूनुः ॥ ३३ ॥
सुरद्विषोपप्लुतमेवमेतद्
वनं बलस्य द्विषतो गतश्रि ।
इत्थं विचिन्त्यारुणलोचनोऽभूद्
भ्रूभङ्गदुष्प्रेक्ष्यमुखः स कोपात् ॥ ३४ ॥
निर्लूनलीलोपवनामपश्यद्
दुःसंचरीभूतविमानमार्गाम् ।
विध्वस्तसौधप्रचयां प्रमृष्ट-
वास्त्वेकसाराममरावतीं सः ॥ ३५ ॥
गतश्रियं वैरिवराभिभूतां
दशां सुदीनामभितो दधानाम् ।
नारीमवीरामिव तामवेक्ष्य
स गाढमन्तः करुणापरोऽभूत् ॥ ३६ ॥
दुश्चेष्टिते देवरिपौ सरोषस्
तस्यां विषण्णः समराय चोत्कः ।
तथाविधां तां स विवेश पश्यन्
सुरैः सुराधीश्वरराजधानीम् ॥ ३७ ॥

33. *a* T., Vi. ततो जवान्नन्दन—. *b* Bh.—वज्रभृतः पुर—. *c* So Vā-2; S.—भग्नोद्धृतशाल—; Bh., T., Vi.—भग्नोन्नतशाखिसंघं (=—संघं G.). For *d* cp. III, 71.

35. *b* T., Vi., Bh., G. असंचरीभूत—. *c* and *d*: So Bh., G.; T., Vi. विध्वस्तसौख्यप्रचयां प्रमृष्टविश्वैकसारा—; Vā-2, S.—सौधप्रचयां कुमारो विश्वैकसाराम—; cp. Rv. XVI, 10*a*. वास्तु = house.

36. *a* T., Vi. गर्भश्रियं; Bh. गतश्रियं वैरिपराभि—; G. गतश्रियं वैरि-वशाभि—. *d* So T., Vi.; others बाढ—; Bh., G. सबाष्पमन्तः—,

दैतेयदन्तावलदन्तघातैः
क्षुण्णान्तराः स्फाटिकहर्म्यपङ्क्तीः ।
महाहिनिर्मोकपिनद्धजालाः
स वीक्ष्य तस्यां विषसाद सद्यः ।। ३८ ।।
उत्कीर्णचामीकरपङ्कजानां
दिग्दन्तिदानद्रवदूषितानाम् ।
हिरण्यहंसव्रजवर्जितानां
विदीर्णवैडूर्यमहाशिलानाम् ।। ३९ ।।
आविर्भवद्बालतृणाञ्चितानां
तदीयलीलागृहदीर्घिकाणाम् ।
सुदुर्दशां वीक्ष्य विरोधिजातां
विषादवैलक्ष्यभरं बभार ।। ४० ।।
तद्दन्तिदन्तक्षतहेमभित्तिं
सुतन्तुजालाकुलरत्नजालम् ।
निन्ये सुरेन्द्रेण पुरोगतेन
स वैजयन्ताभिधमात्मसौधम् ।। ४१ ।।
निर्दिष्टवर्त्मा विबुधेश्वरेण
सुरैः समग्रैरनुगम्यमानः ।

38. *a* So Bh., G. (दन्ताल = दन्तावल ?), Vā-2 दैतेयदन्तावलि—; S. दैतेयदन्त्यावलि; T., Vi. दैत्येन्द्रदन्तावल—. *b* T., Vi. —न्तरस्फाटिक—. *d* So Vā-2, Bh., G., S.; others संवीक्ष्य.

39. *d* G., S.—वैदूर्य; Vi. तदीर्णवैडूर्य—; T. तदीयवैदूर्यम्—.

40. *a* So Vā-2, S., T., Vi.—ञ्चि—G., Bh.—वृतानां. *c* So Vā-2, T., Bh., G.; Vi.—वीक्ष्य विरोधिजा तां; S. स दुर्दशा वीक्ष्य विरोधिजानां.

41. *a* and *b*: Bh.—गेहभित्ति सुतन्तु—; G.—गेहभित्तिं; T., Vi., S. —हेमभित्ति सुतन्तु—; Vi. alone reads it as a compound; in case it is read separately we expect भित्तिं for which cp. —तोरण तम् in 43.

42. *c* and *d*: Bh., G.: स प्राविशत्तं विविधेन रत्नाच्छद्मेन; T., Vi.: स प्राविशत्तद्विविधात्मरश्मिच्छद्मेन.

स प्राविशत् तं विविधाश्मरश्मि-
च्छन्नेन सोपानपथेन सौधम् ।। ४२ ।।
निसर्गकल्पद्रुमतोरणाङ्कं
स पारिजातप्रसवस्रगाढ्यम् ।
दिव्यैः कृतस्वस्त्ययनं मुनीन्द्रैर्
अन्तःप्रविष्टप्रमदं प्रपेदे ।। ४३ ।।
पादौ महर्षेः किल कश्यपस्य
कुलादिवृद्धस्य सुरासुराणाम् ।
प्रदक्षिणीकृत्य कृताञ्जलिः सन्
षड्भिः शिरोभिः स नतैर्ववन्दे ।। ४४ ।।
स देवमातुर्जगदेकवन्द्यौ
पादौ तथैव प्रणनाम कामम् ।
मुनेः कलत्रस्य च तस्य भक्त्या
प्रह्वीभवन् शैलसुतातनूजः ।। ४५ ।।
स कश्यपः सा जननी सुराणां
तमेधयामासतुराशिषा द्वौ ।
तथा यथानेकजगज्जिगीषुं
जेता मृधे तारकमुग्रवीर्यम् ।। ४६ ।।
स्वदर्शनार्थं समुपेयुषीणां
स देवतानामदितिश्रितानाम् ।

43. *a* So T., Vi.; Bh., G.—द्रुमतोरणान्तं; others—तोरणं तं. *b* T., Vi.—स्रजाढ्यम्. *c* So S., Bh., G., Vā-2; T., Vi.—स्वस्त्ययनो—. *d* T., Vi. अन्तः कुमारः प्रमदं प्रपेदे; Bh., G. अन्तः प्रविश्य प्रमदं प्रपेदे.

44. *c* and *d*: T., Vi.—लिः स षड्भिः शिरोभिर्विनतैर्ववन्दे.

46. *b* T., Vi. द्वे. *c* Vi., T. यथानयानेक—. *d* Bh.—मुग्रवीर्यः.

47. *a* T., Vi. तद्दर्शनार्थं. *c* T., Vi. विनयेन तास्तम्. Bh., G. have:

तद्दर्शनार्थं समुपेयुषीणां स देवतानामदितेः सुतानाम् ।
पादौ ववन्दे विनयेन तास्तमाशीर्वचोभिर्गुहमभ्यनन्दन् ।।

पादौ ववन्दे पतिदेवतास्तम्
आशीर्वचोभिः पुनरभ्यनन्दन् ॥ ४७ ॥
पुलोमपुत्रीं विबुधाधिभर्तुस्
ततः शचीं नाम कलत्रमेषः ।
नमश्चकार स्मरशत्रुसूनुस्
तमाशिषा सा समुपाचरच्च ॥ ४८ ॥
अथादितीन्द्रप्रमदाः समस्तास्
तं मातरः सप्त घनप्रमोदाः ।
उपेत्य भक्त्या नमते महेश-
पुत्राय तस्मै ददुराशिषस्ताः ॥ ४९ ॥
समेत्य सर्वेऽपि मुदं दधाना
महेन्द्रमुख्यास् त्रिदिवौकसोऽत्र ।
आनन्दकल्लोलितमानसास्तं
समभ्यषिञ्चन् पृतनाधिपत्ये ॥ ५० ॥
सकलविबुधलोकः स्रस्तनिःशेषशोकः
कृतरिपुविजयाशः प्राप्तयुद्धावकाशः ।

48. *b* Bh., G.—शचीनाम कलत्रमत्र; T., Vi. शची नाम कलत्रमत्र G. *d* Bh., G.—सा समुपाचचार.

49. Vi. reads:

अथादितीन्द्रप्रमुखाः समेताः स मातरः सप्त घनप्रमोदाः ।
उपेत्य भक्त्या नमति स्म शर्वपुत्राय तस्मै ददुराशिषस्ताः ॥

Note the use of मातरः as accusative here; Bh. अथादितीन्द्रप्रमदासमेतास्तं; rest as ours except in—आशिषः प्राक्; G.—प्रमदाः समेता; rest as Bh.

50. *a* Vi., T. सर्वे मुदमादधाना. *c* and *d*:—मास्ते तमभ्य—; S., Vā-2 —मानसं तम्.

51. *b* Vi.—युद्धा—. *c* So Bh., G., T., Vi.; S., Va-2 अजनि.

अकृत हरसुतेनानन्तवीर्येण तेना-
खिलविबुधचमूनां प्राप्य लक्ष्मीमनूनाम् ॥ ५१ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ कुमाराभिषेको नाम त्रयोदशः सर्गः ॥

Colophon: Vi.—इति श्रीकुमारसंभवे महाकाव्ये कवीन्द्रकालिदासकृतौ कुमारसैनापत्याभिषेको नाम त्रयोदशः सर्गः; so T.; Bh. इति कुमारसंभवे महाकाव्ये कालिदासकविकृतौ कुमाराभिषेको नाम त्रयोदशः सर्गः; so G.; S.—कुमारसैनापत्याभिषेको नाम . . . .

॥ चतुर्दशः सर्गः ॥

रणोत्सुकेनान्धकशत्रुसूनुना
समं प्रयुक्तैस् त्रिदशैर्जिगीषुणा ।
महासुरं तारकमूर्जितद्विषं
प्रसह्य हन्तु समनह्यत द्रुतम् ॥ १ ॥
स दुर्निवारं मनसोऽतिवेगिनं
जयश्रियः संयमनं सुदुःसहम् ।
विजित्वरं नाम ततो महारथं
धनुर्धरः शक्तिधरोऽध्यरोहत ॥ २ ॥
सुरालयश्रीविपदां निवारणं
सुरारिसंपत्परितापकारणम् ।
केनापि दध्रेऽस्य विरोधिदारणं
सुचारु चामीकरघर्मवारणम् ॥ ३ ॥
शरच्चरच्चन्द्रमरीचिरोचिभिः
स वीज्यमानो वरचारुचामरैः ।
पुरःसरैः किंनरसिद्धचारणैः
रणेच्छुरस्तूयत वाग्भिरुल्बणैः ॥ ४ ॥
प्रयाणकालोचितचारुवेषभृद्
वज्रं वहन् पर्वतपक्षदारणम् ।

1. *b* Bh., G., Vi., T. स्वयं; Vi., T. जयेषुणा *c* Vi., T. संज्ञितं; S., Vā-2 संज्ञकं; we follow G., Bh.
2. *b* So Bh., G.; S., Vā-2 संनयनं; T., Vi. संगमनं. *c* S. तदा महा—. *d* S., Va-2—ध्यरोहयत्.
3. *c* Bh., G., Vi., T. विरागदा—. *d* Vi.—धर्म—.
4. *a* So G., S., P-1, Vā-2;—रच्चलच्च—Bh.; शरद्वलच्च—T., Vi.; so S. *b* Bh., G. सुवी—. *d* Vi., T. रणोत्सुकोऽस्तूयत वाग्भिरुच्चकैः; Bh., G. स षण्मुखोऽस्तूयत वाग्भिरुच्चकैः.
5. *a* So Vi., T., P-1, Vā-2, S.; Bh., G.—वेषो. *c* Bh., G., Vi., T.—वणं. *d* T., Vi.—मभ्यगात्.

ऐरावतं स्फाटिकशैलसोदरं
ततोऽधिरुह्य द्युपतिस्तमन्वगात् ।। ५ ।।
तमन्वगच्छद् गिरिशृङ्गसोदरं
मदोद्धतं मेषमधिष्ठितः शिखी ।
विरोधिविद्वेषरुषाधिकं ज्वलन्
महो महीयस्तरमायुधं दधत् ।। ६ ।।
नवेन्द्रनीलाचलचण्डविग्रहं
विषाणविध्वस्तमहापयोधरम् ।
अधिष्ठितः कासरमुद्धुरं मुदा
वैवस्वतो दण्डधरस्तमन्वगात् ।। ७ ।।
मदोद्धतं प्रेतमथाधिरूढवांस्
तमन्धकद्वेषितनूजमन्वगात् ।
महासुरद्वेषविशेषभीषणः
सुरोषणश्चण्डरणाय नैर्ऋतः ।। ८ ।।
नवोद्यदम्भोधरघोरदर्शने
युद्धोपरूढो मकरे महत्तरे ।

6. *b* Vi., T., G., Bh.—दोद्धुरं repeated in 7th ; Va-2 महोद्धतं. *d* Vi., T. महामहौजस्तरसा युधे दधे; Bh., G. महो महीयस्तरमादधद्युधि.

7. Vi., T. read:

नवेन्द्रनीलाचलचण्डविग्रहे विषाणविध्वस्तमहाशिलोच्चये ।
स्थितोऽतिमत्ते महिषेऽसुभीषणो रणोत्सुको दण्डधरस्तमभ्यगात् ।।

Bh., G. नवेन्द्रनीलोचितचण्डविग्रहं ; rest as ours.

8. Bh., G. : मदोद्धतप्रेतवराधिरूढवांस्त..........मन्वगात् ।
Vi., T. have : मदोद्धतः प्रेतवराधिरूढस्त........मभ्यगात् ।
d Bh. सरोषण—.

9. *a* T., Vi. have:

नवोदयास्तोरणघोरदर्शनं युधेऽधिरूढो मकरं महत्तरम् ।
दुर्वारपाशो वरुणो रणोल्बणं तम............ ।।

दुर्वारपाशो वरुणो रणोल्बणस्
तमन्वियाय त्रिपुरान्तकात्मजम् ॥ ९ ॥
दिगम्बराद्रिक्रमणोल्बणं क्षणान्
मृगं महीयांसमरुद्धविक्रमम् ।
अधिष्ठितः संगरकेलिलालसो
मरुन् महेशात्मजमभ्यगाद् द्रुतम् ॥ १० ॥
विरोधिनां शोणितपारणैषिणीं
गदामनूनां नरवाहनो वहन् ।
महाहवाम्भोधिविगाहनोद्धतं
यियासुमभ्यागमदीशनन्दनम् ॥ ११ ॥
महाहिनिर्बद्धजटाकलापिनो
ज्वलत्त्रिशूलप्रबलायुधा युधे ।
रुद्रास्तुषाराद्रिसमं महावृषं
ततोऽधिरूढास्तमयुः पिनाकिनः ॥ १२ ॥
अन्येऽपि संनह्य महाहवोत्सव-
श्रद्धालवः स्वर्गिगणास्तमन्वयुः ।

G. has:

नवोदयाम्भोधरघोरदर्शने युद्धेऽधिरूढो मकरं महत्तरम् ।
दुर्वार. . . . . .ल्बणस्त. . . . . ॥

Bh. नवोदयाम्भोधरघोरदर्शनो—; rest as G. *b* S. युद्धाय रूढो; rest as ours.

10. *a* S.—राधिक्र—; others agree with ours. *c* Vi., T.—लालसं.

11. *a* P-1, Vā-2 विग्रहपारणैषि णीं (=विग्रहदारणैषिणीं ?); but cp. Rv. II, 39 उपस्थिता शोणितपारणा मे. *c* Bh.—म्भोधिविगाहमानो. *d* So Vi., T.; Bh., S., Vā-2—मन्वाग—.

12. *b* Vi., T., G., Bh.—प्रवरायुधा युधि. *c* Bh., G., Vi., T. रुषातुषारा—; so P-1, Vā-2; others—सखं.

13. *a* Vi., T. महामहोत्सवश्रद्धा—; S. महारणोत्सवश्रद्धालवः with which agree P-1, Vā-2. But the confused reading of Vi.,

स्ववाहनानि प्रबलान्यधिष्ठिताः
प्रमोदविस्मेरमुखाम्बुजश्रियः ॥ १३ ॥
उद्दण्डहेमध्वजदण्डसकुलाश्
चञ्चद्विचित्रातपवारणोल्बणाः ।
चलद्घनस्यन्दनघोषभीषणाः
करीन्द्रघण्टारवचक्रिचीत्कृताः ॥ १४ ॥
स्फुरद्विचित्रायुधकान्तिमण्डलैर्
उद्द्योतिताशावलयाम्बरान्तराः ।
दिवौकसां सोऽनुवहन् महाचमूः
पिनाकपाणेस्तनयस्ततो ययौ ॥ १५ ॥
कोलाहलेनोच्छलता दिवौकसां
महाचमूनां गुरुभिर्ध्वजव्रजैः ।
घनैर्निरुच्छ्वासमभूदनन्तरं
दिङ्मण्डलं व्योमतलं महीतलम् ॥ १६ ॥
सुरारिलक्ष्मीपरिकम्पहेतवो
दिक्चक्रवालप्रतिनादमेदुराः ।
नभोऽन्तकुक्षिंभरयो घनस्वना
निहन्यमानैः पटहैर्वितेनिरे ॥ १७ ॥
प्रमथ्यमानाम्बुधिगर्जितर्जनैः
सुरारिनारीगणगर्भपातनैः ।

T. shows महाहवोत्सव—to be the original reading. *c* Vi., T. प्रवराण्य—.

14. *b* So Vi., T., G., Bh.; others—णोज्ज्वलाः. *c* Vi., T. घनाघनाः स्य—. *d* So P-1, Vā-2; others—चण्ड—.

15. *a* Vi., T., Bh.—कान्तिकन्दलैः. *b* G., Bh.—म्बरावराः. *c* G. omits *c* and *d*.

16. *a* So G., Vi., T., Bh.; others नोच्चलतां; cp. 28*a*. *b* Vi.—ध्वजाग्रैः; T. ध्वजाग्रकैः. *c* G., Vi., T., Bh.—दलंतरां.

18. *a* and *b*: Vi., T. प्रमथ्यमानार्णवगर्जितस्वनैर्वरारिनारी—; Bh., G. प्रमथ्यमानाम्बुधिगर्जितस्वनैः सुरारिनारी—(गर्जि muttering of clouds or thunders). *c* Vi., T.—कुलैरिवाकुलैः.

नभश्चमूधूलिकुलैरिवाकुलं
ररास गाढं पटहप्रतिस्वनैः ॥ १८ ॥
क्षुण्णं रथैर्वाजिभिराहतं खुरैः
करीन्द्रकर्णैः परितः प्रसारितम् ।
धुतं ध्वजैः काञ्चनशैलजं रजो
वातैर्हृतं व्योम समारुहत् क्षणात् ॥ १९ ॥
खातं खुरै रथ्यतुरंगपुंगवैर्
उपत्यकाहाटकमेदिनीरजः ।
गतं दिगन्तान् मुखरैः समीरणैः
सुविभ्रमं भूरि बभार भूयसा ॥ २० ॥
अधस्तथोर्ध्वं पुरतोऽथ पृष्ठतो-
ऽभितोऽपि चामीकररेणुरुच्चकैः ।
चमूषु सर्पन् मरुदाहतोऽहरन्
नवीनसूर्यस्य च कान्तिवैभवम् ॥ २१ ॥
वातोद्धतं काञ्चनभूमिजं रजो
बभौ दिगन्तेषु नभस्तले स्थितम् ।
अकालसंध्याघनरागपिङ्गलं
घनं घनानामिव वृन्दमुद्यतम् ॥ २२ ॥
हेमावनीषु प्रतिबिम्बमात्मनो
मुहुर्विलोक्याभिमुख महागजा. ।

19. *a* Vi., T. क्षिप्तं. *c* Vi., T. धृत घनैः. *d* Bh., G. व्योम समासदत्; Vi., T. ससार तत् क्रमात्.

20. *a* Vi. खरैः. *b* So Vā-2, S., Vi., T., Bh., G. उपत्यकानां कनकस्थलीरजः. *c* Vi., T., G., Bh. प्रखरैः. *d* Vi., T., G., Bh. दाहभ्रमं.

21. *d* Vi., T. तत्कालबालातपवैभव बहु; Bh., G. तत्कालबालारुणवैभवं बहु.

22. *a* Vi. बलोद्धतं; T., S. बलोद्धृतं. *c* Vi., T., Bh., G.—पिञ्जित. *d* Bh., G. दण्डमु—.

23. *a* Bh. हैमावतीषु. *c* and *d*: S. agrees with ours except in प्रहृतानि; Vi.—भ्रमेण दण्डप्रकाण्डप्रकृतानि तेनिरे; T.—भ्रमेण ते

रसातलोत्तीर्णगजभ्रमात् क्रुधा
दन्तप्रकाण्डप्रहृतानि तेनिरे ।। २३ ।।
सुजातसिन्दूरपरागपिञ्जरैः
कलं चलद्भिः सुरसैन्यसिन्धुरैः ।
शुद्धासु चामीकरशैलभूमिषु
नादृश्यत स्वं प्रतिबिम्बमग्रतः ।। २४ ।।
इति क्रमेणामरराजवाहिनी
महाहवाम्भोधिविलासलालसा ।
अवातरत् काञ्चनशैलतो द्रुतं
कोलाहलाकृत्तविधूतकन्दरा ।। २५ ।।
महाचमूनां करिचण्डचीत्कृतैर्
विलोलघण्टाक्वणितोपबृंहितैः ।
सुरेन्द्रशैलेन्द्रमहागुहाशयाः
सिंहा महास्वप्नसुखं न तत्यजुः ।। २६ ।।
गंभीरभेरीध्वनितैर्भयंकरैर्
महागुहान्तप्रतिनादमेदुरैः ।

दन्तप्रकाण्डप्रहृतानि तेनिरे; Bh.—भ्रमात् क्रुधा दण्डप्रकाण्डप्रहृतानि तेनिरे; G.—भ्रमात् क्रुधा दन्तप्रकाण्डप्रहृतानि तेनिरे; difference between T. and Vi. on the one hand and Bh. and G. on the other may be noted.

24. *d* T., Vi. व्यदृश्यत.

25. *b* So S., P-1, Vā-2; others—हवारम्भवि—; cp. XV, 7. *d* So Vi.; T.—लावृत्ति—; G., Bh.—लाकूतवि—; S., P-1, Vā-2 —लाक्रान्तवि—(आकृत्त = enclosed).

26. *a* So Vi., T., Bh. and G.; S., P-1, Vā-2 have:

महाचमूस्यन्दनचण्डचीत्कृतैर्विलोलघण्टेभपतेश्च बृंहितैः ।
सुरेन्द्रशैलेन्द्रमहागुहाशयाः सिंहा महत्स्वप्न....... ।।

For चण्डचीत्कृतैः cp. 14*d*. D. नितत्यजुः? cp. 29*d*.

27. *b* So Bh.; others गुहान्तः—; cp. 29: गुहागृहान्तात्. *c* So G., Bh., S., P-1, Vā-2; T., Vi. गुरुनाद—. *d* T.—तापि किम्.

महारथानां गुरुनेमिनिःस्वनैर्
अनाकुलैस्तैर्मृगराजताजनि ॥ २७ ॥
समुच्छ्रितेन त्रिदिवौकसां महा-
चमूरवेणाद्रितटान्तदारिणा ।
प्रपेदिरे केसरिणोऽधिकं मदं
स्ववीर्यलक्ष्मीमृगराजतावशात् ॥ २८ ॥
भिया सुरानीकविमर्दजन्मना
विदुद्रुवुर्दूरतरं द्रुतं मृगाः ।
गुहागृहान्ताद् बहिरेत्य हेलया
तस्थुर्विशङ्कं नितरां मृगाधिपाः ॥ २९ ॥
विलोकिताः कौतुकिनामरावती-
जनेन जुष्टप्रमदेन दूरतः ।
सुराचलप्रान्तभुवः प्रपेदिरे
सुविस्तृतायाः प्रसरं सुसैनिकाः ॥ ३० ॥
भुवं विगाह्य प्रययौ महाचमूः
क्वचिन्न मान्ती महतीं दिव खलु ।

28. *a* So Vi., T., Bh., G.; S., P-1, Vā-2 समुत्थितेन. *a* and *b* : Vi., T.—कसां चमूरवेण तेनाद्रितटान्तदारिणा. *d* Vi., T., G., Bh. स्ववीर—.

29. *c* Vi., T. गुहागृहान्तानभिसृत्य हेलया तस्थुर्विनिःशङ्कतरा मृगाधिपाः; G., Bh. agree in *c* with ours but in *d* with Vi. and T. *c* Bh., G. लीलया.

30. *a* Bh., T.—किता. *b* Vi. दुष्टं प्रमदेन; T., G. जातप्रमदेन. *c* and *d* : Vi., T., G. and Bh. read: सुराचलप्रान्तभुवि प्रपेदिरे सुविस्तृतायां प्रसर न सैनिकाः ।

31. S. reads this śloka after 39th, where it seems out of place. *b* Vi., T., G. दिवमभ्यगात् ततः; Bh. ततो न मान्ती दिवमभ्यगात्ततः. *c* and *d*: G., Bh. agree with ours except in विकान्दि—, while S. has निर्भरात् (in *c*); Vi. and T. read in *c* and *d* : अखर्वगन्धर्वपुरोदयभ्रम बभार भूम्ना सुतरामितस्ततः.

सुसंकुलायामपि तत्र निर्भरा
किं कांदिशीकत्वमवाप नाकुला ॥ ३१ ॥
पीतासितारक्तसितैः सुराचल-
प्रान्तस्थितैर्धातुरजोभिरम्बरम् ।
अयत्नगन्धर्वपुरोदयभ्रमं
बभार भूम्नोत्पतितैरितस्ततः ॥ ३२ ॥
महास्वनः सैन्यविमर्दसंभवः
कर्णान्तकूलंकषतामुपेयिवान् ।
पयोनिधेः क्षुब्धतरस्य मन्थनो
बभूव भूम्ना भुवनोदरंभरिः ॥ ३३ ॥
महागजानां गुरुबृंहितैस्ततैः
सुहेषितैर्घोरतरैश्च वाजिनाम् ।
घनै रथानां गुरुचण्डचीत्कृतैस्
तिरोहितोऽभूत् पटहस्य निःस्वनः ॥ ३४ ॥
महासुराणामवरोधयोषितां
कचाक्षिपक्ष्मस्तनमण्डलेष्वलम् ।
ध्वजेषु नागेषु रथेषु वाजिषु
क्षणेन तस्थौ सुरसैन्यजं रजः ॥ ३५ ॥
घनैर्विलोक्य स्थगितार्कमण्डलैश्
चमूरजोभिर्निचितं नभस्तलम् ।

The point is that the scribes of Vi. and T. omit *c* and *d* of 31 and *a* and *b* of 32 and have thereby joined 31 and 32.

32. Vi., T. omit this śloka. *a* and *b*: Bh. पीतासितं रक्तसितं सुराचलप्रान्तोत्थितैर्धा—; so is G. in *b* but in *a* it agrees with ours. *c* G., Vi. अखर्वं. *d* G., Vi. भूम्ना सुतरामितस्ततः; Bh.—भूम्ना नितरा—; Bh. omits this śloka.

33. *c* So G., T., Vi.; S., P-1, Vā-2 वर्धनो.

34. *c* G., Bh., Vi., T. चलचण्डचीत्कृतैः.

35. *b* So Vā-2, P-1, Bh.; Vi.—षु; G., T.—षु च; so is S.

36. *a* Vi., T. चलै—. *c* Vi. अवापि.

अयायि हंसैरभि मानसं घन-
भ्रमेण सानन्दमनर्ति केकिभिः ।। ३६ ।।
सान्द्रैः सुरानीकरजोभिरम्बरे
नवाम्बुदानीकनिभैरभिश्रिते ।
चकासिरे स्वर्णमया ध्वजव्रजाः
परिस्फुरन्तस्तडितां गणा इव ।। ३७ ।।
विलोक्य धूलीपटलैर्भृतं भृशं
द्यावापृथिव्योरलमन्तरं महत् ।
किमूर्ध्वतोऽधः किमधस्त ऊर्ध्वतो
रजोऽभ्युपैतीति जनैरतर्क्यत ।। ३८ ।।
नोर्ध्वं न चाधो न पुरो न पृष्ठतो
न पार्श्वतोऽभूत् खलु चक्षुषो गतिः ।
सूच्यग्रभेद्यैः पृतनारजश्चयैर्
आच्छादितप्राणिगणस्य सर्वतः ।। ३९ ।।
दिगन्तदन्तावलदानहारिभिर्
विमानरन्ध्रप्रतिनादमेदुरैः ।
अनेकवाद्यध्वनितैरनारतैर्
जगर्ज गाढं गुरुभिर्नभस्तलम् ।। ४० ।।

37. *a* Bh., G. सान्द्रे सुरानीकरजोभिरम्बरे. *b* T., Vi नवाम्बुदानीकविलासिभिःश्रिते; Bh., G. नवाम्बुदानीकनिभैरभिस्तुतैः. *c* So Bh., G.; T., Vi.—स्वर्णमयध्वजव्रजाः; Vā-2—स्वर्णमया महाध्वजाः; so S. with चकाशिरे.

38. *c* Vi., T.—धस्तदू—.

39. *b* So Bh., Vi., T., G.; S., Vā-2—षोर्ग—. *c* Vi., T.—ग्रभिन्नैः; Vi., T., G.—रजोभरैः; Bh.—भेद्यैः पृतनारजोभिः सुनिर्भरैः प्राणिगणस्य सर्वतः. *d* Vi., T. सुनिर्भरं; G. सुनिर्भरैः, Vā-2 आच्छादिता प्रा—.

40. *a* S. दन्त्यावलि; so P-1, Vā-2. *c* Vi., T.—वाद्ध्व —.

उद्दामदानद्विपवृन्दबृंहितैर्
नितान्तमुत्तुङ्गतुरंगहेषितैः ।
चलद्घनस्यन्दननेमिनिःस्वनैर्
अभून्निरुच्छ्वासमिवाकुलं जगत् ।। ४१ ।।
महागजानां गुरुभिस्तु गर्जितैर्
विलोलघण्टारणितै रणोल्बणैः ।
वीरप्रणादैः प्रमदप्रमेदुरैर्
वाचालतामादधिरेतरां दिशः ।। ४२ ।।
दन्तीन्द्रदानद्रववारिवीचिभिः
सद्योऽपि नद्यो बहुधा पुपूरिरे ।
धरारजोभिस्तुरगक्षतैर्भृता
याः पङ्कतामेत्य रथैः स्थलीकृताः ।। ४३ ।।
निम्नाः प्रदेशाः स्थलतामुपागमन्
निम्नत्वमुच्चैरपि सर्वतश्च तैः ।

41. *a* Vi.—द्विपबृंहितैस्तैः; T.—द्विपबृंहितैः शतैः. *c* T., Vi.—लद्ध्वजस्य—; cp. 14th चलद्घन—. *d* Vi.—समथाकुल तत्; Bh., G—समथाकुल जगत्; T.—समथाकुलं नभः.

42. *b* Vi., T. रणोज्ज्वलैः, but cp. 9th रणोल्बण and 14—वारणोज्ज्वलाः; ours with variant वारणोल्बणाः. *c* Vi., T. वीरप्रभेदैः.

43. *a* Vi., T., G.—दानाम्बुधि—; Bh.—दानद्रुतवारि—. *b* Vi., T. बहु ताः. *c* and *d* : So G.; Vā-2, P-1 धारा रजोभिः; Vi., T. read:

धारारजोभिस्तुरगैः क्षितिर्भृता या पङ्कतामेत्य रथैः स्थलीकृता ।।

Bh. :

धारारजोभिस्तुरगक्षतैर्भृतं वाः पङ्कतामेत्य रजस्वलीकृतम् ।

S. :

धारारजोभिस्तुरगैः क्षतैर्भृता या. . . . . ।

44. *a* T., Vi. निम्नप्रदेशाः—. *b* (तैः = क्षतैः रजोभिः) Bh., G. सर्वतस्थलाः; T., Vi. सर्वतः स्थलम्; S. सर्वतश्च ते. *c* Vi.—मानां; so Vi. and T.; G., Bh. read: तुरंगमाणां व्रजतां खुरैः क्षता रथैर्गजेन्द्रैः परितः समीकृताः. With this agree S., P-1, Vā-2.

तुरंगमाणां व्रजतां खुरैः क्षिती
रथैर्गजेन्द्रैः परितः समीकृता ॥ ४४ ॥
नभो दिगन्तप्रतिघोषभीषणैर्
महामहीभृत्तटदारणोल्बणैः ।
पयोधिनिर्धूननकेलिभिर्जगद्
बभूव भेरीध्वनितैः समाकुलम् ॥ ४५ ॥
इतस्ततो वातविधूतिचञ्चलैर्
नीरन्ध्रिताशागगनैर्ध्वजांशुकैः ।
लक्षैः क्वणत्काञ्चनकिङ्किणीकुलैर्
अमज्जि धूलीजलधौ नभोगते ॥ ४६ ॥
घण्टारवै रौद्रतरैर्निरन्तरैर्
विसृत्वरैर्गर्जरवैः सुभैरवैः ।
मत्तद्विपानां प्रथयांबभूविरे
न वाहिनीनां पटहस्य निःस्वनाः ॥ ४७ ॥
करालवाचालमुखाश्चमूस्वनः
त्रस्ताम्बरा वीक्ष्य दिशो
तिरोबभूवे गहने दिनेश्वरो
रजोऽन्धकारे परितः कुतोऽप्यसौ ॥ ४८ ॥

45. *c* Bh. पयोविनिर्धूनन—; Vi.—निर्धूतक—. *d* Vi., T., G. —रीस्वनितैः.

46. *a* So Bh., G.; others—विधूत—. *b* So Bh.; G., Vā-2 नीरन्ध्रिताशागमनै—; Vi., T.—रारोधिताशागगनैः. *c* G, Bh. चलत्क्वण—; Vi. लक्षक्वणत्का—; T. लघुक्वणत्का—. *d* So Vā-2, S.; others—गतैः.

47. *a* So Vi., T., G., Bh.; others निरन्तरं. *c* Vi., T., G., Bh. मदद्वि—.

48. *a* Vi., T. करालवाचालरवैश्चमूरवैः; Bh.—वाचालमुखैश्चमूस्वनैः *b* Bh. त्रस्तां धरां वीक्ष्य—. *c* and *d*: S., P-1, Vā-2: तिरोबभूवे गहनैर्दिनेश्वरो रजोऽन्धकारैः परितः कुतोऽप्यसौ; G., Bh. agree with ours except in गगने (for गहने); P-1, Vā-2 दिवेश्वरो. बभूवे ?

आक्रान्तपूर्वा रभसेन सैनिकैर्
दिगङ्गना व्योमरजोऽभिरूषिता ।
भेरीरवाणां प्रतिशब्दितैर्घनैर्
जगर्ज गाढं घनमत्सरादिव ॥ ४९ ॥
गुरुसमीरसमीरितभूधरा
इव गजा गगनं विजगाहिरे ।
गुरुतरा इव वारिधरा रथा
भुवमितीह विवर्त इवाभवत् ॥ ५० ॥
बलवदसुरलोकानल्पकल्पान्तकाले
निरवधय इवाम्भोराशयो घोरघोषाः ।
गुरुतरपरिमज्जद्भूभृतो देवसेना
ववृधुरपि सुपूर्णा व्योमभूम्यन्तराले ॥ ५१ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ देवसेनाप्रयाणवर्णनं नाम चतुर्दशः सर्गः ॥

49. So P-1; others दू—. *d* So S., P.1, Vā-2; Vi., T., G., Bh. गुरुम—.

50. *c* Vi. has: गुरुतरा इव वारिधरा धरो भुवमतीह विमर्द इवाभवन्; while T. reads: गुरुतरा बहुबारिभराद् घना भुवमतीह नमन्त इवाभवन्. Note difference between Vi. and T.

51. *a* Vi, T. वरतरसुरलोकानल्पसंहारकाले. *b* Bh.—घोरघोराः. *d* Vi., T. ववृषुरपि सुपूर्णव्योमभूम्यन्तरालाः. G. has ववृधुरपि समाना व्योमभूम्यन्तराले; while Bh. has ववृधुरपि समाना व्योम्नि भूम्यन्तराले.

Colophon: Vi., T. इति श्रीकुमारसंभवे महाकाव्ये कवीन्द्रकालिदासकृतौ सेनाप्रयाणं नाम चतुर्दशः सर्गः; G. इति श्रीकुमार.........सुरसेनाप्रयाणं नाम चतुर्दशः सर्गः; S...... ..सेनाप्रयाण नाम......; Bh. इति श्रीकुमारसंभवे महाकाव्ये कालिदासकविकृतौ सुरलोकप्रयाणं नाम चतुर्दशः सर्गः; S......देवसेनाप्रयाण नाम. .

॥ पञ्चदशः सर्गः ॥

मेनापतिं नन्दनमन्धकद्विषो
युधे पुरस्कृत्य बलस्य शात्रवः ।
सैन्यैरुपेतीति सुरद्विषां पुरोऽ-
भूत् किंवदन्ती हृदयप्रकम्पिनी ॥ १ ॥
चमूपतिं मन्मथमर्दनात्मजं
विजित्वरीभिर्विजयश्रिया श्रितम् ।
श्रुत्वा सुराणां पृतनाभिरागतं
चित्ते चिरं चुक्षुभिरे महासुराः ॥ २ ॥
समेत्य दैत्याधिपतेः पुरः स्थिताः
किरीटबद्धाञ्जलयः प्रणम्य ते ।
न् मन्मथदूनसूनुना
जम्भजितं सहागतम् ॥ ३ ॥
दासीकृताशेषजगत्त्रयं न मां
जिगाय युद्धे कतिशः शचीपतिः ।
गिरीशपुत्रस्य बलेन साप्रतं
ध्रुवं विजेतेति सकाकु सोऽहसत् ॥ ४ ॥
ततः क्रुधा विस्फुरिताधरच्छदः
स तारको दर्पितदोर्बलोद्धतान् ।

1. *b* Vi., T., G., Bh. युद्धे. *d* Vi., T.—यस्य कम्पिनी.
2. *a* Vā-2 चमूप्रभु. *b* Vi., T., Bh.—त्वराभि—. *c* Bh.—भिरावृतम्. *d* Vi., T. चित्तैः.
3. *a* So Vi., T., G., Bh.; S., P-1, Vā-2—पुरे. *c* So P-1, Vā-2;—मन्मथशत्रुसूनुना T., Vi., G. *c* and *d*: Bh.—शत्रुसूनुं युयुत्सुना जम्भजिता सहागतम्. *d* G.—समा—.
4. *a* So Bh., G., S.; others—तु मां. *d* So Vā-2, S.; Bh, G., T. स काकुतोऽहसत्.
5. So Bh.; others—धराधरः. *b* G., Bh.—लो निजान्; T.—लो बलात्. *c* G., Bh., T. युद्धे.

युधे त्रिलोकीजयकेलिलालसः
सेनापतीन् संनहनार्थमादिशत् ॥ ५ ॥

महाचमूनामधिपाः समन्ततः
संनह्य सद्यः सुतरामुदायुधाः ।
तस्थुर्विनम्रक्षितिपालसंकुले
तदङ्गणद्वारि बहिः प्रकोष्ठके ॥ ६ ॥

स द्वारपालेन पुरःप्रदर्शितान्
कृतानतीन् वाहवरानधिष्ठितान् ।
महाहवाम्भोधिविधूननोद्धतान्
ननन्द पश्यन् पृतनाधिपान् बहून् ॥ ७ ॥

बली बलारातिबलातिशातनं
दिग्दन्तिदानद्रवनाशनस्वनम् ।
महीधराम्भोध्यनिवारितक्रमं
ययौ रथं घोरमथाधिरुह्य सः ॥ ८ ॥

युगक्षयक्षुब्धपयोधिनिःस्वनाश्
चलत्पताकाकुलवारितातपाः ।
धरारजोग्रस्तदिगन्तभास्कराः
पतिं प्रयान्तं पृतनास्तमन्वयुः ॥ ९ ॥

6. *d* S.—ङ्गनद्वा—; so G., T., Vi.; Bh. तदङ्गनद्वारि बहिःप्र—; S., P-1; Vā-2—तदङ्कणद्वारवर प्रकोष्ठके;—तदङ्गणद्वारि बहिः प्रकोष्ठके.

7. *b* S. वाहुवरानधि—. *d* So Bh., G., T.; S., Vā-2—ददर्श राजा.

8. *a* G., T., Bh. ततो. *b* T. दिग्दन्तिदानद्रवताननिःस्व—; S., P-1, Vā-2—दन्तिनादद्रवनाशनस्वनम्. *c* So Bh.; T., Vā-2 महीध-राम्भोधिनिवारितक्रमम्; G. महीधराम्भोनिधिवारितक्रमम्; S. महीध-राम्भोधिनवारितक्रमम्; for a similar confusion cp. समुद्रोर्म्य-निवारिता: VI, 69 with note; Vā-1, Vā-2 stick to—निवारित—, cp. 12*c*. *d* G.—मघाधि—.

9. *d* T. प्रतिप्रयातुं.

चमूरजः प्राप दिगन्तदन्तिनां
महासुरस्याभिसुरं प्रसर्पिणः ।
दन्तप्रकाण्डेषु सितेषु शुभ्रतां
कुम्भेषु दानाम्बुघनेषु पङ्कताम् ।। १० ।।
महीभृतां कंदरदारणोल्बणैस्
तद्वाहिनीनां पटहस्वनैर्घनैः ।
उद्वेलिताश्चुक्षुभिरे महार्णवा
नभःस्रवन्ती सहसाभ्यवर्धत ।। ११ ।।
सुरारिनाथस्य महाचमूस्वनैर्
विगाह्यमाना तुमुलैः सुरापगा ।
अभ्युच्छ्रितैरूर्मिशतैरवारितैर्
अक्षालयन्नाकनिकेतनावलीः ।। १२ ।।
अथ प्रयाणाभिमुखस्य नाकिनां
द्विषः पुरस्तादशुभोपदेशिनी ।

10. *a* Bh., T. प्रसर्पतः.

11 *c* T. उद्वेजिता—.

12. *c* So G., Bh., T.; Vā-2, S.—शतैश्च वारिजैः (comm. वारिजैः वारिजानि कमलानि विद्यन्ते येषु तैः; but why not —शतैः सवारिजैः ?). *d* So T., G., Bh.; others—वलीम्.

13. *b* G., T.—अशुभौघदायिनी; original—अशुभौघदेशिनी ? For *c* and *d* we have adopted T., G.; Bh. reads:

अथ प्रयाणाभिमुखस्य नाकिनां
पताकिनीं प्रत्यसुरेश्वरस्य हि ।
अगाधदुःखाम्बुधिमध्यमज्जनं
बभूव चोत्पाततर्विशसती ।।

Vā-2 as ours in *a* and *b*, but for *c* and *d* it has:

अगाधदुःखाम्बुधिमध्यमज्जनं
बभूव चोत्पातपरंपरा तव ।।

मुहुर्महारिष्टपरंपरा परा
परापतन्मृत्युमहापताकिनी ॥ १३ ॥
आगामिदैत्याशनकेलिकाङ्क्षिणी
कुपक्षिणां घोरतरा परंपरा ।
दधौ पदं व्योम्नि सुरारिवाहिनीर्
उपर्युपर्येत्य निवारितातपा ॥ १४ ॥
मुहुर्विभग्नातपवारणध्वजश्
चलद्धराधूलिकुलाकुलेक्षणः ।
धुताश्वमातङ्गमहारथव्रजा-
नवेक्षणोऽभूत् प्रसभं प्रभञ्जनः ॥ १५ ॥
सद्यो विभिन्नाञ्जनपुञ्जतेजसो
मुखैर्विषाग्निं विकिरन्त उच्चकैः ।
पुरः पथोऽतीत्य महाभुजंगमा
भयंकराकारभृतो भृशं ययुः ॥ १६ ॥
मिलन्महाभीमभुजंगभीषणं
प्रभुर्दिनानां परिवेषमादधौ ।
महासुरस्य द्विषतोऽति मत्सराद्
इवान्तमासूचयितुं भयंकरः ॥ १७ ॥

S. agrees with Vā-2. *b* T., G--शुभौघदायिनी; may be अशुभौघदेशिनी. *c* So G., T.; S., P-1, Vā-2 read:

अगाधदुःखाम्बुधिमध्यमज्जनं बभूव चोत्पातपरंपरा तव ॥

14. *a* T., G. भविष्य....केलिकामिनी, but Bh. agrees with Vā-2 *b* T., G. द्युपक्षिणां घोर—. *d* Bh. ऐत्य.

15. *a* T. विभिन्ना—. *b* S —धूलिकलाकु—. *c* and *d*: So G., Bh.; P-1, Vā-2—रथव्रजानवेक्षणोऽभूत्.......; T. जनाश्वमातङ्गमहारथव्रजानवेक्षमाणः प्रस......; S. धुताश्वमातङ्गमहारथाकुलानवेक्षणोऽभूत्—.

16. *a* T.—पुञ्जसंनिभा. *c* T. परोत्पातमहाभु—.

17. *c* and *d*: T.—तो नु मत्सरादिवात्तमास्य प्रयतुर्भयंकरम्.

त्विषामधीशस्य पुरोऽभि मण्डलं
शिवाः समेताः परुषं ववाशिरे ।
सुरारिराजस्य रणान्तशोणितं
प्रसह्य पातुं द्रुतमुत्सुका इव ॥ १८ ॥
दिवापि तारास्तरलास्तरस्विनीः
परापतन्तीः परितोऽभि वाहिनीम् ।
विलोक्य लोको मनसा व्यचिन्तयत्
प्राणव्ययान्तं व्यसनं सुरद्विषः ॥ १९ ॥
ज्वलद्भिरङ्गारभरैर्नभस्तलं
ववर्ष गाढं सह शोणितास्थिभिः ।
धूमं ज्वलन्त्यो व्यसृजन् मुखै रजो
दधुर्दिशो रासभकण्ठधूसराः ॥ २० ॥
निर्घातघोषो गिरिशृङ्गशातनो
धराम्बराशाकुहरोदरभरिः ।
बभूव भूम्ना श्रुतिभित्तिभेदनः
प्रकोपिकालोर्जितगर्जितर्जनः ॥ २१ ॥
ज्वलद्भिरुच्चैरभितः प्रभाभरैर्
उद्भासिताशेषदिगन्तराम्बरम् ।

18. *a* S., P-1, Vā-2—भिमण्डल.

19. *a* T.—तरलास् तदानिशं. *b* S.—तोऽथ वाहिनीः; Vā-2—तोऽथ वाहिनीम्. *d* T. प्राणात्यया—; Bh. प्राणव्ययान्तव्यसन—. The order of these ślokas in S., G., Bh. is: ज्वलद्भिरुच्चैः (our 22nd), ज्वलद्भिरङ्गार—(our 19th), निर्घात (our 20th).

20. *a* So Bh.; others—चयैर्न—. *c* T. धूम्रं ज्व—. *d* S., G., Bh.—धूसरम्.

21. *a* Bh.—भृगशातनैः. *b* So T.; others घनाम्ब—; G., Bh. —शातनैर्घनैर्वराशाकु—; cp. note on 14-15. *c* G., Bh. भूमा. *d* G., Bh. कालार्जितगर्जत—; S. कालार्जितगर्जितर्जनः.

22. *a* T. चलद्भि—. *c* So T.; Vā-2 हृदे तदारणं; G., Bh. हृदन्तदा—.

रवेण रौद्रेण दिगन्तदारणं
पपात वज्रं नभसो निरम्बुदात् ॥ २२ ॥
स्खलन्महेभं प्रपतत्तुरंगमं
परस्पराश्लिष्टजनं समन्ततः ।
प्रक्षुभ्यदम्भोधिविभिन्नभूधराद्
बलं द्विषोऽभूदवनिप्रकम्पतः ॥ २३ ॥
ऊर्ध्वीकृतास्या रविदत्तदृष्टयः
समेत्य सर्वे सुरविद्विषः पुरः ।
श्वानः स्वरेण श्रवणान्तशातिना
मिथो रुदन्तः करुणेन निर्ययुः ॥ २४ ॥
अपीति पश्यन् परिणामदारुणां
महत्तमां गाढमरिष्टसंततिम् ।
दुर्दैवदष्टो न खलु न्यवर्तत
क्रुधा प्रयाणव्यवसायतोऽसुरः ॥ २५ ॥
अरिष्टमाशङ्क्य विपाकदारुणं
निवार्यमाणोऽपि बुधैर्महासुरः ।
पुरः प्रतस्थे महतां वृथा भवेद्
असद्ग्रहान्धस्य हितोपदेशनम् ॥ २६ ॥
क्षितौ निरस्तं प्रतिकूलवायुना
तदीयचामीकरघर्मवारणम् ।
रराज मृत्योरिव पारणाविधौ
प्रकल्पितं हाटकभाजनं महत् ॥ २७ ॥

23. *a* Bh. प्रणयत्तुर—. *c* and *d*: संक्षुभ्यदम्भोधिविभिन्नभूधरं पुरो द्विषोऽभूदवनिप्रकम्पनः. *d* S.—प्रकम्पात्.

24. *c* G., Bh.—न्तपातिना.

25. *a* G., T., Bh. इति प्रपश्यन्. *c* G., Bh.—वदृष्टो, cp. XIII, 14*d*; T. न खलो निवर्तते.

26. *b* G., Bh.—माणो विबु—; T.—णो विविधैर्म—. *d* T.—पदेशना-

27. *d* G., Bh. राजतभाजन महत्; T. राजतपानभाजनम्.

विजानता भावि शिरोनिकृन्तनं
प्रज्ञेन शोकादिव तस्य मौलिना ।
मुहुर्गलद्भिस्तरलैरलंतराम्
अरोदि मुक्ताफलबाष्पबिन्दुभिः ॥ २८ ॥

निवार्यमाणैरभितोऽनुयायिभिर्
ग्रहीतुकामैरिव तं मुहुर्मुहुः ।
अपाति गृध्रैरभिमौलि चाकुलैर्
भविष्यदेतन्मरणोपदेशिभिः ॥ २९ ॥

सद्यो निकृत्ताञ्जनसोदरद्युतिं
फणामणिप्रज्वलदंशुमण्डलम् ।
निर्यद्विषोल्कानलगर्भफूत्कृतं
ध्वजे जनस्तस्य महाहिमैक्षत ॥ ३० ॥

रथाश्वकेशावलिकर्णचामरं
ददाह बाणासनबाणबाणधीन् ।
अकाण्डतश्चण्डतरो हुताशनस्
तस्यातनुस्यन्दनधुर्यगोचरः ॥ ३१ ॥

इत्याद्यरिष्टैरशुभोपदेशिभिर्
विहन्यमानोऽप्यसुरः पुनः पुनः ।
यदा मदान्धो न गतान् न्यवर्तता-
म्बरात् तदाभून्मरुतां सरस्वती ॥ ३२ ॥

28. *b* G., T. त्रस्तेन; Bh. प्रश्नेन—.

29. *c* Bh.—मौलिमाकुलैः; S.—अभिमौनिमा—(comm. मौलिमाकुलैः). *d* G., T. तस्याननूत्थानविनाशदर्शिभिः; Bh. तस्यातनुच्छायमपायदर्शिभिः.

31. Bh. omits this śloka; S. as ours. *a* G. रथस्य केशावलिकर्णचामरान् ददाह बाणासनवालवालधीन् । अखण्डतश्चण्डतरो हुताशनस्तस्यातनुस्यन्दनधूर्युगोद्गतम्. So T. except in—धूर्युगोद्गतः.

32. *a* Bh. इत्यादि रिष्टै—; T. इत्याद्यनिष्टै—. *c* G. न च विन्यवर्तत; Bh. यदा मदान्धो न गतः स वर्त्मना; T.—न च विन्यवर्तताम्बरे तदाभून्मरुतां सरस्वती.

मदान्ध मा गा भुजदण्डचण्डिमा-
वलेपतो मन्मथहन्तृसूनुना ।
सुरैः सनाथेन पुरंदरादिभिः
समं समन्तात् समरे विजित्वरैः ।। ३३ ।।
गुहोऽसुरैः षड्दिनजातमात्रको
निदाघधामेव निशातमोभरैः ।
विषह्यते नाभिमुखो हि संगरे
कुतस् त्वियं तेन समं विरोधिता ।। ३४ ।।
अभ्रंलिहैः शृङ्गशतैः समन्ततो
दिक्चक्रवालैः स्थगितस्य भूभृतः ।
क्रौञ्चस्य रन्ध्रं विशिखेन निर्ममे
येनाहवस्तस्य सह त्वया कुतः ।। ३५ ।।
लब्ध्वा धनुर्वेदमनङ्गविद्विषस्
त्रिः सप्तकृत्वः समरे महीभुजाम् ।
कृत्वाभिषेकं रुधिराम्बुभिर्घनैः
स्वक्रोधवह्निं शमयांबभूव यः ।। ३६ ।।
न जामदग्न्यः क्षयकालरात्रिकृत्
स क्षत्रियाणां समराय वल्गति ।

33. *c* G., Bh. सनाथैस्त्रिदशेश्वरादिभिः. *d* S. समर; so P-1, Vā-2.

34. *a* G. महासुरैः षड्दिन—; so T.; Bh. सुरासुरैः षड्दिन—. *c* Bh. विषह्यते योऽभिमुखो न संगरे; T. विमुह्यते सोऽभिमुख न सगरे. *d* So G., Bh., T.; S., Vā-2 कुतस्त्वया तस्य सम—.

35. *b* G.—वालस्थगितस्य भूभृतः; Bh. दिक्चक्रवालस्थगनस्य भूभृतः. *c* T.—रन्ध्र स्वशरैर्विनिर्ममे. *d* T., G. येनाहवे तेन कुतः समो भवान्; Bh. येनाहवस्तेन सह त्वया कुतः.

36. *d* Bh. स्वक्रोधमग्निं शमयांबभूव.

37. *c* and *d*: T. येन त्रिलोकीतिलकेन तेन कुतोऽवकाशी सह विग्रहग्रह., while G. has येन त्रिलोकीतिलकेन तेन ते कुतोऽवकाशी सह विग्रहग्रहः; Bh. येन त्रिलोकीसुभटेन तेन कुतोऽवकाशी सह विग्रहग्रहः.

येन त्रिलोकीसुभटेन तेन
कुतोऽवकाशः सह विग्रहग्रहे ।। ३७ ।।
त्यजाशु गर्वं मदमूढ मास्म गाः
स्मरारिसूनोर्वरशक्तिगोचरम् ।
तमेव नूनं शरणं व्रजाधुना
जगत्प्रवीरं स चिराय जीवतात् ।। ३८ ।।
श्रुत्वेति वाचं वियतो वरीयसीं
क्रोधादहंकारपरो महासुरः ।
प्रकम्पिताशेषजगत्त्रयोऽपि सन्
अकम्पतोच्चैर्दिवमभ्यधात् ततः ।। ३९ ।।
किं ब्रूथ रे व्योमचरा महासुराः
स्मरारिसूनुप्रतिपक्षवर्तिनः ।
मदीयबाणव्रणवेदना हि सा-
ऽधुना कथं विस्मृतिगोचरीकृता ।। ४० ।।
कटुस्वरैः प्रालपथाम्बरस्थिताः
शिशोर्बलात् षड्दिनजातकस्य किम् ।
श्वानः प्रवृत्ता इव कार्तिके निशि
स्वैरं वनान्ते मृगधूर्तका इव ।। ४१ ।।

38. *a* G., T., Bh. दर्पं. *d* So G., T., Bh.; S., Vā-2 जगत्सुवीरं सुचिराय जीव तत्.

39. *a* So Bh.; others गरी—. *c* and *d*: G. नाकम्पतोच्चै—; T. —योऽपि स नाकंपतोच्चैर्दिवमभ्यगात्ततः; Bh.—त्रयोऽपि सन्नकम्पतोच्चैर्दिवमभ्यधात्ततः.

40. Śloka omitted by Bh.; G.—ब्रूथ हे—. *b* G., T. मखारिसूनु— *c* and *d*: G., T.—वेदनामहोऽधुनैव विस्मृत्य गताः स्वपृष्ठतः.

41. *a* G., Bh. कटुस्वरैरारटथा—; T. कटुस्वरैरीरयथाम्बरास्थिताः. *c* So Bh., G.; T.—प्रवृत्ता इव कार्तिकी निशि; Vā-2, S. प्रमत्ता इव; cp. III, 67.

सङ्गेन वो भर्गतपस्विनः शिशुर्
वराक एषोऽन्तमवाप्स्यति ध्रुवम् ।
अतस्करस्तस्करसङ्गतो यथा
तद्वो निहन्मि प्रथमं ततोऽप्यमुम् ।। ४२ ।।
इतीरयत्युग्रतरं महासुरे
महाकृपाणं कलयत्यलं क्रुधा ।
परस्परोत्पीडितजानवो भयान्
नभश्चरा दूरतरं विदुद्रुवुः ।। ४३ ।।
ततोऽवलेपाद् विकटं विकृष्य स
विकोशमाधादसिमंशुभासुरम् ।
रथं द्रुतं प्रापय वासवान्तिकं
बतेत्यवोचन्निजसारथिं रथी ।। ४४ ।।
मनोऽतिवेगेन रथेन सारथि-
प्रणोदितेन प्रचलन्महासुरः ।
ततः प्रपेदे सुरसैन्यसागरं
भयंकराकारमपारमग्रतः ।। ४५ ।।

42. *a* So Bh., T. (भर्ग name of Śiva) ; Vā-2, S., G. गर्भतप- (comm. in S. hopeless on गर्भ—) ; cp. XVII, 13 रे शंभुतापसशिशो.

43. *b* T. ध्रुवम्.

44. So G., T. ; cp. XVI, 14*b*, Rv. VII, 48*a* ; Bh. :

ततोऽवलेपाद् विकटं विहस्य सो
बतेत्यवोचत् प्रति सारथिं द्रुतम् ।।

S., Vā-2 :

ततोऽवलेपाद् विकटं विहस्य स
व्यधत्त कोशादसिमुत्तमं बहिः ।
रथं द्रुतं प्रापय वासवान्तिकं
नन्वित्यवोचन्निजसारथिं रथी ।।

पुरः सुराणां पृतनां प्रथीयसीं
विलोक्य वीरः पुलकं प्रमोदजम् ।
बभार भूम्नाथ स बाहुदण्डयोः
प्रचण्डयोः संगरकेलिकौतुकी ।। ४६ ।।
ततो महेन्द्रस्य चराश्चमूचरा
रणान्तलीलारभसेन भूयसा ।
पुरः प्रचेलुर्मनसोऽतिवेगिनो
युयुत्सुभिः किं समरे विलम्ब्यते ।। ४७ ।।
पुरः स्थितं देवरिपोश्चमूचरा
बलद्विषः सैन्यसमुद्रमभ्ययुः ।
भुजं समुत्क्षिप्य सहेलमात्मनो-
ऽभिधानमुच्चैरभितो न्यवेदयन् ।। ४८ ।।
पुरोगतं दैत्यचमूमहार्णवं
दृष्ट्वाभितश्चक्षुभिरेऽखिलाः सुराः ।
पुरारिसूनोर्नयनैककोणके
ममुर्भटास्तस्य रणेऽवहेलया ।। ४९ ।।
द्विषद्बलत्रासविसंस्थुलां चमू
दिवौकसामन्धकशत्रुनन्दनः ।

46. *a* G., Bh. पृतनाः प्रथीयसीः—. *c* G., Bh., T.—भूम्ना बहुबाहुदण्डयोः.

47. *a* G., Bh. ततः सुरेन्द्रस्य वराश्चमूचराः; T. has ततोऽसुरेन्द्रानुचराश्चमूचराः.

48. *a* G., Bh. पुरःसरा देवरिपोश्चमूचराः; so T. *b* T., Bh. सुरद्विषः; T.—भ्ययुः. *c* So T., G., Bh.; S., Vā-2 परेभ्य आ—.

49. *b* G.—रेऽखिलाः स तु; S., P-1, Vā-2—रे महासुराः. *d* G. ममौ पुरो भाविरणे हि हेलया; so is T., Bh., however, has ममौ भटो भाति रणेऽवहेलया.

50. *a* T., G., Bh.—विसंकुलां; Vā-2, S. विभीषितां; P-1—विसस्थुलां noted as a variant (—विसंस्थुलाश्चमूर्दि—). *c* G., Bh. महाहवो—; T. महाहवे बल.

अपश्यदुद्दिश्य महारणोत्सवं
प्रसादपीयूषधरेण चक्षुषा ॥ ५० ॥
उत्साहिताः शक्तिधरस्य दर्शनान्
मृधे महेन्द्रप्रमुखा मखाशनाः ।
अहंजुषो जेतुमरीनरीरमन्
न कस्य वीर्याय वरस्य संगतिः ॥ ५१ ॥
परस्परं वज्रधरस्य सैनिका
द्विषोऽभि योद्धुं स्वकरोद्धृतायुधाः ।
वैतालिकश्रावितताविक्रमा-
भिधानमीयुर्विजयैषिणो रणे ॥ ५२ ॥
संग्रामप्रलयाय संनिपततो वेलामतिक्रामतो
वृन्दारासुरसैन्यसागरयुगस्याशेषदिग्व्यापिनः ।
कालातिथ्यभुजो बभूव बहलः कोलाहलः क्रोषणः
शैलोत्तालतटीविघट्टनपटुर्ब्रह्माण्डकुक्षिंभरिः ॥ ५३ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ देवासुरसैन्यसंघट्टो नाम पञ्चदशः सर्गः ॥

51. *a* Bh. उत्माहिनः शक्ति—. *b* T.—प्रमुखाः मुधाशिनः. *c* G., Bh. —अयत्नतो; P-1, Vā-2 अहं मृधे.

52. *b* Bh., G. प्रचुरोद्धृता—; T. प्रवरोद्धृता—. *c* G., T. वैमानिकैः श्रावितमानसत्क्रमाभि—; Bh. वैतालिकैः श्रावितनामविक्रमाः. *d* Bh. सोत्साहमीयु—.

53. *a* So Bh , G., T ; others संग्रामे प्र—. *c* Bh., G.—ध्यपृथूच्च-चाल बहलः कोलाहलः क्रोधिलः (cp. धूमिलः, भूमिल etc.); T —ध्यपृथुप्रदानबहलः कोलाहलः क्रोधिनः.

Colophon: T. इति श्रीकुमारसंभवे महाकाव्ये सुरासुरसैन्यसंघट्टो नाम; S. इति श्रीकालिदामकृतौ कुमारसंभवे महाकाव्ये सुरासुरसैन्यसघट्टो नाम पञ्चदशः सर्गः; Bh. इति कुमारसंभवे महाकाव्ये कविकालिदासकृतौ दैवासुरसैन्यसंमिलनो नाम पञ्चदशः सर्गः.

।। षोडशः सर्गः ।।

अथान्योन्यं विमुक्तास्त्रशस्त्रजालैर्भयंकरम् ।
युद्धमासीच्छुनासीरसुरारिबलयोर्महत् ।। १ ।।
पत्तिः पत्तिमभीयाय रणाय रथिनं रथी ।
तुरंगस्थं तुरंगस्थो दन्तिस्थं दन्तिनि स्थितः ।। २ ।।
युद्धाय धावतां धीरं वीराणामितरेतरम् ।
वैतालिकाः कुलाधीशनामान्यलमुदाहरन् ।। ३ ।।
पठतां वन्दिवृन्दानां प्रवीरा विक्रमावलिम् ।
क्षणं विलम्ब्य चित्तानि ददुर्युद्धोत्सुका अपि ।। ४ ।।
संग्रामानन्दवर्धिष्णौ विग्रहे पुलकाङ्किते
आसीत्कवचविच्छेदो वीराणां मिलतां मिथः ।। ५ ।।
निर्दयं खड्गभिन्नेभ्यः कवचेभ्यः समुत्थितैः ।
आसन् व्योमदिशस्तूलैः पलितैरिव पाण्डुराः ।। ६ ।।
खड्गा रुधिरसंलिप्ताश्चण्डांशुकरभासुराः ।
इतस्ततोऽपि वीराणां विद्युतां वैभवं दधुः ।। ७ ।।

1 *b* So Bh., P-1, Vā-2, S., others भयंकरैः. *d* P-1, Vā-2, S. बलयोर्द्वयोः.

2. For detailed comparison cp. Rv. VII, 37–58.

3. *c* P-1, Vā-2 कुलाधीशा नाँ—; Śloka omitted by T., Vi.

4. *a* and *b*: Bh. agrees with ours except in—वलीम्; G :

पठतां बन्दिवृन्दानां प्रवीरा विरुदावली ।
क्षणं विलम्ब्य चित्तानि ददुर्युद्धोत्सुका अपि ।।

T. : पठता बन्दिवृन्देन प्रवीरविरुदावली । Rest as ours.
Vi. : पठिता बन्दिवृन्देन प्रवीरविरुदावलीः । Rest as ours.
d Vā-2, P-1 युद्धोत्सुकाः पुरः.

5. *b* Vā-2, P-1 पुलकाञ्चिते. *d* Bh. धीराणां मिलतां—.

6. *b* So Vā-2, P-1; others समुच्छ्रितैः. *d* Bh. पतितैरिव—.

7. *d* G., T., Vi. वैद्युतं; Bh. विद्युतो—.

विसृजन्तो मुखैर्ज्वाला भीमा इव भुजंगमाः ।
विसृष्टाः सुभटै रुष्टैर्व्योम व्यानशिरे शराः ॥ ८ ॥
गाढं वपूंषि निर्भिद्य धन्विनां निघ्नतां मिथः ।
अशोणितमुखा भूमिं प्राविशन् दूरमाशुगाः ॥ ९ ॥
निर्भिद्य दन्तिनः पूर्वं पातयामासुराशुगाः ।
पेतुः प्रवरयोधानां प्रोतानामाहवोत्सवे ॥ १० ॥
ज्वलदग्निमुखैर्बाणैर्नीरन्ध्रैरितरेतरम् ।
उच्चैर्वैमानिका व्योम्नि कीर्णे दूरमपासरन् ॥ ११ ॥
विभिन्नं धन्विनां बाणैर्व्यथार्तमिव विह्वलम् ।
ररास विरसं व्योम श्येनप्रतिरवच्छलात् ॥ १२ ॥
चापैराकर्णमाकृष्टैर्विमुक्ता दूरमाशुगाः ।
अधावन् रुधिरास्वादलुब्धा इव रणैषिणाम् ॥ १३ ॥
गृहीताः पाणिभिर्वीरैर्विकोशाः खड्गराजयः ।
कान्तिजालच्छलादाजौ व्यहसन् संमदादिव ॥ १४ ॥
खड्गाः शोणितसंदिग्धा नृत्यन्तो वीरपाणिषु ।
रजोघने रणेऽनन्ते विद्युतां विभ्रमं दधुः ॥ १५ ॥
कुन्ताश्चकाशिरे चण्डमुल्लसन्तो रणार्थिनाम् ।
जिह्वाभोगा यमस्येव लेलिहाना रणाङ्गणे ॥ १६ ॥

8. *c* T., Vi. सुभटैस्तुष्टैः.

9. *a* P-1, Vā-2 वाढं—. *c* Bh. सशोणितमुखा—; cp. Rv. VII, 65*a*.

10. *a* Bh. निर्भेद्य—. *d* So T. but Vi. with others प्रीताना—.

11. *a* So S., P-1, Vā-2; others—कीर्णैः.

12. *b* Bh., G. यथार्थमिव—; T., Vi. वेशाया इव—with वेश्याया इव as a variant. *d* Bh., G., T., Vi. सेनापतिरव—.

14. *b* Cp. note on XV, 44. *c* and *d* : So P-1, Vā-2, Bh., S. and G. (with—समदादिव); T., Vi. have: कान्त्याननच्छलादाजेर्व्यहसन् समदा इव.

15. *d* G. विश्रमं—. S., P-1, Vā-2 वैभवं—for which cp. 7th.

16 *a* Bh., T. चकासिरे. *c* Bh. जिह्वाभागा यमस्येव. *d* T. लेलिहाना रणक्षये; Bh.—रणाजिरे.

प्रज्वलत्कान्तिचक्राणि चक्राणि वरचक्रिणाम् ।
चण्डांशुमण्डलश्रीणि रणव्योमनि बभ्रमुः ॥ १७ ॥
केचिद् धीरैः प्रणादैश्च वीराणामभ्युपेयुषाम् ।
निपेतुः क्षोभतो वाहादपरे मुमुहुर्मदात् ॥ १८ ॥
कश्चिदभ्यागते वीरे जिघांसौ मुदमादधौ ।
परावृत्य गते क्षुब्धो विषसादाहवप्रियः ॥ १९ ॥
बहुभिः सहयुध्वानः परिभ्रम्य रणोल्बणाः ।
नामग्राहमुपेयुः केऽप्यग्रे पूर्ववृता वयम् ॥ २० ॥
अभितोऽभ्यागतान् योद्धुं वीरान् रणमदोद्धतान् ।
प्रत्यनन्दन् भुजादण्डरोमोद्गमभृतो भटाः ॥ २१ ॥
शस्त्रभिन्नेभकुम्भेभ्यो मौक्तिकानि च्युतान्यधुः ।
आहवक्षेत्रमभ्युप्तकीर्तिबीजोत्करश्रियम् ॥ २२ ॥
वीराणां विषमैर्घोषैर्विद्रुता वारणा रणे ।
काल्यमाना अपि त्रासाद् भेजुर्धूताङ्कुशा दिशः ॥ २३ ॥

17. *a* Bh.—कान्तिवक्राणि. *c* Bh. चण्डेषुमण्डलश्रीणि.

18. *a* Bh., G. प्रणादैस्तु. *c* and *d*: Bh. निपेतुः क्षोभतो वाहानपरे मुमुहुर्मदात्.

19. *c* T., Vi. गते क्षुद्रे; S., P-1, Vā-2 गते क्षुब्धे.

20. Śloka omitted by Bh. *a* So T., Vi., G.;—सह युद्धा वा S., P-1, Vā-2. *c* and *d*: So T., Vi., G.; S., P-1, Vā-2 : उद्दिश्य तानपेयुः केऽपि ये पूर्ववृता रणे.

21. *a* and *d* : T., Vi. :

अभितोऽभ्यागतान् वीरान् योधी रणमदोल्बणान् ।
प्रत्यहन् तद्भुजादण्डे रोमोद्गमभृतो मदात् ॥

Bh., G.: अभितोऽभ्यागतान् योद्धुं वीरान् रणमदोद्धताः ।
Rest as ours.

22. Śloka omitted by P-1, Vā-2. *b*, *c* and *d* : S.—च्युतान्यधः । अभ्याहवक्षेत्रमुप्तकीर्तिबीजाङ्कुरश्रियम्.

23. *c* So T.; others शास्यमाना.

रणे बाणगणैर्भिन्ना भ्रमन्तो भिन्नयोधिनः ।
निममज्जुर्गलद्रक्तनिम्नगासु महागजाः ॥ २४ ॥
अपारेऽसृक्सरित्पूरे रथेषूच्चैस्तरेष्वपि ।
रथिनोऽभि रिपुं क्रुद्धा हुंकृतैर्व्यसृजन् शरान् ॥ २५ ॥
खड्गनिर्लूनमूर्धानो व्यापतन्तोऽपि वाजितः ।
प्रथमं पातयामासुर्दारयित्वासिना रिपून् ॥ २६ ॥
वीराणां शस्त्रभिन्नानि शिरांसि निपतन्त्यपि ।
अधावन् दन्तदष्टौष्ठभीमान्यभि रिपु क्रुधा ॥ २७ ॥
शिरांसि वरयोधानामर्धचन्द्रहृतान्यलम् ।
आददाना भृशं पादैः श्येना व्यानशिरे नभः ॥ २८ ॥
क्रोधादभ्यापतद्दन्तिदन्तारूढेषु वाजिषु ।
अश्वारोहा गजारोहप्राणान् प्रासैरपाहरन् ॥ २९ ॥

24. *c* S., P-1, Vā-2—मिलद्रक्त—. *d* T., Vi. निममज्जुर्गलद्रक्त-निमग्नाः सुमहागजाः obviously a bad change from निम्नगासु महा—.

25. *a* T., Vi. अपरेऽस्रसरित्पूरे; Bh. अपारेऽस्रसरित्पूरे. *c* and *d* : Bh. रथिनोऽभिरथिं क्रुद्धा—rest as ours; G. रथिनोऽभिरथिक्रुद्धाः; rest as Bh.; T., Vi. रथिनोऽभिक्रुधा क्रुद्धहुङ्कृतैर्व्यसृजन् शरान्.

26. *b* Bh., T., Vi. निपतन्तोऽपि वाजिनः. *d* S., T., Vi., Bh. —पातयामासुरसिना दारितानरीन्.

27. *a* T., Vi. वीराणां शस्त्रभिन्नानां. *d* T., Vi.—दष्टौष्ठभीषणान्यरिषु-क्रुधा.

28. *b* Bh.—हृतान्यपि. *c* S., P-1, Vā-2 आदधाना. *d* T., Vi.—शिरे दिशः.

29. Bh., G., T., Vi. give it after the 30th; Bh., G. as ours; T., Vi. have:

क्रोधादभ्यापतद्दन्तिदन्तारूढा नृवाजिषु ।
अश्वारूढा गजारोहप्राणान् प्रासैरपाहरन् ॥

S., P-1, Vā-2:

क्रोधादभ्यापतद्दन्तिदन्तारूढाः पदातयः ।

c and *d* as ours.

शस्त्रच्छिन्नगजारोहा विभ्रमन्त इतस्ततः ।
युगान्तवातचलिताः शैला इव गजा बभुः ॥ ३० ॥
मिलितेषु मिथो योद्धुं दन्तिषु प्रसभं भटाः ।
अगृह्णन् सहयुध्वानः शस्त्रैः प्राणान् परस्परम् ॥ ३१ ॥
रुषा मिथो मिलद्दन्तिदन्तसंघर्षजोऽनलः ।
योधान् शस्त्रहृतप्राणानदहत् सह सादिभिः ॥ ३२ ॥
उत्क्षिप्ता अपि दन्तीन्द्रैः कोपनैः पत्तयः करैः ।
तदसूनहरन् खड्गघातैः स्वस्य पुरः प्रभोः ॥ ३३ ॥
उत्क्षिप्य करिभिर्दूरं मुक्तानां योधिनां दिवि ।
प्रापि जीवात्मभिर्दिव्याङ्गनैषां विग्रहैर्मही ॥ ३४ ॥
खड्गैर्धवलधारालैर्निहत्य करिणां करान् ।
तैर्भुवापि समं विद्धान् संतोषं न भटा ययुः ॥ ३५ ॥

31. The śloka is read after the 36th (उत्क्षिप्याभि—) by T., Vi. *c* and *d* : so T., Vi., G.; S., P-1, Vā-2 अगृह्णन् युध्यमानाश्च शस्त्रैः प्राणान् परस्परम् which occurs in Bh. as अगृह्णन् सह युद्धान्तः शस्त्रैः प्राणान्—, which may be सहयुध्वानः.

32 *a* and *b* : T., Vi. have : गजारूढान् मिलद्दन्तिदन्तसंघर्षजोऽनलः. *d* So Bh.; others—अदहत् सहसारिभिः.

33 *a* S., P-1, Vā-2 आक्षिप्ता अपि—; T. उत्क्षिप्ता अपि हस्तीन्द्रैः : *c* and *d* : Bh., G. ते रिपूनहनन् खड्गघातैः स्वस्य पुरः प्रभोः; T., Vi. तद्रिपूनहरन् खड्गपातैः स्वस्य—.

34 So Bh.; T., Vi. have:

उत्क्षिप्य करिभिर्दूरं मुक्तानां योधिनां दिवः ।
प्रापि जीवात्मभिर्दिव्याङ्गनाकण्ठपरिग्रहः ॥

S., Vā-2 :

उत्क्षिप्य करिभिर्दूरान् मुक्तानां योधिनां दिवि ।
प्रापि जीवात्मभिर्दिव्या गतिर्वा विग्रहैर्मही ॥

G. agrees with Bh. but reads in *c* and *d* :

प्रापि जीवात्मभिर्दिव्यङ्गनाकण्ठपरिग्रहः ॥

35. Śloka omitted by Bh. *c* and *d* : T., G., Vi. यैर्भुवापि समं वद्धं शस्त्र्या तान् पत्तयोऽहरन्.

उत्क्षिप्याभि दिवं नीताः पत्तयः करिभिः करैः ।
दिव्याङ्गनाभिरादातुं रक्ताभिर्द्रुतमीषिरे ॥ ३६ ॥
धन्विनस्तुरगारूढा गजारोहान् शरैः क्षतान् ।
प्रत्यैच्छन् मूर्च्छितान् भूयो योद्धुमाश्वसतश्चिरम् ॥ ३७ ॥
क्रुद्धस्य दन्तिनः पत्तिर्जिघृक्षोरसिना करम् ।
निर्भिद्य दन्तमुसलावारुरोह जिघृक्षया ॥ ३८ ॥
खड्गेन मूलतो हत्वा दन्तिनोऽङ्घ्रिचतुष्टयम् ।
प्रातिपक्ष्ये प्रविष्टोऽपि पदातिर्निरगाद् द्रुतम् ॥ ३९ ॥
करेण करिणा वीरः सुगृहीतोऽपि कोपिना ।
असिनासून् जहाराशु तस्यैव स्वयमक्षतः ॥ ४० ॥
तुरंगी तुरगारूढं प्रासेनाहत्य वक्षसि ।
पततस्तस्य नाज्ञासीत् प्रासघातं स्वके हृदि ॥ ४१ ॥
द्विषा प्रासहृतप्राणो वाजिपृष्ठदृढासनः ।
हस्तोद्धृतमहाप्रासो भटो जीवन्निवाभ्रमत् ॥ ४२ ॥

36 So S. with आक्षिप्य (for उत्क्षिप्य); T., Vi. have for *c* and *d*:

दिव्याङ्गनाभिरादातुं रक्ताभिर्वृतमम्बरम् ॥

Bh., G. agree with T., Vi. except in रक्ताभिर्व्याप्तमम्बरम्. Vā-2 however has:

आक्षिप्याभिदिवं नीताः पत्तयः करिभिः करैः ।
प्रत्यैच्छन् मूर्छितान् भूयो योद्धुमाश्वसतश्चिरम् ॥

Obviously Vā-2 omits *c* and *d* of 36 and *a* and *b* of 37.

37. So S., Bh., G.; T., Vi. agree with them except in प्रत्यैक्षन्.

38. *a* Bh. क्रुद्धस्य करिणः—. *c* and *d*: Bh. निर्भिद्य दन्तमुसले वारुरोह जिघृक्षया; T.—दन्तमुसलानारुरोह—; the corruption from T. to Bh. may be noted.

39. *a* Bh., G., T., Vi. खड्गेनामूलतो—. *b* So Bh., G., T., Vi.; others दन्तिनो रदनद्वयम्. *c* प्रपतिष्णोः प्रविष्टोऽपि Bh., G., T., Vi.

41. *a* G., Bh. तुरगी. *d* Bh. प्रासपातं; others प्रासघातं.

42. T., Vi. put it after 43 (तुरंगसादिनं). *c* T., Vi. हस्तोद्धत—. *d* Bh.—न्निवाभवत्; Vā-2 भुवि जीवन्नि—.

तुरंगसादिनं शस्त्रहृतप्राणं गतं भुवि ।
अबद्धोऽपि महावाजी न साश्रुनयनोऽत्यजत् ।। ४३ ।।
भल्लेन शितधारेण भिन्नोऽपि रिपुणाश्वगः ।
नामूर्च्छत् कोपतो हन्तुमियेष निपतन्नपि ।। ४४ ।।
मिथः प्रासहतौ वाजिच्युतौ भूमिगतौ रुषा ।
शस्त्र्या युयुधतुः कौचित् केशाकेशि भुजाभुजि ।। ४५ ।।
रथिनो रथिभिर्बाणैर्हृतप्राणा दृढासनाः ।
कृतकार्मुकसंधानाः सप्राणा इव रेजिरे ।। ४६ ।।
न रथी रथिनं भूयः प्राहरच्छस्त्रमूर्च्छितम् ।
प्रत्याश्वसन्तमन्विच्छन्नतिष्ठद् युधि लोभतः ।। ४७ ।।
अन्योन्यं रथिनौ कौचिद्धृतप्राणौ दिवं गतौ ।
एकामप्सरसं प्राप्य ययुधाते वरायुधौ ।। ४८ ।।
मिथोऽर्धचन्द्रनिर्लूनमूर्धानौ रथिनौ रुषा ।
खेचरौ भुवि नृत्यन्तौ स्वकबन्धावपश्यताम् ।। ४९ ।।
रणाङ्गणे शोणितपङ्कपिच्छिले
कथं कथंचिन्ननृतुर्धृतायुधाः ।
नदत्सु तूर्येषु परेतयोषितां
गणेषु गायत्सु कबन्धराजयः ।। ५० ।।

43. Śloka omitted by Bh. *c* and *d*: G., T. अन्त्राढ्योऽपि महावाजी नास्रस्तनयनोऽत्यजत्; Vi. अन्त्राढ्योऽपि.

44. *a* T., Vi. खड्गेन शित—. *d* T., Vi.—इयेष च पतन्नपि.

45. *a* and *b*: T. मिथः प्रहारतो वाजिच्युतो भूमिगतो रुषा; rest as ours; Vi. agrees with ours; Vā-2 मिथः प्रासाहतो वाजिच्युतो ....

46. *c* So Bh., G., T., Vi.; others क्षत—. *d* Vā-2, T., Vi. —इव मेनिरे.

47. *c* and *d*: Bh., G. प्रत्याश्वसन्तमन्विच्छन्नागमद्युद्धलोभतः; T., Vi. प्रत्याश्वसन्तं मर्त्येनं नागमद्—; S. प्रत्याश्वसन्तमन्विच्छन्नातिष्ठद्युधि लोभतः.

48 *b* S. गतप्राणौ; Bh. कौचित् हृतप्राणौ.

49. *b* T., Vi. रुषितौ रुषा. *c* T., Vi. खचरैर्भुवि नृत्यन्तौ.

इति सुररिपुर्वृत्ते युद्धे सुरासुरसैन्ययोः
रुधिरसरितां मज्जद्दन्तिव्रजेषु तटेष्वलम् ।
अरुणनयनः क्रोधाद् भीमभ्रमद्भृकुटीमुखः
सपदि ककुभामीशानभ्यागमत् स युयुत्सया ॥ ५१ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ सुरासुरसैन्यसंग्रामवर्णनं नाम षोडशः सर्गः ॥

51. *c* Bh., G.—भ्रुकुटी—; Vi.—क्रोधासीनभ्रमद्भ्रुकुटीमुखः; T.—क्रोधापीनभ्रमद् भ्रुकुटीमुखः.

Colophon : Bh.: इति कुमारसंभवे महाकाव्ये कविकालिदासकृतौ दैवासुरसैन्यसंग्रामो नाम षोडशः सर्गः; Vi.: इति श्रीकुमारसभवे महाकाव्ये कवीन्द्रश्रीकालिदासकृतौ द्वन्द्वप्रधनं नाम षोडशः सर्गः; so T. and G. while S. has सुरासुरसैन्यसंग्रामवर्णन नाम . . . .

।। सप्तदशः सर्गः ।।

दृष्ट्वाभ्युपेतमथ दैत्यपतिं पुरस्तात्
संग्रामकेलिकुतुकेन घनप्रमोदम् ।
योद्धुं मदेन मिमिलुः ककुभामधीशा
बाणान्धकारितदिगम्बरगर्भमेत्य ।। १ ।।
देवद्विषां परिवृढो विकटं विहस्य
बाणावलीभिरभितः कुपितो ववर्ष ।
शैलानिव प्रवरवारिधरो गरिष्ठान्
अम्भस्ततीभिरथ गाढमनारताभिः ।। २ ।।
जम्भद्विषत्प्रभृतिदिक्पतिचापमुक्ता
बाणाः शिता दनुजनायकबाणसंघान् ।
अह्नाय तार्क्ष्यनिवहा इव नागपूगान्
सद्यो विचिच्छिदुरलं कणशो रणान्ते ।। ३ ।।
तान् प्रज्वलत्फलमुखैर्विषमैः सुरारि-
नामाङ्कितैः पिहितदिग्गगनान्तरालैः ।

1. *a* T., Vi.—त च पति पुरस्तात्. *b* Vi.—केन घनप्रमादम्.
2. *b* Vā-2, S. बाणावलीभिरमरान् विकटान् ववर्ष. *d* Bh. अभ्यस्तनी-भिरथ गाढमनारताभिः; Vā-2, S. अद्भिः पराभिरथ गाढमनारताभिः.
3. *b* T. बाणाः शिता असुरराजकबाणसघान्.
4. So Vā-2, S.; Bh.:

ते प्रज्वलत्फणमुखैः समरेऽसुरारिं
नामाङ्कितैः पिहितदिग्गगनान्तरालैः ।
प्राच्छादयंस्तृणचयैरिव हव्यवाहं
चिच्छेद सोऽपि सुरसैन्यशरान् शरौघैः ।।

G. agrees with Bh. except in समरेऽसुरारिनामा—; T., Vi. however have:

तैः प्रज्वलत्फलमुखैर्विशिखैः सुरारिं
नामाङ्कितैः पिहितदिग्गगनान्तरालैः ।

आच्छादितस्तृणचयानिव हव्यवाहश्
चिच्छेद सोऽपि सुरसैन्यशरान् शरौघैः ।। ४ ।।
दैत्येश्वरो ज्वलितरोषविशेषभीमः
सद्यो मुमोच युधि यान् विशिखान् सहेलम् ।
ते प्रापुरुद्भटभुजंगमभीमभावं
बाढं बबन्धुरपि तांस्त्रिदशेन्द्रमुख्यान् ।। ५ ।।
ते नागपाशविशिखैरसुरेण बद्धाः
श्वासाकुलाकुलमुखा विमुखा रणस्य ।
दिङ्नायका बलरिपुप्रमुखाः स्मरारि-
सूनोः समीपमगमन् विपदन्तहेतोः ।। ६ ।।
दृष्टिप्रपातवशतोऽपि पुरारिसूनोस्
ते नागपाशघनबन्धविपत्तिदुःखात् ।
इन्द्रादयो मुमुचिरे स्वयमस्य देवाः
सेवां व्यधुर्निकटमेत्य महाजिगीषोः ।। ७ ।।
उद्दीप्तकोपदहनोऽथ सुरेन्द्रशत्रुर्
अह्वाय सारथिमवोचत चण्डबाहुः ।
बद्धा मया सुरपतिप्रमुखाः प्रसह्य
बालस्य धूर्जटिसुतस्य निरीक्षणेन ।। ८ ।।

Rest as in Bh. Confusion between ते and तैः may be noted.

5. *a* T. ज्वलितरोघविशेषभीमः. *d* Vi. गाढ बबन्धु—; Bh.—त्रिदिवेन्द्रमुख्यान्.

6. *b* S., P-1, Vā-2, Bh., G. श्वासानिला—; T., Vi. श्वासाकुलाकुलमुखा विमुखा रणान्तात्.

7. *a* For दृष्टिप्रपात cp. III, 43*a*. *d* So S., P-1, Vā-2; Bh., G., T., Vi. सेवां व्यधुश्च पुनरेत्य महा—.

8. *a* T., Vi., G. उद्यत्प्रकोपदहनोऽथ—; Bh. उद्दण्डकोपदहनोऽप्य-सुरेन्द्रसूनु—.

मुक्ता बभूवुरधुना तदिमान् विहाय
कर्तास्म्यमुं समरभूमिपशूपहारम् ।
तत्स्यन्दनं सपदि वाहय शंभुसूनुं
द्रष्टास्मि दर्पिलभुजाबलमाहवाय ।। ९ ।।
तत्स्यन्दनः सपदि सारथिसंप्रणुन्नः
प्रक्षुब्धवारिधरधीरगभीरघोषः ।
चण्डश्चचाल दलिताखिलशत्रुसैन्य-
मांसास्थिशोणितजपङ्कविलुप्तचक्रः ।। १० ।।
दृष्ट्वा रथं प्रलयवातचलद्गिरीन्द्र-
कल्पं दलद्बलविरावविशेषरौद्रम् ।
अभ्यागतं सुररिपोः सुरराजसैन्यं
क्षोभं जगाम परमं भयवेपमानम् ।। ११ ।।
प्रक्षुभ्यमाणमवलोक्य दिगीशसैन्यं
शंभोः सुतं कलहकेलिकुतूहलोत्कम् ।
उद्दामदोःकलितकार्मुकदण्डचण्डः
प्रोवाच वाचमुपगम्य स कार्त्तिकेयम् ।। १२ ।।
रे शंभुतापसशिशो बत मुञ्च मुञ्च
दोर्दर्पमत्र विरम त्रिदिवेशकार्यात् ।

9. *b* T., Vi., Bh., G. कर्तास्म्यहं समर—. *d* So Bh.; others दर्पितभुजाबल—.

10. *b* T., Vi. प्रारब्धवारिधर—. *c* T., Vi. चण्डं च—. *d* So Bh. G.;—शोणितसुपङ्कविलुप्तवेगः T., Vi ,—शोणितविपङ्कविलुप्तचक्र, S., P-1.

11. *b* T., Vi.—दलद्बलविराम—.

12. *a* T., Vi. प्रक्षुभ्यमान—; Bh. with—ण—. *b* So S., P-1, Vā-2, Bh., G.; समरकेलि—T., Vi.

13. *a* Cp. XV, 42 सङ्गेन वो भर्गतपस्विनः शिशुः with note on *bharga* (+ *garbha*—); T., Vi. रे शंभुतान्तवशिशो—. *b* T., Vi. दोर्हृद्यमत्र विरम त्रिदिवेशकार्यात्; Bh. दोर्दर्पमत्र विरम त्रिदिवेन्द्रकार्यात्.

शस्त्रैः किमत्र भवतोऽनुचितैरसारैर्
बालाब्जकोमलभुजाक्लमभारभूतैः ।। १३ ।।
एकस्त्वमेव तनयोऽसि गिरीशगौर्योः
किं यासि कालविषयं विषमैः शरैर्मे ।
संग्रामतोऽपसर जीव पितुर्जनन्याः
पूर्णं प्रविश्य वरमङ्कतलं विधेहि ।। १४ ।।
सम्यक् स्वयं किल विमृश्य गिरीशपुत्र
जम्भद्विषोऽस्य जहिहि प्रतिपक्षमाशु ।
एष स्वयं पयसि मज्जति दुर्विगाह्ये
पाषाणनौरिव निमज्जयते पुरा त्वाम् ।। १५ ।।
इत्थं निशम्य वचनं युधि तारकस्य
कम्प्राधरो विकचकोकनदारुणाक्षः ।
कोपात् त्रिलोचनसुतो धनुरीक्षमाणः
प्रोवाच वाचमुचितां परिमृश्य शक्तिम् ।। १६ ।।
दैत्याधिराज भवता यदवादि गर्वात्
तत्सर्वमप्युचितमेव तवैव किं तु ।
द्रष्टास्मि ते प्रवरबाहुबलं वरिष्ठं
शस्त्रं गृहाण कुरु कार्मुकमाततज्यम् ।। १७ ।।

c and *d*: T., Vi. read:

शश्वत् किमत्र भवतोऽनुचितैश्चरित्रैः
बालाब्जकोमलभुजाक्रमभीरुभूतैः ।।

Bh., G. agree with ours in *c* but read in *d*:

बालत्वकोमलभुजक्लमभारभूतैः ।।

14. *a* T., Vi. एकस्त्वमेकतनयोऽसि. *c* T. तत् त्रासतोऽपसर जीव—. *d* So T., Vi., Bh.; others तूर्णं प्रविश्य—.

15. *c* So S., Vā-2; Bh., G. दुर्विगाढे; T., Vi. दुर्विगाहे.

16. *b* Bh. कम्पाधरो. *c* S., P-1 क्षोभात् त्रि—. *d* So S., P-1, Vā-2; Bh., G., T., Vi. परिमृज्य.

इत्युक्तवन्तमवदत् त्रिपुरारिपुत्रं
दैत्यः क्रुधौष्ठमधरं किल निर्विभुज्य ।
युद्धार्थमुद्भटभुजाबलदर्पितोऽसि
बाणान् सहस्व मम शातितशत्रुपृष्ठान् ।। १८ ।।
दुष्प्रेक्षणीयमरिभिर्धनुराततज्यम्
सद्यो विधाय विषमान् विशिखान् न्यधत्त ।
स क्रोधभीमभुजगेन्द्रनिभं स्वचापं
चण्डं प्रपञ्चयति जैत्रशरैः कुमारे ।। १९ ।।
कर्णान्तमेत्य दितिजेन विकृष्यमाणं
कोदण्डदण्डमभितः सुषुवे शरौघान् ।
व्योमाङ्गणे लिपिकरान् किरणप्ररोहैः
सान्द्रैरशेषककुभां पलितंकरिष्णून् ।। २० ।।
बाणैः सुरारिधनुषः प्रसृतैरनन्तैर्
निर्घोषभीषितभटैर्लसदंशुजालैः ।

18. *b* S., P-1 निर्विभिद्य. *c* T., Vi.—उद्भटभुजावलि—. *d* T., Vi.—शोणितरक्तपृष्ठान्.

19. *a* So Bh., G., others दुःप्रेक्षणीय—; cp. note on III, 42, 48, 71. *b* Bh.—विशिखान् विषमान् न्यधत्त. *d* So S., Vā-2; Vi., T. have: चण्डप्रभं यशसि जैत्रशरं कुमारः; Bh., G.: चण्ड प्रपञ्चयति जैत्रशरे कुमारे.

20. *b* So Bh., G., T., Vi.; S., P-1 कोदण्डमेतदभितः. *c* and *d*: So S., P-1; Bh. reads:

व्योमाङ्गने लिपिकरान् किरणप्ररोहैः
सान्द्रैरशेषककुभां पलितंकरिष्णु ।।

So is G. except in व्योमाङ्गणे; T., Vi. however have:

व्योमाङ्गणे लिपिकरान् स्वकरप्रहासान् ।
अद्रेरशेषककुभां पतिवत् करिष्यत् ।।

21. *b* So Bh., G., T., Vi.; S., Vā-2—भीषितभटो लस—. *c* So Bh., G.; —सुरेश्वरसैन्य ईशसूनुः Va-2, S.; T., Vi.—सुरेश्वरसैन्य-कोऽसौ. *d* T., Vi. छन्नाकृतिः स विषयं न जगाम दृष्टेः.

अन्धीकृताखिलसुरेश्वरसैन्यकैः स
छन्नः कुतोऽपि विषयं न जगाम दृष्टेः ॥ २१ ॥
देवेन मन्मथरिपोस्तनयेन गाढम्
आकर्णकृष्टमभितो धनुराततज्यम् ।
बाणानसूत विविधान् युधि यान् विजैत्रान्
तैः सायका बिभिदिरे सहसा सुरारेः ॥ २२ ॥
रेजे सुरारिशरदुर्दिनके निरस्ते
सद्यस्तरां निखिलखेचरखेदहेतौ ।
देवप्रभोः प्रभुरिव स्मरशत्रुसूनुः
प्रद्योतनः सुघनदुर्धरधामधामा ॥ २३ ॥
तत्राथ दुःसहतरं समरे तरस्वी
धामाधिकं दधति धीरतरे कुमारे ।
मायामयं समरमाशु महासुरेन्द्रो
मायाप्रपञ्चचतुरो रचयांचकार ॥ २४ ॥
अह्नाय कोपकलुषो विकटं विहस्य
व्यर्थी समर्थ्यं नरशस्त्रयुधं कुमारे ।
जिष्णुर्जगद्विजयदुर्ललितः सहेलं
वायव्यमस्त्रमसुरो धनुषि न्यधत्त ॥ २५ ॥

22. *c* G. बाणानसूत विविधान् युधिं यान् विजैत्रैः; Bh. बाणानसूत निशितान् युधि यान् विजैत्रान्. *d* T., Vi. तैः सायका विविदिरे सहसा सुरारेः.

23. Śloka omitted by Bh. *b* T., Vi. निखिलखेचरखिन्नदेहे. *c* P-1 देवःप्रभाः प्रभुरिव (standing for) देवप्रभोः प्रभुरिव which is found in T., Vi.

24. *a* Bh., G., T., Vi.—तरं तरसा तरस्वी. *b* T., Vi. धामादधावधिकधीरतरः कुमारे.

25. *b* Bh. व्यर्थं समर्थ्यं वरशस्त्रयुधं कुमारे; T., Vi., S. व्यर्थी समर्थ्यं वरशस्त्रयुधं कुमारे. *c* T., Vi., Bh., G. जिष्णौ जगद्विजय—.

संधानमात्रसममस्य युगान्तकाल-
भूमभ्रमः परुषभीषणघोरघोषः ।
उद्धूतधूलिपटलैः पिहिताम्बराशः
प्रच्छन्नचण्डकिरणो व्यसरत् समीरः ।। २६ ।।
कुन्दोज्ज्वलानि सकलातपवारणानि
धूतानि तेन मरुता सुरसैनिकानाम् ।
उड्डीयमानकलहंसकुलोपमानि
मेघाभधूलिमलिने नभसि प्रसस्रुः ।। २७ ।।
विध्वस्य तेन सुरसैन्यमहापताका
नीता नभस्तलमलं नवमल्लिकाभाः ।

26. So S., Vā-2 except—भूतभ्रमं in *b*. Bh.:

संधानकालसममस्य युगान्तकाल—
भूमभ्रमः परुषभीषणघोरघोषः ।
उद्धूतधूलिपटलीपिहिताम्बराशः
प्रच्छन्नचण्डकिरणोऽप्यसरत् समीरः ।।

So G. excepting व्यवहृत् समीरः; T. agrees with ours in *a* and *b* but has for *c* and *d*:

उद्धूतधूलिपटलीपिहिताम्बरान्तः
प्रच्छन्नचण्डकिरणो व्यवहृत् समीरः ।।

Vi. however differs from all in *b* and *c*:

भूतभ्रमं परुषभीषणघोषघोषः
उद्धूतधूलिपटलीपिहिताम्बराङ्गः ।

27. *d* So S., P-1, Vā-2; T., Vi. संग्रामधूलिमलिने.
Bh. for *c* and *d*:

उड्डीयमानवरहंसकुलोपमानि
मेघाभ्रधूलिमिलिते नभसि प्रसस्रुः ।

G. agrees with Bh. in *c* but in *d* it goes with T., Vi.

28. *b* S., P-1, Va-2 नभस्थल—. *d* Bh. व्यातेनिरे दिविचरीचिरविभ्रमेण; G., T., Vi.—दिविचरीं चिर—.

स्वर्गापगाजलमहौघसहस्रलीलां
व्यातेनिरे दिवि सिताम्बरकैतवेन ॥ २८ ॥
धूतानि तेन सुरसैन्यमहागजानां
सद्यः शतानि विधुराणि दलत्कुथानि ।
पेतुः क्षितौ कुपितवासववज्रलून-
पक्षस्य भूधरकुलस्य तुलां वहन्ति ॥ २९ ॥
भ्रष्टाः खरेण मरुता रथराजयोऽपि
दोधूयमाननिपतिष्णुतुरंगमध्ये ।
वित्रस्तसारथिकुलप्रवराः समन्ताद्
व्यावृत्य पेतुरवनौ सुरवाहिनीनाम् ॥ ३० ॥
हित्वायुधानि सुरसैन्यतुरंगवाहा
वातेन तेन विधुताः सुरसैन्यमध्ये ।
शस्त्राभिघातमनवाप्य निपेतुरुर्व्यां
स्वीयेषु वाहनवरेषु पतत्सु सत्सु ॥ ३१ ॥
तेनाहतास्त्रिदशसैन्यपदातयोऽपि
स्रस्तायुधाः सुविधुराः परुषं रसन्तः ।

29. *b* T., Vi. सद्यः कुलानि विधुराणि—; Bh. सद्यः शतानि विधुराणि गलत्कुथानि.

30. T., Vi. reverse the order of 29-30. *a* T. भ्रष्टा खरेण—. *b* So T., Vi.; others—गमाश्च. *c* Bh., G. विध्वस्तसारथिरथप्रवराः समन्तात्; T., Vi. वित्रस्तसारथिवरप्रकराः समन्तात्. *d* T., Vi. व्यावृत्तिमापुरवनौ सुर—.

31. *a* and *b*: Bh.—सुरसैन्यतुरंगवारा दैत्येन तेन विधुता विधुरा रणान्ते; G.—सुरसैन्यतुरंगधारा वेगेन तेन विधुता विधुरा रणान्ते; with G. agree T., Vi.
c and *d*: Bh.:

शस्त्राभिघातमथिताः परिपेतुरुर्व्यां
स्वीयेषु वारणवरेषु पतत्सु सत्सु ॥

32. *c* and *d*: So G. with which agrees Bh. except in निःपेतुः. T., Vi.:

वात्याविधूतदलवद् भ्रममेत्य दूरं
निष्पेतुरम्बरतलाद् वसुधातले ते ॥ ३२ ॥
इत्थं विलोक्य सुरसैन्यमशेषमेव
दैत्येश्वरेण विधुरीकृतमस्त्रयोगात् ।
स्वर्लोकनाथकमलाकुशलैकहेतुर्
दिव्यं प्रभावमतनोदतनुः स देवः ॥ ३३ ॥
तेनोद्गतं सकलमेव सुरेन्द्रसैन्यं
स्वास्थ्यं प्रपद्य पुनरेव युधे प्रवृत्तम् ।
दृष्ट्वासृजद्दहनदैवतमस्त्रमिद्धम्
उद्दीप्तकोपदहनः सहसा सुरारिः ॥ ३४ ॥
वर्षातिकालजलदद्युतयो नभोऽन्ते
गाढान्धकारितदिशो घनधूमसंघाः ।
सद्यः प्रसस्रुरसितोत्पलदामभासो
दृग्गोचरत्वमखिलं द्युषदां हरन्तः ॥ ३५ ॥

वायोर्द्विवृन्तदलवृन्दमिवेत्य दूरं
निःपेतुरम्बरतलाद् वसुधातलेऽपि ।

S., Vā-2 वात्याविवर्तदलवद्. . . . . .तलेऽस्मिन् ॥

33. *a* S., P-1, Vā-2—सैन्यमथो अशेषं. *c* Bh., G. स्वर्लोकनाथकमलाकुशलैकहेतु; T., Vi.—कमलाकलनैकहेतुं. *d* Bh., G., T., Vi.—मतनोदतनुं स देवः.

34. *a* So Bh., G.; P-1, Vā-2 तेनोत्थितं—; S. तेनोज्झितं; T., Vi. तेनान्वितं. *b* So Bh., G., T., Vi; others युधि प्र—. *d* T., Vi. उच्चैःप्रकोपदहनः.

35. *a* and *b*: Bh., G., T., Vi.:

तत्कालजातजलदद्युतयो नभोऽन्ते
तत्रान्धकारितदिशो. . . . . ।

c and *d*: So S., P-1, Vā-2; so Bh., G., T., Vi.; S., Va-2 न हि संनयन्तः; majority द्युसदां.

दिक्चक्रवालगिलनैर्मलिनैस्तमोभिर्
लिप्तं नभस्तलमलं घनवृन्दसान्द्रैः ।
धूमैर्विलोक्य मुदिताः खलु राजहंसा
गन्तुं सरः सपदि मानसमीषुरुच्चैः ॥ ३६ ॥
जज्वाल वह्निरतुलः सुरसैनिकेषु
कल्पान्तकालदहनप्रतिमः समन्तात् ।
आशामुखान्यपिदधन् निखिलानि कीला-
जालैरलं कपिलयन् सकलं नभोऽपि ॥ ३७ ॥
उज्जागरस्य दहनस्य निरर्गलस्य
ज्वालावलीभिरतुलाभिरनारताभिः ।
कीर्णं पयोदनिवहैरिव धूमसंघैर्
व्योमाभ्यलक्ष्यत कुलैस्तडितामिवोच्चैः ॥ ३८ ॥
गाढाद् भयाद् वियति विद्रुतखेचरेण
दीप्तेन तेन दहनेन सुदुःसहेन ।
दंदह्यमानमखिलं सुरराजसैन्यम्
व्यत्याकुलं शिवसुतस्य समीपमागात् ॥ ३९ ॥
इत्यग्निना घनतरेण तदाभिभूतं
तद्देवसैन्यमखिलं विकलं विलोक्य ।
सस्मरवक्त्रकमलाऽन्धकशत्रुसूनुर्
बाणासनेऽथ समधत्त स वारुणास्त्रम् ॥ ४० ॥

36. *a* Bh., T., Vi. दिक्चक्रवालमिलितैर्मलिनैस्तमोभिः; G.—वालमिलनैर्मलिनैस्तमोभिः. *c* T., Vi.—विलोक्य पिहिताः खलु—.

37. *c* and *d*: So S., P-1, Vā-2; so Bh. and G. except कपिशयन्.

39. *a* Bh., G. तद्भीतितो वियति विद्रुतखेचरेण; T., Vi. तत्प्रान्ततो वियति चाद्भुतसंचरेण. *b* T., Vi. दीर्घेन तेन—. *c* Bh., G., T., Vi. —मानमनिशं सुर—. *d* G., T., Vi.—समीपमायात्; S., Vā-2 समीपमाप.

40. *a* Bh., G., T., Vi.: घनतरेण ततोऽभिभूतं.

घोरान्धकारनिकरप्रतिमो युगान्त-
कालानलप्रबलधूमनिभो नभोऽन्ते ।
गर्जारवैर्विघटयन्नवनीधराणां
शृङ्गाणि मेघनिवहो घनमुज्जगाम ।। ४१ ।।
विद्युल्लता वियति वारिदवृन्दमध्ये
गम्भीरभीषणरवैः कपिशीकृताशा ।
घोरा युगान्तचलितस्य भयंकरस्य
कालस्य लोलरसनेव चमच्चकार ।। ४२ ।।
कादम्बिनी विरुरुचे बिसकण्ठिकाभिर्
उत्तालकालरजनीव रदावलीभिः ।
व्योम्न्युच्चकैरचिररुक्परिदीपिताशा
दृष्टिच्छदा विषमघोषविभीषणा च ।। ४३ ।।
व्योम्नस्तलं पिदधतां ककुभां मुखानि
गर्जारवैरविरतैस्तुदतां मनांसि ।

41. *c* T. गर्जारवैर्विधूमयन्नवाणनीधरां.

42. *a* and *b*: Bh.—वारिदवृन्दवर्गगभीरभीषण—; T., Vi.—वारिदवृन्दवर्गे गंभीरभीषणरवे कपिशीकृताशा; G.—वारिदवृन्दवर्गे गंभीरभीषणरवैः कपिशीकृताशा. *c* and *d*: Bh., G., T., Vi. as ours; S., P-1, Vā-2—चलितस्य भयकराथ—.

43. *a* So Bh., G., T., Vi.; others विषकण्ठिकाभिः. *b* Bh., G., T., Vi.—जलदाव—. *c* Bh., G., T., Vi. व्योम्न्युच्चकैरचिररोचिररोचताग्रे. *d* So P-1, Vā-2; S. (अ)दृष्टिच्छदा विषमघोषविभीषणा च; Bh., G. दृष्टिच्छटा विषमरोषविभीषणेव; T., Vi. दृष्टिच्छलाद् विषमकोपविभीषणेव; Vā-2 विषमदोषविभीषणा च

44. *b* T., Vi. गर्जारवैरतितरै—. After this śloka Vi., T., G., Bh. have:

बंहीयसाधिकतराः सहसा रसेन (T., Vi. बह्वीयसा—)
घ्नन्त्यस्तटे निजकुले इव सुप्ररूढे । (T., Vi.—कुलेप्यसुरप्ररूढे)
मेघान्धकारपटलीपिहिते नभोऽन्ते
नद्यः प्रचेलुरभितः प्रमदा इवाढ्याः ।। (T., Vi.—प्रमदाहवाय)

G. agrees with T., Vi. in *d*; rest as Bh.

अम्भोभृतामतितरामनणीयसीभिर्
धारावलीभिरभितो ववृषे समूहैः ।। ४४ ।।
घोरान्धकारपटलैः पिहिताम्बराणां
गम्भीरगर्जनरवैर्व्यथितासुराणाम् ।
वृष्टया तया जलमुचां वरुणास्त्रजानां
विश्वोदरंभरिरपि प्रशशाम वह्निः ।। ४५ ।।
दैत्योऽपि रोषकलुषो निशितैः क्षुरप्रैर्
आकर्णकृष्टधनुरुत्पतितैः स भीमैः ।
तद्भीतिविद्रुतसमस्तसुरेन्द्रसैन्यो
गाढं जघान मकरध्वजशत्रुसूनुम् ।। ४६ ।।
देवोऽपि दैत्यविशिखप्रकरं सचापं
बाणैश्चकर्त कणशो रणकेलिकारः ।
योगीव योगविनिषक्तमना यमाद्यैः
सांसारिकं विषयसंघममोघवीर्यम् ।। ४७ ।।
भ्रूभङ्गभीषणमुखोऽसुरचक्रवर्ती
संदीप्तकोपदहनोऽथ रथं विहाय ।
क्रीडत्करालकरवालकरो दधानश्
चर्माभ्यधावदभितस्त्रिपुरारिसूनुम् ।। ४८ ।।

45. So S., P-1, Vā-2, Bh.:

आप्लाविताहवभुवा पिहिताम्बराणां
गम्भीरगर्जितपतद्विधुरासुराणाम् ।
वृष्टया तया जलमुचां वरुणास्त्रजानां
विश्वोदरंभरिरथ प्रशशाम वह्निः ।।

So G. except in—गर्जनिपतद्—; T., Vi. have: आप्लावितो बहुभवोऽपिहिताम्बराणां; rest as G.

46. *a* Bh.—कोपकलुषो नि—. *c* Bh.—सुरेन्द्रसैन्यैः; so T., Vi., G.

47. *a* Bh.—दैत्यविशिखप्रवरं—. *b* So Bh., G., T., Vi.; others —केलिकारी. *c* So G., Bh., T., Vi.; P-1, Vā-2, S., G. योगीव योगविधिशुष्कमना यमाद्यैः. *d* So Vā-2, P-1, S.; Bh., G. —विषयवर्गममोघवीर्यः; T., Vi.—विषयवर्गममोघवीर्यैः. . .

48. *c* and *d* : So Bh., G.; Vā-2, P-1, S.—करोऽसुरेन्द्रस्तं प्रत्य—.

अभ्यापतन्तमसुराधिपमीशपुत्रो
दुर्वारबाहुविभवं सुरसैनिकैस्तम् ।
दृष्ट्वा युगान्तदहनप्रतिमां मुमोच
शक्तिं प्रमोदविकसद्वदनारविन्दः ॥ ४९ ॥

उद्द्योतिताम्बरदिगन्तरमंशुजालैः
शक्तिः पपात हृदि तस्य महासुरस्य ।
हर्षाश्रुभिः सह समग्रदिगीश्वराणां
शोकोत्थवाष्पसलिलैः सह दानवानाम् ॥ ५० ॥

शक्त्या हृतासुमसुरेश्वरमापतन्तं
कल्पान्तवातहतिभिन्नमिवाद्रिशृङ्गम् ।
दृष्ट्वा प्ररूढपुलकाङ्कितचारुदेहा
देवाः प्रमोदमगमंस्त्रिदशेन्द्रमुख्याः ॥ ५१ ॥

यत्रापतत् स दनुजाधिपतिः परासुः
संवर्तवातनिपतच्छिखरीन्द्रकल्पः ।
तत्रादधात् फणिपतिर्धरणीं फणाभिस्
तद्भूरिभारविधुराभिरधो व्रजन्तीम् ॥ ५२ ॥

स्वर्गापगासलिलसीकरिणी समन्तात्
सौरभ्यलुब्धमधुपावलिसेव्यमाना ।

49. *b* T., Vi.—सैनिकैस्तैः.

50. *c* Bh., G., T., Vi., S.—सह समस्तदिगीश्वराणां. *d* So Vā-2, S.; others शोकोष्ण—.

51. *a* Bh. शक्त्या हृतासु—; T., Vi. शक्त्याथ तारमसुरेश्वर—. *b* So S., P-1, Vā-2, Bh.; T., Vi., S.—हत—; cp. II, 24 प्रतापक्षतिशीतलाः where some MSS. have क्षतं—. *c* Bh. दृष्ट्वा वरूढ——; so G., T., Vi.; others पुलकाञ्चित—. *d* T., Vi.—त्रिदिवेश—.

52. *b* Bh., G.—रीन्द्रतुल्यः; S., Vā-2 संवर्तकालनिपतच्छिखरीन्द्रतुल्यः. *c* Bh., Vi. तत्रादधत्.

53. Śloka omitted by Bh. *d* So Vi., G., S.; Vā-2, P-1—शत्रौ.

कल्पद्रुमप्रसववृष्टिरभून्नभस्तः
शंभोः सुतस्य शिरसि त्रिदशारिशत्रोः ॥ ५३ ॥
पुलकभरविभिन्नवारवाणा
भुजविभवं बहु तारकस्य शत्रोः ।
सकलसुरगणा महेन्द्रमुख्याः
प्रमदमुखद्युतिसंपदोऽभ्यनन्दन् ॥ ५४ ॥
इति विषमशरारेः सूनुना जिष्णुनाजौ
त्रिभुवनखलशल्ये प्रोद्धृते दानवेन्द्रे ।
बलरिपुरथ नाकस्याधिपत्यं प्रपद्य
व्यजयत सुरचूडारत्नघृष्टाग्रपादः ॥ ५५ ॥

इति श्रीकुमारसंभवे महाकाव्ये कविकालिदासकृतौ तारकदैत्येश्वरवधो नाम सप्तदशः सर्गः ॥

54. *a* Vi.—विभिन्नचारुदेहा. *c* Vi. ससुरवरगणा—. *d* S. प्रमदमुखच्छवि—

55. *b* Vā-2 त्रिभुवनवर—; Bh., G. पातिते दानवेन्द्रे; Vi प्रेरिते—. *c* Bh., G., Vi. बलरिपुरपि नाक—.

Colophon: P-1 इति श्रीकुमारसभवे महाकाव्ये कविश्रीकालिदासकृतौ तारकदैत्येश्वरवधो नाम सप्तदशः सर्गः; Vi इति श्रीकुमारसभवे महाकाव्ये कवीन्द्रमुकुटमाणिक्यश्रीकालिदासकृतौ तारकासुरवधो नाम सप्तदशः सर्गः; Bh इति कुमारसंभवे महाकाव्ये कालिदासकविकृतौ तारकासुरवधो नाम सप्तदशः सर्गः; so G. and S.

VERSE-INDEX

अ

आ

इ

क

त

प

य

श

स

ह